न्व्रणान् शीवनाविता विषयमाह नत्वित्यादि वायुनिर्वाहिणः वायुनिर्गमद्वारभू
तान् सीवनविधिमाह सीव्येचलेत्यादि चलपदास्थिप्रभृष्ठे चपदस्क[illegible]
वाते[illegible] पित्ता[illegible] वातपित्ते[illegible]
द्वि[illegible]षिसा[illegible]माह वधूपापादित्यालि द्रव्यादिषु गाढं शास्त्रादिषु हे.२१४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सत्मरद्धाः पट्टाः केवल्यञ्च विकेशिकाः धूपितामददवः झल्लदगानिर्वलीका करोतिहि साइतिवि
शेषविकेशिकासूत्रवर्त्तिः एतामाह कुर्वीतेत्यादि संग्रहे तु उदकुंभाद्यायो गृहीत्वाप्रोत्तपेत्र पी
तोऽयोऽवकीर्णार्थं पर्णाभवर्च्चाभिरस्यरक्षां कुर्यात् इति बलिमाह बलिश्चोपहारः तेभ्यः इतिमंत्रो
षधीधारणमाह सेदेत्यादि लक्ष्मीसमीम गुहालिगुहे शालिपर्णी पृश्नपर्णी जटिला मांसी
ब्रह्मचारिणी ब्राह्मी छत्रातिछत्रे श्यामपुष्पाद्वयम् आहारविहारनियममाह नलइत्यादि
स्नेहादिने होत्रस्नेहविधिदिनचर्योक्तो दिवास्वप्नं विशेषतो निषेधति दिवेत्यादि त्रिसंग
विशेषतो निषेधति स्त्रीणामित्यादि भोजनतामा भोजनमित्यादि कटुकाफलं कटुरोहि
णीफलम् भोजनविशेषमाह जीर्णे इत्यादि विषमासनेसमसनंच निषेधति अशितं इ
त्यादि अध्यशनं निषेधति अजीर्णेत्यादि नवधान्यादिवर्गमाह नवमित्यादि संग्रहे तु
नवधान्यमाषकलायकुलित्थनिष्पावशिंबीशीतांबुमद्य तक्षीरपिष्टतिलविकृति
शुष्कशाकविशिंतहरितकाम्ललवणकटुकक्षारानुपानि षाणि वर्जयेत् इति नवधान्या
देरित्यपथ्यत्वमाह कर्णीयमित्यादि मद्यस्य ततोप्यपथ्यत्वमाह मद्यमित्यादि व्रणा
क्रषणमाह कालेत्यादि कालेऽश्मगैरेः उशीरैश्चीर्णव्यजने त्रितीयदिवसे प्रक्षालना

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्व स्तनामेन्यादि संगृहेतु कोशमंगुलीपर्वसु विदधान दाम
प्रबंधंगे उत्संगविलंबि स्वस्तिकं संधि कूर्चं स्तनांतरं कंठा
त्रिकपोलकर्णेषु ।मनुवलितं शशस्वासु मुनेत्राली ग्रीवामद्ध
यो मंडलं वृत्तंगे स्थामिकामंगुष्ठांगुलिमेढ्रां तमत्र वृद्धिषु यमकंयम
लवृणधा बट्टाहेतु शंखवज्रेषु चीनम पांगयोः बंधमुद्दशार
पृष्ठेषु वितानेमहीदा दयुलांगे गोपनानां सोष्ठा चिबुक साक्षिषु पंक्ते
गीजयर्ष्टु मितिननु व्रणस्योपरि कुर्यात् नष्यिनवाबाधकरोपयास्यान् वध
स्तव्हेष्टान लेढु है हष्टे भगनेव्रणेषुचन ज्ञायांपाईधाबंधः सयदहणमेदतं वि
विधस्तेवसर्वत्र गाढ्हस्तय समन्वतेः कपवानेघनेगादः पिनरुक्तेननुमुस्थः वज्रपि
तेसमोबंधः कपपिनदलेषु चेति देशविशेषेणबंधविशेष माहनबध्रीयादित्यादि उवीदिगादशास्वादिषु

[illegible]

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तदेवनीयन्तव्रणानिरोमाणि च संधिगतमस्थि च सर्वाँणि वेश्यासि
नरन्नैश्चावाग्नि रन्ते बंकेलविशेष उक्तः संग्रहे शाणश्लेष्माने
कमूर्बालसीनोवक्रलेशिति न यासीवनादिवल्कासु समासेन
चत्वारोमोपल्लिकान्तनसेवनावेल्लितकरंजमंथिंबंधविति
तेषांनामाभिरवाकृतिविभागः प्रहारवशात्वोपयोगः सीवना
नन्तरंकृत्यमाह सांनयित्वेत्यादि पंजनेश्चानोनेनं फलिनीष
यंगुः पूर्ववत् पाटनवत् शुष्कव्रणमाई कृत्वा सीव्येदित्याह
व्रणइत्यादि निशेललनमाक्षालाबाधनीयदेशायस्य सनथाइतिसीव
नविधिः अथबंधनविधिः तत्रबंधनस्यसाधनान्याह बंधनानी
त्यादि सानननेतेतु फलकंकाष्ठपट्टिकाकुशाबेलुदलं बंधनामा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वा॰ २१६ रुणीनश्चमृदुस्वरोपतां निषेधति नचैवमित्यादि रूढव्रणस्य सप्तमासावधि नियममाह
रूढेपीत्यादि आदिशब्दात्‌ भपादपः अनुक्तं स्वयमह नीवमित्याह उत्पाद्यमाने
त्यादि वान्नीसु अवस्यासु उत्तरोत्तरं उत्तरस्यां इति हेमाद्रीटीकायामायुर्वेदरसायने श
ल्यकर्मप्रकर्णप्रकरणं समस्यानतिरूपितं क्षाराग्निकर्माध्यायं व्याख्यातुं प्रतिजा
नीते अथात इत्यादि तत्रादौ क्षारविधिः तत्र क्षारप्रसंशामाह सर्वेत्यादि संग्रहेतु क्षारो हि
२६ नानौषधिसमवायात्‌ त्रिदोषघ्नः सर्वसाधिष्ठानं कटुकलवणरसः स्थिरः तीक्ष्णो दहनः का ६
पाचनो वदारणो विलयनः शोधनो रोपणः सम्यानाभेदो विषापहः सर्वशस्त्रानुश
स्त्राणां च वरिष्ठः छेदनभेदनपाटनलेखनकारणात्‌ यतः संबंधाव शल्ये षु दुःखाव
चारणीयशस्त्रेषु नाडीभगंदरार्बुदादिषु शस्त्रसाध्यात्‌ सदुष्टव्रणेषु बहुशः प्रकोपि
बाह्यान्तः परिमार्जनभेदेनेति अन्तः परिमार्जस्य विषयमाह स
बे वियुज्यते साहूधा व ह्यान्तः परिमार्जनभेदेनेति अन्तः परिमार्जस्य विषयमाह स
येयमित्यादि संग्रहेतु सर्वधा स्वमुदेदय तद्‌ इति वहि परिमार्जनस्य विषयमाह योज्यइ
त्यादि द्वयोरपि क्षारयोर्निषेधमाह न तूभयोपीत्यादि चले काले अबले दुर्बले प्रोढूत्वा
संस्थानविपर्ययं प्राप्ता फलयोनि गर्भाशयाद्यर्थस्यासा तथा तरुणास्थिनासाद्यस्थिपव हे॰ २१६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समम् नेत्रादोषलक्षणं च महान्तरं नोदरां सावं प्रातर्मोत्तरां च सर्वर्त्तेषु प्राप्तस्ये कहान्तरमोद
गास्य मन्दविशेषेपवादः वंधाश्रितोदोषमाह अवदसामित्यादि स्नेहस्यभेषजं चेत्ति वंध
संग्रहेतु स्नेहस्यात्र चिरंतिष्ठति भेषजमचिराद्रूक्ष्येति वंधनकरणगुणमाह वद्धइत्या
दि उद्धृतजंघचलित स्नायुप्रांतोपस्य समस्तसन्नोविवद्धमांसः विषमः कुचिदुःखः
चितीचः सत्रिविधोपिसम्नोभवति ततः ते दोषत्यागात् कठिनामर्दुर्भवति अनि
रूकूरुजाभवति अस्वरूः अस्वरूद्धेति अरूढो रूढोभवति व्रणविशेषे लेपस्य यत्रछा
दनमहेस्थिराराणामित्यादि यथा दोषशीते दोषे उष्णैः उष्णेशीतैः एवं पथ्यतुः अजी
र्णितरुणौः वच्चत्ववालत्वरहितैः क्षीरगोऽभ्य स्यादपस्त्रदनयोनग्राह्याः व्रणा
विशेषेवंधनं निषेधति कुष्ठनामित्यादि ते च कुष्ठादि व्रणास्त्रयोदश तत्र मधुमेहि
नांपिडिकाः उदंसविषेकर्णिकामक्षकविषजपद्मकर्णिकारामांसवृद्धयः विसर्पि
इतस्ततोव्रणाः व्रणोक्तमिप्रतिकारमाह अप्रदयेत्यादि सुरसादिगणस्य क्वाथेनधावनं
चूर्णेनपूरणम् राज्ञा दनो राजादनः मांसपेश्या मांसगर्भपेश्याः तान्मांसलोभात् पेशीप्रविष्टान्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ग्धाग्नौ विगते पृथक्कृत्वा सुधास्मानां भस्म द्रोणां त्वितरं भस्मनः मुष्कको त्तरमादाय पृते
वं जलमत्र पोः गालयेत् दधिभारेण महता वा ससा चलतर यावत्पिच्छल रक्ता स्ती हलोज्जाल
इति दग्धा भस्मीकृत्य अग्नौ विगलेशां तेसातिसुधास्मानां भस्म पृथक् कृत्वा इतरभस्मनो द्रोणान्
मुष्कक भस्मना उत्तरे पादतानीतं घोसे कानां समानां चत्वार आढकाः मुष्कस्येक पुनः
आढकइत्यर्थः जलस्य द्वि भारो मत्रस्या द्विभार इत्युभयोर्भारेण द्य महता वस्त्रेण गालयेत्
पुनः पुनस्तेनैव परिस्रावेण गालो द्य यावत् पिच्छलो रक्तो छती तीक्ष्णवती स्याद्वोभवृतिपि
त्रेपचेत ताडमुष्क भस्मनः पृथकृत्वा क्षीरपाकं घटिका शंख नाभिः शंखपणावर्तः व
हुशो वहून्वारान् त्रीणि तापनानि त्रीणि निर्वापनानीत्यर्थः घेषणास्य ताशेदकस्य
मानो तपावेश्यमानमनु लोमपिकल्प द्वादीनां पदिशांस कृतपुरीषं च तुष्यदांपदिशा
चपित्त ग्वलहरितालं रसादिविषादिकमल्पता चूर्णीकृत्वा निक्षिपेत् अत आवपमानं
तरं सततां पतितो दर्व्या विघट्टयेत् लेहवत् घनो लहद्रवसांद्र अथयोमये लोहपात्रे विनि
क्षिप्य यवराशि मध्ये स्थाप्यः अयं मध्यमस्तारः मन्दतीक्ष्णयोर्द्वयमाराणात्वात् मृदुतीक्ष्णता
रविशेषमाह ननु तिष्ठेत्स्यादि मदो तारमध्ये भवत सर्वमावपेत् तस्य विशेषः निर्वाप्यापनेपतेनन्
तृतीयः
क्षीरशंखपाकादीनां भस्मनो द्रोणां मुष्ककोत्तरं मुष्कक प्रधानं शंखपाकादीनां सम्मुष्ककस्य चतुर्थभाग
संपाकभस्मनः सेतु चत्वार आढका महाभस्मकभस्मनय के

हे २१८

किंचीतनं दत्ति बहुली कृत्वेर्थ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हिः परीमार्जनस्यदहनविधिमाह कालमुष्ककेत्यादि स्वंगहेतु गृणवहिः परीमार्जनस्यविधे
मध्योमदुत्तीहात्क्षलस्यपाकविधिः शरदिशिशिरोह्नपोषितः शुस्कद्विवासाः प्रसस्तेहनि
प्रसस्तप्रदेशलजाते मध्यवयसमनुपहतंमहांतं कालमुष्ककं सुरापलसुमनोदत
तादिभिस्तुर्दिष्वावलिं दत्वाप्रदक्षिणं चाभ्यर्च्यैनमधिवासयेत् देवलेभ्योनमस्तेभ्यो
म५ निवसंतोहयेस्थिताः गंधपुष्पैःकुद्धास्तन्तुमेचास्तसमर्पयन् पयलभलेवेल्लतेवाकिंचिन
पश्येत ततोयुगमात्रमारूढे सवितारंब्राह्मणान्वाचयित्वालेपादयंपूर्वाग्रमुत्तराग्रं
मु६ वापातयेत् एवमपातिभद्रकादिषु कालेष्ककः कुम्भयाज्ञः महावृक्षः स्नुहीश्वास्फोतःको
विदारःवृहतकः कुटजः इंद्रवृक्षोऽर्जुनःपरिकसिताव् छिन्नान् चतस्यःकोशातकीः दवेंगेधा कडुतोरी तोरी
मार्गवः पटोली देवदाली चनिचयी रूस्यपुंजी कृत्य पृथकृषत्स्वेकं तेषु पुंजेषु मध्ये यःका
लपुष्पकपुंज तत्र सुधाश्मानिप्रक्षिपेत् सुधाश्मासादादिधवलीकरणात् व्यमतप्रम
भ्योदग्धेभ्योजायते इति तानिसुधाश्मानि ततःसर्वान्पुंजान्तिलानांकुलालैः प्र
दीपयेत् समूलनालसुष्कतिलःकुंतालेदीपनं वह्निनाप्रज्वालनं गालनविधिमाह द
तःभिन्नारत्ताराः भविष्यंति एव त्तारोभिन्नः स्नुही त्तारेभिन्न
श्वमस्याविरवारभागोयोवर्द्धितेसेधपत्तिश्रुतान् पुंजान एपकोला
ज्वालयेत्प

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

341

वा॰२१८ घ्नो न घ्रवन्तदेहपामाञ्चाशनमुपेदेत्तेति ॥ अर्शसां विशेषमाह ते चार्शइत्यादि हस्तिना चूताना
नं पाणिना छुरेषु पित्रमुखं चूर्णीकृत्य शलाकायंत्रतस्य मुखे तेन शलाकयंत्रे मुखं द्वारं लापयेत् मद
रणो ॥ अधउपरिभागौ विहितं वर्त्मरोगेषु शेषमाह वर्त्मरोगेष्वित्यादि वर्त्मनीनिर्भुज्य उद्धृत्यलांनी
त्यापि चुलावत्स्य भागमाछाद्य रोगेषु द्वारं विनिर्दिशेत् घ्राणार्बुदविशेषमाह घ्राणार्बुदस्य
दि ॥ अग्रन नासिकां नाशयांयं कर्णार्शसां विशेषमाह तद्वदर्शसिकर्णजेष्विति तद्वन्नासार्बुदवत्
द्वारप्रयोगानंतरं कृत्यमाह द्वारमित्यादि सुदग्धमवगम्य सम्यग्दग्धं ज्ञात्वा पयोमस्त्वादि
भिः सिंचेत् पयोमस्तुकांजिकानां विकल्पः सुदग्ध अपरिपक्वघृतशीर्णं कृत्यमाह पदित्यादि
धान्याम्लबीजधान्याम्लसलरयं द्रव्यं संगृह्य स्वर्णाद्दीरयुक्तं स्त्रिविहिं उग्रसारखड्गीति
लैपालेपयेत् मालतीवृषांकोनिंबास्योतपटोलीकापत्रक्वाथो वा व्रणप्रक्षालनम एव
मेवचवल्कक्वाथे सिद्धिसर्पिस्तैलं वा रोपणं नागपुष्पमंजिष्ठाचंदनतिलपर्णिकासुवा
पथाव्याधिदोषे चव्रणाबहुपक्रमेतेति सुदग्धस्य लक्षणमाह पक्वजंबूसितसन्नं सम्य
ग्दग्धमिति पक्वजंबूफलवत् असितं श्यामं सन्नं निम्नम दुर्दग्धस्य लक्षणमाह विप
र्यये ताम्रता तोद कण्डु घेदुर्दग्धमिति विपर्यये ताम्रादिवर्णत्वउत्सन्नत्वेच ताम्रता हे॰२१८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पिष्टा क्षिपेत् निर्वापास्तु द्रवमेव क्षिपेदित्यर्थः दन्तीविष्टादिकं च क्षिपेत् तीक्ष्णोपि सर्वं ध्यमव
त् लांगलिका यवक्षारोधिकः तालपत्रानुशाली संविधो पि क्षारः मध्यमात्वयं योज्यः मध्यमव
पवराशोस्थाप्य इत्यर्थः क्षारत्रये पि विधानं समाह मृदुः क्षार इत्यादि तत्र कफवातमेदोजेषु क्षारसा
ध्येषु तीक्ष्णो पु तीक्ष्णो योज्यः तेष्वेव मध्येषु मध्यः पित्तास्रजन्मसु क्षारसाध्येषु अन्यो मृदुः त
था गुदजन्मसु कफवातजेषु पि तीक्ष्णः पानीयक्षारेऽन्यत् क्षारांबु निक्षिपेत् क्षारमध्यमाह ना
ति तीक्ष्णा इत्यादि शीघ्रगः शीघ्रव्यापी सितः शुभ्रः शिखरं चिरसंस्थस्य द्रव्यापरी पीडिकात
क्षत शिखरीसुखेन निर्वाप्यः शीततानेयः न विष्यन्दी क्लेदं नोत्पादयति मध्यस्त्रेशाग्नि नात्ये
कार्यम् तत्र क्षारः करोति आचूषन्नन्तर्गतं समाकर्षन् आपीडयन् संकोचयन् संरंभावेगेन
संग्रहेतु दश क्षारगुणा दशैव च दोषाः तथया अनुष्णोतिशीतो मृदुः तीक्ष्णोतिलिम्पदुरतिरतनु
ति घनोतिपिच्छलो ति विसर्पी हि नोषधो हीनपाकश्चेति अथ क्षारप्रयोगविधिः तत्र संग्रहे त
त्र क्षारकर्मशापुपहरेत् पिचुवर्तिशलाका दर्वीजलिक घृतमधु सक्तं तुषोदकमस्तु क्षारोदक
शीतप्रदेहशयनासनादीनि अथ क्षारार्हस्योपविष्टस्य संविष्टस्य वा परिचारकोगृहीतस्ये
ति क्षारप्रयोगमाह क्षारसाध्ये गदे छिन्ने लिखिते स्राविते तुष वा तीरं शलाकया दत्वा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बा॰ २२९

३९

कृत्वा गोदंतो गवां दंताः सूर्यकांतः स्फटिकः आदिशब्दात् पिप्पल्यजाशकृच्छलाकादयः
मांसदाहविषयमाह अर्शी इत्यादि आदिशब्दादर्बुदगंडगंडमालाश्लीपदौ रुग्चवगाढ्रप
लसीकान्नगादयः मांसदाहसाधनान्याह मधुस्नेहजांबवौष्ठगुडादिभिरिति लिंगआदिशब्दा
त्सूचिशलाकामधूच्छिष्टताम्रयोरूप्यकांस्यादयः शिरादिदाहस्य विषयमाह क्लिष्टेत्यादि शिरादाहसाधन
आदिशब्दात्तथास्नायुसंधास्थिच्छेदंद्रेलनाडुष्टप्पयस्मकलगगादयः शिरादाहसाधन... अन्तःशल्यान् अर्शेत्तरस्य
न्याह तैरेभिस्तैर्मांसदाहो ज्ञेयः अथेति दाहनिषेधति नदह्येदित्यादि स्वस्वपनमुपहस्तपूर्वोपकरणा
जम्ब्रसंग्रहे तु उक्तंच स्थिरदीप्तखदिरबादराघेंण
ग्राकुप्शिरःसेविष्टप्राणप्राणबलं विलं कृत्वा वेघो निर्धूमं... नोर्ध्वानिर्गच्छतज्ज्वालतयापायादितायाघमानभास्र
रेखयो घटनघृकारेण शाल्पद्धचंद्रस्वस्तिकाष्टापदविशेष
लिंगवराङ्जीवेघोष्ठादिभिः व्याधिप्रदेशे... शालपद्धचंद्रस्वस्तिकाष्टापदविशेषलिं
मुहुर्मुहुर्हितोपहितासाभिर्वाकुभिरद्भिश्चातुरमाश्वासयन्देहासम्यकृतदाहलिंत्वादहेदिति दाह
गोत्स्वन्ने: उच्छूलनस्वरपूल्लुनदतन्नाडीसज्जेन्दुष्टरोगेषु तुः तस्येत्यादि तालंतालफलम्
नन्तरंकस्यमाह स्पृग्धमिस्यादि स्पृग्धलत्तराम्माह

हे॰ २२९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धेऽन्न दुर्दग्धे पुनर्दाहं गुडेत्यादि नासादिदग्धलक्षणमाह नासापाकमित्यादि तद्धन्नासावत
वेशस्थाने तदेव पचो ज्ञेयः अथ दग्धप्रतीकारमाह विशोषमित्यादि विशेषमाह माहक्रो त्रा
घसिदग्धलक्षणमाह सद्वन्छो त्रादिकेष्वपि इति पूर्वोक्तैरेव निर्वापणोः उक्तं च संग्रहे तन्नि
वृत्तमासु पूर्वोक्तैरेव निर्वाणोः पुनर्पुनर्निर्वापयेत् अतऊर्ध्वमति प्रमाणमसकृदेव दहेदिति
तथा ज्वरोतिसारतृष्णामोहमूर्छाहिक्कान्नातितिभिः कदंदहस्यगतिविशरीरविभ्रमः पाययेत
लिपांगेत्रलेशीघ्रं सघृतं [illegible] दधिसगुडं वा दधिरसं तैलं वा सर्पिस्तोपलं धात्रीफ
लरूपिस्याम्लदाडिमस्वरसे घृतं हिंगुरोसाधितं पानमे[illegible] कदातातितृष्णतं दाडिमा
मलकाम्रास कपित्थकारमर्दकानथ्राम्राद्य करमर्द मातुलुंगाम्लरसेमृदुवह्निनापचेत त
तोनिवृत्ते तारापदग्धान्माद्यपथावलम्ब तारोनिवर्त्तते नप्रसादं त्वकुचाश्छति शोणितानि
वि० ८ पूर्वतोवबाह्यान्ताशिशिरौषधीरिति इतिक्षारविधिः अथाग्निकर्मविधिः तत्राग्निप्रसंगमा
ह अथग्निरित्यादि अग्निर्गिभेदानवडाह त्वचीत्यादि त्वग्दाह विषमाह नासेत्यादि संग्रहेतु
सतुकुत्तलाद्यप्रम्लापदंगानिष्वं दाधिमन्यशिरोभूशंखललाटकूजादितेषु यथास्वमीन
च्छेदादिषु तभ्रूशंखललाटदेशेष्विति त्वग्दाहसाधनान्याह वर्त्तीत्यादि वर्ति गुडात्यादि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

माहेश्वराद्विति तथा तेज स्विपद स्वन्त्वादिकं प्राप्त्वरे तद्धने जो नितिसं जोऽयः परपति तेज
सीति ॥ पश्यावामे धायाद्व्यादि नाविति तद्धंति तेजस्या तेजो दर्शिनेन तु त्वं नहन्
गुलं कं स्वयं पः परपति ॥ सद्व्यहस्तु नन्स ह्यपरपति हनरपति तेत्रपुरुषो तेत्रवे
गस्य विद्युते पस्ते वयः सात्तेत्रराणां तिमरादिकमंनरेण बहुरूपं चेदं परपति एवुव
धनी पुरुजमिन्यादि वुविशिष्टे वुवस्तुविपर्यासदर्शनमात्रत्तत्त्वलस्ये कास्मिन्नेवोदाहर
णत्वेन तदिदं दर्शयितुं पुरुषं यदनेकरिशंदर्शनं तन्मपं वाच्यं वेद्य जाग्रदित्यादि ॥ जाग्र
त्स्वप्नयोस्तज्जाग्रद्धेषयायास्य रूपाणि रत्नःपिपासा चालिनिपः परपति तविपर्यवि
लवस्तुरूपाणि पतन्त्रलपानि नेरवसउपासते तथा च बरात्ति यमद्रष्टापिपत्तवाद्वे
पत्त्वस्तुरूपा स्पन्दति रत्नं नानिवद्वहवचनं निर्दिश्य बहुराज्ञस्पर्शने तु तरामस्य
रिहस्वपदं पूर्णत्वमिति यानि यितुमेकास्मिन्नापि दृराससे हष्टेरिहं मवन्त्यवजाग्रतो
वा बहुवचनं ॥ नाम्ना तद्विधानरात्त्रसादि यकारान्त्यः परपति तथा विकल्पाद्दृष्टा
दृष्टं दुःशकाङ्क्षा कृतिपिस्य रूपस्पन्दं पयाकृतिः रत्नःपिपासाचादिकानारकं तद्दृने ९४
कंयः परपति सनरपति एतद्वीणामित्यादि पापरादंधनीसत्रबीलस्मोपस्पत्ने
परपति हनो समानपरपति स्वस्य संवत्सरस्यानसियतं स्पर्थः एतद्बीलसस
मीनस्यामित्संधत्ता विशेषत एतद्विपमोपरंधत्ता स्थितिर्भवनीति वेदयति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नश्यतीत्यसेचनकान्येनैवार्थः तथाप्रकृत्यजीवध्रुवंचैवसोमच्छायांमहापदे पानवदपत्यन्तरेण
त्वनरः संवत्सरात्परमिति तथाचाध्रुवेनवपश्यति तथाऽश्वाश्वरूपाणि कान्यपश्यति सतो
हस्तं नवपश्यतो इदानीष्व्यात्ते द्विपस्यार्द्धकृतिमाचिरस्याम्भुराहमं घ्नत्यादि तघृहिं ज्ञानेन वा
नवर्धनान्वाहान् तथान्यामुखाद्द्वान् तयारूपानमहतायः पुरुषात्स्वन्नवरेः रक्तपलम्भमा
ना न स्पृशतीति तयामेघाद्विजान्तथान्यांस्पृशः शब्दानुसतः विद्यमानंस्पृशतीति ने
वांमरल्लमादिकादिति वस्मात्रचनतिपरिलनमाणत्रं संबंधः कार्यः फधुकधुकृता
हे कल्लितंगुल्फानि नद्यायान् नहाभिन्नत्यादि तेमेघा द्विजैः शाहेस्तुल्यः नदद्यया
मघादीन्नशाहान्यासतः स्पृशतीति सनस्नानमस्पृशतीति नदद्योगन्धरसस्पर्शान् निर्विवेच
या पथा मधुरमम्लम्लमधुरमित्यादि स्पर्शविपर्ययायथा मृदुस्पर्शं खरस्पर्शमिन्य
न सर्वं सर्वेक्रियाणां धातीः तवायोऽपि नमनन्ते सोऽपि नस्पृशति यस्मात्यादि नव्रताजानिवी
ताः स्वदीपस्यकोशं धनजिघ्रति घ्राणेन्द्रियेण नानुभवति विधिनेत्यादि विधिनाप्रयोगेण
पुत्रेन मयुक्तारसाः यस्मद्दीपावरागाय अविधिना शास्त्रविरुद्धेन क्रमेण प्रयुक्ताः स्वा
स्थ्यापसुः तथायः वायुनारजसेव कीर्णगात्रः धूलिमलं शरीरः यस्मात् शाखादि सु
हारं घ्राणं हन्ति नवन्ति तथास्त्रीत्रमंनरलालमत्ते उक्तं नयविनायः पुरुषा
द्रियाणि द्वियस्यानिकर्मेन्द्रियाणि इन्द्रियालानि गोचरं स्वकर्मदिवति तयापामनावाविधि
पूर्वं तमं नरेतानि द्वियं जानाति नेकपूर्वान्तानां सर्वदामरणमारिवात् यागमिन्नसरीरे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यास्य सतनेनाक्रमस्तु महाप्रभुर्गते त्ववयवे बुभुत्सुंसे रोमस्तु पुलकस्तेन उपलक्ष्यते शीतेषु वा
तेषु भग्नमांसपेशीपलक्ष्यते भू शीघ्रहृद्याचं ह्लिविषयदये पि संबंधः यस्य हेतुक
निर्निमित्तः संगेषु भग्निस्वेद स्वयास्वेद विषयाय संभः सापि यस्य तानुसापि वर्धनजी
वनीतियोऽयं योजानेत्यादि जाताः शीताः पिटिकाः यस्य सजात शीतपिटिकः कफ
डून पिटिककालेदहायाखिद्यते विदाहमनुभवति शीतांगः सप्र यावाविदस्तेन न
याउष्मंदह्यिपयुरवः शीतार्तः सन्नस्मनाधिवगोचरः सम्यक्नुनान्मवशीकृतः आत्म
सान्तिक्रियनतस्यर्थः उरस्थियस्याकाउमाभवेत जठरे उदरे चानि शैत्यं पुरीषभिन्नं
नक्कामवति सपेत तुल्यः प्राप्तमरत्वादिति भावः यस्य मूत्रं पुरीषं नि [illegible] नेषु कं वा
[illegible] निमज्जति [illegible] तिपस्यवानि [illegible] तंनिष्ठीवन मनकवर्णमव मसेमासेनन स्य
ति घनीभूतमित्यादि मरणाभिमुखस्य पुरुषा विपरीतस्कारिमिदोषैर घनादिघनादि
रूपं मन्यते घनादिवा अघनादि मन्यते न ह्रिपर्ययेण एवोप मार्थमिव शाहं प्रा
युक्तं अच्चनोयुनः संपन्नोघनीभूतं नंह्रि [illegible] स्य अस्य च्चाविनीतसमर्दिनीधर्म
मतनरित्तम ईस्येयत्नं दधस्य वातालस्य अपि वपरूपति [illegible] स्वरूपतो
निवरूपमात्रेन संबंधः अमर्तमित्यादि वशाहोमिन्नक मडवशाह [illegible] अमर्त्यवा
नादिकमर्त्यमिव परूपति मूत्रं च बहुलादिकममर्त्यमिवाध्यतेयः वशपति सनरूपति
मेडोपधीने यस्य दर्शनमायाति वापुरं बरगोचरः वह्निना यातिदीप्तापितस्यायुः क्षय

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुनरजस्रं नातत्या हि पूर्वं सुखस्पर्शो रोमहर्षा भिन्नस्तनं सार्द्रेषु सर्वगात्रेषु भिन्नवर्णोऽकस्मान एव यस्य
पापूर्वं स्नेहत्वमनर्थकस्यान्नेनैव मन्त्रहिम शागर हणान् पूर्वमुरोमहर्षं सुखानि नपुनरन्या
त्रविनागात्राणि न सुखानी स्पाणानि नचैनत् हृष्टशाब्द कुनश्चुनएवां दीर्घिन्याह न दयम
धीत्रामिमे ना: पथे वा रसाम्नां शैलव स्तथे वशावा णोमगानां म स्मार्द्रेना स्पादित्यनत्र
प्रतिपादयितुमाह्रिग्रिमुक्त सर्वगात्रे व्वार्द्रेषु सत्सु पूर्वं सुरोम संप्रभुष्यती त्यत्र न दाखयेन्त्या
रिष्टं अकस्मादित्याह तत्र स्नानं न नावर्णा गोरादिः स्यात् उक्तः कृत्न वैकृतैर्वर्णैर्नीलादि
र्लोपाकृत्तं वैकृतो वर्णोऽपरस्यानि सित्रमंतरेणापि तुल्यकालं दृष्टेभवत स्नेनमस्पवे नेयो
वोपचय ग्लान्याह यः परस्परं प्रतिपद्यते भूतायुगवदस्योपपद्यते नस्य मस्वकादिक्ष
हूतशेन्याक्षारी निगच्छते वस्य गाक्रस्यान गुल्मन स्फुटेयुर्ने त्रुटेयुः स न जीवति यस्य
त्वाच्चपूर्वं ध्वनिरलौकिको शरीरे स्यात्स न जीवति यस्यात्स्वलितिहृत्स्वानि दीर्घा वा
भवेद्यथा उच्छ्वासः पूतिर्गन्धः सुरभिर्वा यस्य स न जीवति त्वय्याण प्रास्तुनानासूनस्त्रा
नास्नाने कायस्य मानुषमतिक्रान्तो मानुषागन्धः सुरभिरसुरभिर्वा भवति यस्य च
मलवस्त्रव्रणादिष्वागन्धः मानुषागन्धः स्याद्धर्षान्ते तस्य जीवितं न तत्र णादारभ्यनावद
साध्यवस्थितं जीवितं यावद्वर्षं न दंतेवत्सरान्ते मृत्युभाग्जानाप्यत इत्यर्थः भवतं इति
वाभनस्य रसस्य भावः सौरस्यम् गमस्य सौरस्य मंग सौरस्य गन्धि शयेना ग सौरस्य ा द्
तापूकामक्षिकादयो यं भजेन यं वंकाय मनिवेरस्यात् त्यजंति सापि वर्षं न जीवति न

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

349

रोगिणा राजयोहयेने ॥ यवकाबालेहाहनयोवक्ताः स पुमान्षण्मासान्नजीवंति तथा
यस्यपुंसः प्लवमानस्यजलेस्नानंकुर्वतःशरीरेपद्मिनीपत्रवत्पद्मिनीपत्रस्थिततोयव
त्तोयंप्लवनेनतवस्थितिर्भवति तस्यापिषण्मासाज्जीवितं पद्मिनीपत्रवदिति हस्तस्य चे
वति तथाप्यर्थं शरीरे इति सप्तम्यानिर्दिष्टम् तथा चोक्तं भाष्यकृता उपमानेयः संज्ञ
यः सउपमेयाद्यावर्तत इति हारितानि यस्यशिराहारिताभाः सेमकूपाश्चसंरनाः सुः स
तेरामलामिलानीसनपितेनमृत्युं प्राप्नोति यस्येति यस्यपुरुषस्यगोमयसदृशं चूर्णं
सूत्रेहंस्मृद्धिमुरके वामवेतयाम्मूर्ध्निधूमोपस्यकामभवति तमासान्तजीवितस्यात्
मूर्ध्नीत्यादि सीमंततान्ताः ॥ आवर्तकाः सीमंतनावर्तकाधारासिभुवाकीनवाः ॥ अस्मवीः स
स्यस्यवड्गात्रान्यस्तुकुर्वन्ति ॥ मानुरस्यपुनम्हिराज्ञाकुर्वन्ति ॥ तेनेकार्यत्वाद्दानं नाम्ह
चयंतीत्यर्थः ननु विषवत्स्मारत्ते नेषाकर्तन्तवनार्हिसः चयंतीत्यनदेवकस्मान्नकृतवृ
मः यदेतन्यदांतेसीमंतनावर्तकासदानिश्चितं स्यापि रिह समुत्पन्नमित्यवगंतव्यमि
ति प्रतिपादयिता नार्थं कुर्वतीत्युक्तं तथायस्यजिह्वाश्यावाभवति तथामुखंपूतिगंधि
दुर्गंधितथा सव्यं वामम्माक्षिनिमज्जत्यंतःप्रविशति तथायस्य खगाः पक्षिणः म
मस्तिष्कं लीयंते भक्षयंति नवाखर्वजीयचेदेहइतिशेषः यस्येति यस्य स्नातानुलिप्तस्यपू
र्वं स्नानः पश्चादनुलिप्तस्य स्यादिषु सर्वगात्रेषु पूर्वमार्दो मध्ये शुष्यत्यनिशाये
नवतसर्वंशमायामानिसोर्द्धमासंपक्षं न जीवति तन्नार्दिषु मध्ये सर्वगात्रेषु शुष्यतितवत्क्रूषं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गुरुस्तब्ध तथा शयानो वा तथालिंगमालिंगमा स्तब्धवत्सुमार सालानाद्विचलनेत्यर्थः तथा सकंट
कार्कटकाश्चितेव शिरउत्थाप्य यस्य पुरुषः शिरोधरा ग्रीवा शिरो वोढुं न शक्नोति तथाप्य
स्य पृष्ठं वा आत्मनो भारं पृष्ठस्य वोढुं समर्थ नयर्थ हस्तौ वा हिक्कं धारयितुं न शक्नोति
यस्य वा पुरुषो हनुमर्पिंडकवलमास्यस्य वोढुं न शक्नुतः एवं शिरोधरादीनि त्रीण्यपि गात्राणि
स्वमात्मीयं कार्यं यस्य वोढुं न शक्नुवंति एकुल चोदितं इति यस्यानिमित्तं कारणं विना योज्यं ५
गात्राणि गुरूणि कदाचिदतिलघूनि वा भवंति तथा स्याद्विवर्णमंतेरणस्य अपक्षेप्त द्र
व्यारक्तं प्रवर्तते आयाति उत्सिक्तं मेहनं यस्य वृषणौ चातिनिःसृतौ अतोऽन्यथा वा यस्य
स्याकारणं स्यात्सर्वत्र काले चोदितः यस्य मेहनं लिंगमुत्सिक्तं ऊर्ध्वगतं वृषणौ चातिनि
सृतौ प्रलंबौ अतोऽन्यथा वा उक्तात्प्रकाराद्विपरीतः प्रकारोऽयः सोऽन्यथा यथा वृषणावु
त्सिक्तौ चातिनिःसृतं मेहनमिति केशरोमनिर्भ्रंशगमित्याह अपायं वदतेत्यथावेदि
तत्पर्यंतगतं यत्तेलद्दललयर्वानुपूरणपाणिजातं तेपुरुषाः सर्वकालेतमस्तुनाचादि
ताः अंतकेनात्मसात्कृताः इत्यर्थः नन्वत्र कालनियमो न कृतः इयता कालेन मृत्युर्भव
ति मासेन वा अर्द्धमासेन वेति एदेहाल्लघुक्रमेण तद्वन्वतःसतः आनिर्दिष्टकालानां संवत्स
रावधिरिति विवस्याविद्यात्तथा चाह वर्षांतिनस्यजीवितं तथाऽसोपि वर्षं न जीवनं च चेतना
न्नास्ति वर्षाद्दूर्ध्वं जानाति एष्यजीवितमिति निश्चयः यस्यत्याद्वि यस्य पुरुषः स्वस्य
स्य निर्निमित्तमेव ललाटे वसलकीर्तिरस पूर्वाः अभिनवाः ननु प्रागवाच्यताः सिराले

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

याति स्रोकुटिले तथा यस्य वित्रस्ते विस्तारं गतेन तथा यस्याने वे संक्षिप्ते संकुचिते तथा संश्लिष्टे
विशेषेण नते भ्रुवौ ययोस्ते संश्लिष्टे विनते भ्रुवौ तथा ब्राह्मण दर्शिते विभ्रान्त दृष्टी तथा हीन
दर्शिने अस्वदर्शिने नष्टदृष्टि नीवा तथा नकुलोपम नकुललोचनाभे समुदायबुद्धि
प्रवृत्ताः अहाः अवयवेष्वपि वर्त्तन्त इति नकुलशब्दोत्र नकुललोचनविषयावेद्यो यथा
च गोनर्दनाटकः वसुलामरसानुकारि हरिणलोचनासुस्थलं स्पर्द्धत इति अत्रापि हरिवद
सावस्तः स्पर्द्धत इत्ययमर्थो वेद्यः अथवा नकुललोचन उपमा ययोः तेन नकुलोपम इत्यु
त्तरपदलोपी समासः एवंकपोनाभे तथा अलाताभे उल्मुकसदृशे तथा अशुनिर्निमित्त
मस्तु परिस्रवतः तथा लुलिते कातरदृग्नेइव समालीययोस्ते लुलिते पक्ष्माणि
तथा यस्मिन् नासिका नाहकानिर्निमित्त मनिरायत विरला अथवा सवृत्ता संकुचित तत
या पिटिकाचिता पिटिकाप्रमीता तथा चूर्णात् उद्धृष्टवपुषा आक्रान्ता तथा स्फुटि
ताभ्यांनाच पक्षिपाटि पस्वजोष्ठाद्दंतच्छदः अधरानुत्तरो अधो याति द्वितीय उपरिष्टा
द्धेवो पादंतच्छदः सफुरंड्याते तथा यस्य चपकजंबूफलनीलौष्ठावोष्ठौ भवतः तथा य
स्यदंतास्सशर्कराः शर्करायराचिताः तथा श्यावाः तथा नाम्नावर्ण्णतः तथा पुष्पिता
संजातपुष्पाः तथा कपिनाः संजातपंकाः कर्दमेनोपलिप्ता इव तथा सहसैव रुक्षितेव
यस्य वाङ्जिह्वाः पव्वपुंसेदुः तथा यस्य जिह्वा जिह्वा दिव्यावधिष्ठाने जिह्वा कुटिला तथा वि
सर्पिणी कारणं विना विशेषेण सर्पति तच्छीला तथा स्रुतानिमित्तं विनापि तथा स्रुष्टु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लवणगाः समवर्त्तिन इति समवर्त्ती हि कालमस्तीत्यारेव विशेषं कर्त्तव्यात् कालमन्तरेव किं न दृष्ट
मित्याह रूपेंद्रियेत्यादि रूपं गौरत्वादि वर्णविशेष गौरो गौरश्यामः कृष्ण इति तद्देशसूप
लम्भो गौरादयो देहप्रकृतिर्वर्णिनी लश्यामता इतीन्द्रियज्ञादयस्तथा चक्षुषोपलब्धाश्च वर्णा
जातं संस्थानादि तद्ग्रहणे रूपं इन्द्रियाणि चक्षुरादीनि स्वरस्पर्शः प्रतिपुरुषं विशिष्टा रावः छा
या वर्णप्रभा च्छाया वर्णसमालक्षणा छाया च प्रतिबिम्बं क्रियादेहवाङ्मनो व्यापारस्तत्र धा
वनप्लवनादिकं रूपं व्यापारान्तरस्य स्थानकादिः कायिको व्यापारो गीताध्ययनादि वा
चिकोपि व्यापारः रागद्वेषलोभमयेर्ष्यादि मानसः अप्रादिशः अन्यकामविषयो रागा
नां भावानां ग्रहणार्थं रूपं चक्षुरिन्द्रियाणि च स्वरस्य छाया च प्रतिच्छाया च क्रियादयश्च
प्राकृतेषु तेषु रूपादिषु भावेषु तथान्येष्वपि भावेषु अनिमित्ततो कस्मात् निमित्तमन्तरेणैव या विकृ
तिः सा समासेनारिष्टमिति लक्षयेत् जानीयात् प्रकृतो भवाः प्राकृताः यथा वर्णादि प्र
कृतौ बलधृतिस्मरत्यादयः तदेवं रूपादिषु भावेषु क्रियादिविपर्यये ष्वन्येषु च प्राकृतेषु भा
वेषु प्रकृतिः स्वभावप्रवृत्तिः सा संक्षेपेण लक्षिता विस्तरतस्त्वनेकधा वर्णसमालं केषां
समन्यादि केशाग्रे रोमाणि च तत्केशरोमस्य निरस्यन्ते मस्तकरहितमप्यत्र मिव द
रूपेण सकालचोदित इति वचनविपरिणामेन संबंधः एवमुत्तरत्रापि एतद्रूपविकृतेरु
दाहरणं इंद्रियाणामधिष्ठानस्य विकृतिरिंद्रियविकृतिरित्याह यस्येत्यादि नेत्रशा
ह्मेन नेत्राधिष्ठानमिष्टं नेत्रं यस्य चलेलोचने अनिशायेन इतस्ततश्च परिभ्रमतः
तथा यस्य नेत्रे लम्बनिश्चले तथा यस्यानतिरंते शंनः प्रविष्टे तथा यस्य निर्गते बहिर्यातेन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ष्टे न निष्प्रयोजनं तस्मिन्नरिष्टविज्ञानेऽरिष्टज्ञानावगमो न चारिष्टेपि रिष्टविज्ञानं केषांचिद्र
वति कुतो हेतोरित्याह ॥ अनैपुणात् निपुणस्य भावो नैपुण्यं प्रायेणातन्नैपुणादित्यनित्यल
ननैपुणमनैपुणं तस्मान्मिथ्याज्ञानादित्यर्थः तदेवं प्रदर्श्यानरिष्टं तदाभं चारिष्टात्म
कं लिंगनिष्प्रेनस्तवयति यदस्य हृष्टे छाया ॥ नुकारिपनरसहसारोगइत्यादिलक्षणं तद्ज्ञान
मवषपव्याद्विधमेवाबाधिदोधुमसइतिज्ञाने तस्मिन्मिथ्याज्ञानं तस्मान्मिथ्याज्ञानाद्वंस्मुपल
ब्धिर्निष्प्रिनामभवति तस्मादुक्तमुक्तमरिष्टं नास्ति मरणमित्यादिमुनिरप्याह ॥ अरिष्ट
नास्ति मरणं हृष्टरिष्टं च जीवितं ॥ अरिष्टरिष्टविज्ञानं न चारिष्टमनैपुणादिति तथुत
लुपठति धुवंहिरिष्टे मरणं ब्राह्मणैस्तत्किला मलैः रसायनतपोदानतत्परैर्वा नि
वार्यते कृष्णात्रेयस्तु द्विधारिष्टमिच्छतीति तन्मतमाविःकुर्वन्नाह केचिदित्यादि के
चिदाचार्याः तद्रिष्टं द्विधा वदंति कथमित्याह स्थायीत्यादि तमेवार्थं तसे स्थायप्य
स्थायिभेदेन द्विप्रकारं तत्रास्थायि स्थायि रिष्टभेदं दर्शयन्नाह दोषाणामपीमा
द ॥ अपि शब्दः समुच्चये भिन्नक्रमार्थ रिष्टाभासमपि दोषाणां बाहुल्यात्समुद्भवेत
दोषाणां प्रशमे दोषवशान्नोत्पन्नं सरिष्टाभासः शान्तमेतत् सतु न मरणाय प्रभवतीति
स्थायितु रिष्टमवश्यं सर्वमेव मरणायजायते नत्वरिष्टं नास्ति मरणमित्यायुक्तमि
वाभातिरिष्टमंतरेणाप्यकालमृत्यो राजचोरागसुदकादाभर्दर्शनात ॥ अत्रस्व
त्सहेकालमृत्योरेवरिष्टपूर्वकत्वात् यथा च वक्ष्यति सर्वे नेकालचोदिताः तथा चका

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तो निरस्तः यस्मात्मर्माभिघातः सुहृच्छत्रुनिरूपयेतालक्ष्योपि प्राप्य सो बाधते पापवृद्धो रोगश्च
विमर्मोपघातश्च कालत्रयेण बाधते यत्नेनातो वाहरेल्लोपि प्रक्रान्ता उपक्रान्ता इति इति श्रीमद्गर्गात्म-
दत्तसुत० शारीरे षष्ठोध्यायः मर्मविभागादनन्तरं विकृतिविज्ञानीयं शारीरमा-
रभ्यते यतो मर्मविभागे मर्मशाहत्योपाप्तो मरणकारित्वान्मर्म मृत्युच्यते विकृतेरन-
न्तरमरणं च दृश्यते मरणं चरक्षाइत्यपमुच्यते अथात इत्यादि प्रकृतेरन्यथात्वस्वभा-
वप्रच्युतिर्विकृतिः तस्या विज्ञानमवबोधः स विद्यते यस्मिन्निति कायतेनोध्यायस्तं
शाम्नोरिति स्युः अध्यायानुवाकयोर्लुगित्यस्य लोपाल्लिकन्यानलुक् विकृतिविज्ञानी-
यं लं शारीरलक्षशारीरस्थानः शेषं पूर्ववत् विकृतिः पुनररिष्टमेव विरेयमतोवा
ह पुष्पमित्यादि यतः फलस्य भाविनो भविष्यतः पुष्पमग्रे भाविनायसः वर्षस्य भावि
नो जलदोदयस्तथा तेनैव दृष्टान्तेन मृत्योर्भविष्यतो रिष्टलिङ्गमसाधु वनिश्चितं ध्रुव
शाह्निर्देशादिदं दर्शयन्ति रिष्टच्छायानुकारितदाभासरूपं मन्त्येन लिङ्गमिति अत
एवाह अरिष्टमित्यादि न विद्यते पूर्वारिष्टं यस्य मरणस्य तदरिष्टं तथाविधं मरणं नास्ति
तथाह दृष्टरिष्टस्य जीवितस्य तदेवमतं जीवितमपि नास्ति यत्पुष्पादर्शनेऽपि वटवृ
त्वादेः फलसद्भावोपि दृश्यते ननु क्वचिदेवमभवेदिति नायं दोषोऽत्र चिन्त्यः ननु दृष्टरि
ष्टं जीवितं नास्तीत्यपुत्रमनव्यभिचारात्तथा च वक्ष्यति यत्नरसहसारोगादुर्बलं यदि
मुंचति संशयप्राप्तमात्रेयो जीवितं तस्य मन्यते इत्याह अरिष्टं इत्यादि यस्मात्यतनयदि

355

प्रतनोतिकरोति किंकुर्वन्नोजः पित्तं समीरयन्नुदीरयन् वृद्धिं नयन् ततस्तेज उद्धतं वृंहन् स पवनो स
न रूक्षादीन्यत्नेन करोति तमोनंतरं त्वक्यादिम एतं पुरुषमर्मविद्धमतं को हरति किंभूतं सिन्ना
स्नेहात्मकत्वात्तनुर्यस्य तेन तरथमर्थः मर्माभिघातेन रक्तवाहिनीनां सिराणां मुखविवृतो वेग
जायते न हि कश्चिज्जीवितनाधिष्ठानस्य स्रोतस्यपर्यायानि: स्तोतिपोवतस्य स्तपलज्ञपाच
जीवितनाशनः ॥ शाम्यथाभावात् ॥ अथ पुनाम मर्माभिघाते चिकित्सामाह वईपेदित्यादि म
मित्यभिहतेषु तिगात्रं शरीरमात्मैव छेदयेत् कुतस्संधिप्रदेशात् हि यस्मात् स
धिदेश स छेदनात् सिराः संकुचंति संवृतमुखा भवंति वईपेहि निवर्द्य छेदनादाविति
वोराहिकस्य शंतः सिरा संकोचात्कारणाद्रक्तं न हि स्रवति नत्ररक्तं निष्क्रति वहिरव
हति सततिजीवितं तिष्ठति । तद्वेतत्प्रकारेण मर्माभिघात सत्त्वान्मरणं तत्त्व मर्माभि
घातं सतताद्वतइदमाह सुविस्तत इत्यादि एतान्मर्माभिघातं सत्त्वान्याणीश्रियते नान्य
थाज्ञतमात्रादेतोस्मात्कारणात्तत्र दृष्टान्ता विशेषवणाद्धतोपि शरशांतै विद्धोप्य मर्मणि
कुशल्लेतल्लापि विद्धा जीवति ॥ अथ पुनर्वाल्लियतनापुरुषप्राणघातिन्यपि मर्माणि विद्धो
वैद्यगुणेनासमग्रस्यापस्य कलस्य मर्मणोभिघाताच्च कश्चिद्यदि विद्धो जीवेत्सोपि वैक
ल्यमस्तुते विकलतां प्राप्य जीवतीत्यर्थः वैद्यशाहप्राधान्यात् इत्यादि पादत्रयमुपल
क्षयति वैद्यगुणेन पादत्रयसंपन्नेत्यर्थः एतच्चैव मर्माभिघातस्य स्वल्पोपि प्राणप
हांकृत्स्मादित्यादि ॥ भग्नपादीनयत्रापि विशाहेन भल्लाकरसमकपिकच्छुशूकादीनां म
र्हणं तस्मात्कारणात्मर्मस्थानासारादीन्यत्नात्पर्येण वर्जयेत्परिहरेत् एवं मर्माभिघा

६१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जाकराः अग्निवायुसोमगुणबाहुल्यादग्निवायू हि विशेषेण मूलकरौ सोमस्य प्राणा
वलंबकश्चेति नेत्रानि प्राणहरत्वात्। तत्र कूर्चशिरांसि हस्तपादेषु चत्वारि गुल्फौ द्वौ मणि
बंधौ द्वौ विटपौ इदानीं मर्मणां यथायथं प्रमाणमभिधातुमाह तेषामित्यादि तेषां मर्म
णाम् ऊर्ध्वविटपादीनि द्वादश मर्माण्यंगुलमानानि अंगुलप्रमाणानि मणिबंधने मणि
बंधौ द्व्यंगुलप्रमाणेन गुल्फौ स्तनमूलेन द्व्यंगुलप्रमाणे प्रत्येकं एकस्य ग्रहः समुच्चयार्थो
द्वितीयः पादस्य त्र्यंगुलप्रमाणौ जानुकूर्परौ च अपांगेत्यादि अपांगवस्त्यादयस्त्रि
शदेकवर्जिता एकोनत्रिंशदात्मपाणितलोन्मानाः स्वहस्ततलपरिमाणाः शे
षाणि बहूनि चाशेषान्मर्माणि स्वेनांगुलपरिमाणेनार्द्धांगुलप्रमाणान्याहितेन अन्य
बांतेत्रकर्णानि तिलप्रमाणानि व्रीहिप्रमाणानि वा मर्माणीत्येतान्यभिमतानि परमतेन म
प्रतिषिद्धमनुमतमेवास्माभिरपि नयपरस्त एतद्देवमतमिति बोध्यं इदानीं यथा मर्मा
भिघातेन मरणं संपादयंति तथा दर्शयति चतुर्विधेत्यादि याः सिराश्चतुर्द्धा उक्ता मा
निर्द्दिष्टा वातपित्तकफरक्तवाहिन्यः सप्तशतसंख्याः कृत्स्नमशेषं शरीरं त
र्पयंति प्रीणयंति ता मर्माण्याश्रिता नागताः स्नायुस्नातादित्यादि यत एवं सर्वा
त्मकानि मर्माणि प्रायशस्ततः कारणान्मर्माभिघाते लक्षणं तल्लक्षणं तेषां मर्मणां ज्ञाने
तज्ज्ञाने तस्मान्मर्मज्ञानात्कारणालक्षणात् क्षतजस्य रक्तस्यातिप्रवृत्तिः तस्माज्ज्ञाने
जात्यर्थं प्रवृत्तेः कारणाद्धातुसंक्षयः परंपराक्रमायातो मांसादिधात्वपचयस्तस्मि
न्धातुक्षये सति याबद्धस्तेनावायुः सानीला अत्यर्थं दुःखदायिनी रुजः शूलविशेषान्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तादीनि मर्म्माणि ॥ एकोनविंशतिरस्थ्नोरिति तास्वेकैकस्यां षौ द्वौ ॥ अधिप एकः ॥ अपा
नापि एकः कृत्न एकस्मिन् गात्रे कानि चत्वारि विस्तरे कोष्ठे मानेकाएव एकोनविंशतिरिति
नविंशतिरिति त्रिषु नञ्समासः नञ् एकेन ऊना विंशतिरिति नञ्पतिपद विभागा
समासस्तत्र एकाद्विभक्ते कृत्स्यान्तादिनामतः प्रकृतिभावः एकस्यादुगागमः ऊना थेत्र
नञ् एकोनविंशतिरित्यर्थः त्र्यपस्त्रवस्थादयवस्त्रमादयः कालान्तरप्राणहराः मासंमासा
र्द्धं जीवन्ति येषु विद्धेष्विति मासंमासार्द्धं जीवितं येषु विद्धेषु मासो न प्राणान् हरन्ति मा
सार्द्धेन वेत्यर्थः संप्रत्येहे चोक्तं सोम्याग्नेयत्वात्तेषां पञ्चाग्नेतरकालस्य तिचयस्त्रिंशादिति
त्रेस्थ्यमितित्रयस्याद्येशः नअपसलभो द्वौ नलहृनि चत्वारि पार्श्वसंधी द्वौ कटीकतरुणे द्वे
सीमन्ताः पंच स्तनमूले द्वे इन्द्रवस्तयश्चत्वारो जघाममध्ययो द्वौ बाहुमध्ययोर्द्वाविति प्राणि चत्वा
रहस्तयोर्द्वे ॥ अपालापवहृहृती नितंबस्तनानन्तरा हिताः स्तन्यके द्वौ द्वाविति उत्क्षेपौ द्वौ स्थप
वनीहृस्वनानि त्रीणि विशल्यघ्नानि तत्र कारणं हेतुरित्याह तत्र द्वौ त्यादि हि यस्मात्तत्र अध
रास्थापायवायुर्निगच्छन्ति यान्मांसादीन् शोषयन् श्वासकासाभ्यां प्राणान् हरति ॥ अत्र
वहेतोशूलंनञ्प्रत्ययः निर्गमे नद्विहेतुना मांसादीनां शोषणं भवति ॥ फलाविस्यादि ॥ फल
दीनि विटपानानि स्तन्यके द्वौ द्वौ उर्व्यश्चतस्रः कुकुंदरे द्वौ द्वे जानुनी लोहिताक्षाणि चत्वा
र ॥ आणयश्चत्वारः कक्षाधरौ द्वौ कूर्चाश्चत्वारो हृदयार्द्धौ पादयोर्द्वौ कूर्चशिरो द्वौ इत्येच
त्वारि चत्वारिंशच्चेति चतुश्चत्वारिंशन्मर्म्माणि वैकल्यमंगस्य कुर्वन्ति कदाचिदभिघा
तात्तान्यपि चतुश्चत्वारिंशन्प्राणान् हरन्ति ॥ अष्टाविस्यादि ॥ अष्टौ कूर्चादयो मर्म्मविशेषाः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विद्धे न स्यान्मन्यादि मांसजे मर्मणि विद्धे सत्यनेन रक्तेन मस्तकस्रावो भवति मांसधावनोदके
न तुल्यस्तथा न तु रक्तो भवति न व हृत्नः पाण्डुत्वं पीतानामन्ये शरीरस्य इन्द्रियस्य च त्वगादिभिर्वि
व्याख्यानमनवबोधः मरणं चाशु प्रस्फुरणं च तदेवमिंद्रवत्स्मादिकं मांसजे मर्मव्यधे निरंत
रस्रावादिरूपैर्लिंगदर्शनानुमानेन मरणमनुमीयमानं बुधा वेद्यः प्रत्याख्याय चिकित्सा
व्यजयेन नियतानुबंधं कुचिन्मरणं स्यान्माभिचारादिति शिराय्यमर्मणि शिरा
विद्धे मज्जान्वितरक्तं विच्छिन्नो नमांसवधिरवसिरं तरसा याच्छ्रान घनो भवति रक्तेन तने
नात्यंतं पीडा भवतीति प्रतिपादयति इत्यादौ सर्वमर्मस्वपि सद्भावात् स्नायुजे नर्कादि
के मर्मणि विद्धे आयामाद्यो भवति आक्षेपकः आक्षेपकं भयपाशमंगानां गतिर
जाच तथा यानस्थानासनाशक्तिः पीतनुस्थानुभाषितुं वा स्नायुमर्मे वैकल्यं चांगानां गप
वा ... मरणं भवति धमनीभ्यो ... समादौ मर्मणि विद्धे सति विचेतनत्वं मूर्छितत्व
मनोरतंत्रवेन कीदृशं ... नामर्म च ... अस्थिमर्मणोर्वृ
त्तादिबंधेसमस्तकसंदं घनमजत्वं निरंतरं बहुत्वं भवति तदुपायेन ... अस्थिजः ... पा
तद्बाहुभिरतेकाजीवितनाशः संधिज इत्यादि संधिजे मर्मणि ... अधव ... स्तुप
कैरिवाकीर्णं भवति ... नाधिष्ठानं विद्धदेशात् उच्यते ... शान्तियत्तादिस्व
धिभिः किंशारूभिः ... भवति ... नस्मिन्मर्मव्यधे कुणित्वं खंजत्वं वा
भवति तथा बलचेष्टयोः क्षयः तथा ... संधिजो भव
ति इदानीमेषामेव मर्मणां व्यधजीवितनाशे कालं नयनयति नाभीत्यादि नाभिरुरा

द्वयो र्द्विबाह्वोः ऊर्व्वोर्मध्य इति तत्स्थानलक्षणं इति सक्थ्नोर्यथा बाह्वोरिति तानि द्वेशः
लोहिताक्षानीति लोहिताक्षनामानि चत्वारि ऊरुमूले लोहिताक्षं सक्थिवद्बाह्वोरिति
तल्लक्षणं तत्संख्यानि संधिमर्माण्याह संधावित्यादि संधौ विंशतिर्मर्माणि आव
र्त्तौ स्कंधे तत्पालक्षणं तथा वरि भ्रुवोर्निम्नौ आवर्त्ताविति मर्माणि बधो द्वे तल्लक्षणम
ल्लं बधो त्ययगुल्फवदिति कुकुंदरौ द्वौ जघनस्य बहिर्भागमर्मणी तावुकुंदराविति
सीमंतास्थानि पंच तल्लक्षणं कपालसंधयः पंच सीमंता इति कूर्परौ द्वौ बाह्वोः कू
र्परसाहसंधिलिंगः गुल्फौ द्वे मर्मणी तत्पालक्षणं जंघाचरणयोः संधौ गुल्फाविति
कृकाटौ द्वे तल्लक्षणं कृकाटिके शिरोग्रीवसंधी इति जानुनी द्वे तत्पालक्षणं जं
घोर्व्वोः संगमो जानुनीति अतिरधिपतिमर्मैकं तस्यैकं अंतरे मस्तकस्योर्द्ध्वं सिरा
दित्यादिना क्रमेणं समोत्तरं मर्मस्थानं मांसादिपरिकल्पनया कल्पितं मांसमर्मसिरा
दि ऽन्येषामाचार्याणां मतेन गुदो मांसमर्म तथमनी स्नायवीत्यादि तेषामेव मते
न कक्षाधरौ स्नायवाश्रितौ तन्तु शिराम्ययोर्विटपौ विधुरांख्यौ वस्नावाश्रितौ पूर्वमते
तन्तु वर्टिपौ सिराश्रितौ विधुरं च धमन्याश्रितं श्रृंगाटका॰नि चत्वारि अधिपतिसिराश्च वनु
रक्ताधारत्वेन तु धमनीस्थानि अपलंभोत्था अपांगौ चापतहमनीस्था मन्येराचार्ये
न स्मृतमपि तु स्नायवाश्रितमभिहितं इदानीं मांसादिजातानां मर्मणां वेधलक्षणमाह

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गुल्फांगुलिमध्यस्थं क्षिप्रमिति न चपादहृदयोर्द्विविधं हस्तहृदये च तत्क्षेपो द्वौ केषांचि
द्वंद्वयोस्तर्द्दमुक्तेपाविनि ॥ अंसस्कंधे ह स्कंधांसमीठं संबंधा र्थाचसाविनि वस्ति
रेकोमब्राशयइत्यादिनोक्तः एवं स्नावमर्माण्यत्र योविंशति गुदस्त्वादिः गुदः स्थू
प१ लांत्रबद्ध एकः ॥ अंसंसमांसे ह ॥ अपस्तंभावुरःपार्श्वे नाड्यावनिलवाहिनी इति वि
धुराख्ये ह मर्मणी ॥ अथ स्नान्कर्णयोर्निम्ने विधुरे इति श्रृंगाटकाख्यानि चत्वारि
जिह्वाक्षिनासिकेत्यादिनोक्तानि एवं धमनीस्थानि धमन्याश्रितानि नव मर्मा
ण्याशिराश्रयाणि मर्मविशेषाः सप्तत्रिंशत्तान्याह वृहत्यौ हृदे स्तनमूलजीव
भागइत्यादिनोक्ते मातृकाख्यानि कंठनाडीमुभयतो जिह्वानासागता इत्यादि
नोक्तानि ॥ अपांगे नीलाख्ये हृद्योरे मन्याख्ये ह कंठमुभयतः शिराहनुमाश्रिताः
चतस्र इत्यादिनोक्तानि कृकाधरौ द्वौ यथोक्तं कृकाटमध्ये कृकाधनित्यादि
फणौ द्वौ फणावुभयत इत्यादिना कर्णलक्षणोविस्रेप हृमुष्टकविस्रेपणयो अधिप
त्यकं सशंखः कदनीयमुच्छ्रं हृदयमेकमेव नस्यलक्षणं द्वारमामाशयस्य च
त्यादि नाभिरेकएवन लक्षणं देहामपकेत्यादि पार्श्वसंधी द्वौ पार्श्वान्तरनि
बद्धौ चेत्यादिनोक्तौ स्तनौ नाम रे इति स्तनौ नामा रधोहृ ॥ अपलापौ द्वावेव एएवंशो
रसावित्यादिनोक्तौ स्यपनी एकैव तल्लक्षणं भ्रुवोर्मध्य इति उर्ध्वमान स्वः उर्वी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भावानामनेकसंख्याश्रयत्वात् तथा च मांसपेशीशतान्यपि पंचशतसमुक्तानि स्त्रीणां तु विं
शत्यधिकानि एवमस्थ्यादीन्यप्यनेकान्युक्तानि तत्र मर्मणामसंख्येयत्वं प्राप्तमेव
च सप्तोत्तरं मर्मशतमिति निर्दिश्यते तत्राह बाहुल्येनेत्यादि सप्तोत्तरमेव मर्मणां शत
मित्युक्ता ततः किं तर्हि पूर्वोक्तेन न्यायेन बहूनि मर्माणि सप्तोत्तरमर्मशतमित्ययं तु
यो निर्देशः स बाहुल्येन मर्यादायेषां मर्मणां मर्मत्वेन शास्त्रे प्रसिद्धिस्तदुपदेश एव एवमपरेण
प्रकारेण मांसास्थ्यादीनां समागमो मर्मेति मर्मणां बाहुल्याद्बहुधा कल्पना भवति
कल्पनाशङ्कनेन न तन्निपादयति तदेवमनुवक्ष्यमाणसिद्धिमतो जीवितधामत्वेन मर्मा
णां कल्पनानिरूपणं प्राणेत्यादि प्रायशो न मर्मणामधिका कल्पना किं तर्हि प्राणा
यतनसामान्यात् जीवितस्याधिष्ठानमित्येवंलक्षणादेकत्वमेकत्वं मर्मणामतः ।
न पृथक्त्वमेवमेकैव मर्मकल्पना एवं संक्षेपविस्तरकौशले मर्मसु दर्शितं मांसादीनां
संख्यातानां यथास्वं शास्त्रे नियतानि मर्माणि संख्यया अभिधातुमाह मांसजानीत्या
दि जंघयोरिन्द्रबस्ती द्वे मर्मणी बाह्वोर्द्वे एवं तलहृदाख्यानि चत्वारि पादयोर्द्वे तलहृ
दये इति स्तनरोहिते द्वे प्रत्येकं स्तने एकैकमेवं दश मांसजानि शंखावित्यादि [illegible]
ष्टौ मर्माणि शंखौ द्वे मर्मणी कटीकतरुणे द्वे नितम्बौ द्वौ [illegible] पार्श्वयोः [illegible] फलके द्वे
इत्येवमष्टौ मर्माणि स्नावमर्माणि त्रयोविंशतिकथं आणयश्चत्वारि प्रत्येकं
सक्थिमध्ये एकैकं बाह्वोः प्रत्येकमेकैकं एवं चत्वारि आणयः कूर्चाख्यानि चत्वारि अं

५८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तदापन्नानि हि सर्वाणि मर्माणीत्यर्थः ॥ साधिको विंशो नरस्यापद्योऽस्तत्र हंति पुरुषं मा
रयतीत्यर्थः इति सप्तोत्तरं मर्मशतं तत्र स्थूललक्षणं सूक्ष्मलक्षणं यन्मर्मेति लक्षणं तद्दर्शयि
तुमाह विषममित्यादि यत्र यस्मिन् देहदेशे विषमं स्पंदनं रुजा च तन्मर्मेति चेदं देहदेशपी
डने सति रुजं विषमां भवति न च मर्मसु प्रत्यापि हि विषमस्पंदितं बधाने विषमं च विषमा
न विषमं नपुंसकं अनपुंसके नैकवचनं नपुंसकैकवचनं देवं मर्मलक्षणं हि धामनो
रूप्यमित्यर्थः सिराधमन्यादि कस्मात् विषमं स्पंदनं प्रायेण लक्षणं मांसादिष्वपि जानीया
त्तन्मर्मणः पीडनात्प्रायः पीडनात् लक्षणमिति संनिहितमर्माविदूरस्थलक्षणमुक्तं
यथा देहमसृग्ग्रिगुरुनागसमोहः शीतकामता स्वेदो मूर्छा वमथुः श्वासो मर्माविद्धस्य लक्ष
णमिति मरणकारित्वान्मर्म मरणसदृशं दुःखदायित्वाद्वा इदानीं मर्मणां स्वरूप
मेदं लक्षणं वक्तुकाम आह मांसास्थीत्यादि मांसादीनां संधानानां स्वजात्यपेक्षया यः स
मागमः संनिपातः समवायस्तन्मर्म इति तस्यैव नाम न देवं मांसपेशीसमागमो मांस
मर्मः अस्थ्नां समागमोऽस्थिमर्म स्नायूनां समागमः संनिपातः समवायस्तन्मर्मेति
तस्यैव नाम न देवं मांसपेशी स्नायुमर्म धमनीनां समागमो धमनीमर्म सिराणां समाग
मः सिरामर्म संधीनां समागमः संधिमर्म ननु मांसादीनां यः समागमः स एव मर्मेत्यु
च्यते तेन हेतुनाऽत्र सुतरां जीवितं स्थितं शालाकावत् स्थितानामनुपदि मांसादीनां यः समाग
मोऽसौ मर्मत्वमधीयते तदानीमनेकसंख्याकानि मर्माणि शरीरे संभवेरन् मांसपेश्यादि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऽनुकर्णमित्यादि ऽभ्रुवोः पुच्छान्तयोरुपरि ललाटावसाने ऽनुकर्णं कर्णसमीपं
खौ मर्मविशेषौ तौ विद्धौ पुरुषस्य सद्यो विनाशनौ भवतः केशान्त इत्यादि केशान्तसा
नेऽथ शंखयोरूर्द्ध्वमुपरि उत्क्षेपौ मर्मणी स्थपनी पुनर्मर्म भ्रुवोर्मध्ये त्रयो सप्तास्मिन्मर्म
त्रयं ह्यावुत्क्षेपावेका स्थपनी एवं पञ्च नो चेत् पुरुषानुद्धृते शल्ये जीवेत् कालान्तरेण पाके
त्पाकेन हेतुना स्वयं वा पतिते शल्ये सति ननु उद्धरणे हेतुना जीवेत् पुरुषः सद्य
इत्यादि उद्धृते तु शल्ये सद्य एव नरो नश्यति वायुकोपादिति भावः जिह्वेत्यादि
जिह्वा चाक्षिणी च नासिका च श्रोत्रे च त्वक् चेति तेषां च चतुष्टयं चत्वारि स्रोतां
सि तस्य संगमः सन्निपातस्तस्मिन् तालुनि चत्र जिह्वादीनां तर्पणादीनि स्रोतांसि सं
निपत्यावतिष्ठन्ते जिह्वादिस्रोतसां चत्वारि स्थानानि शृंगाटकाख्यानि तेषु मर्मसु
विद्धः पुरुषः सद्यस्त्यजति जीवितं विद्धमात्र एव प्राणैर्वियुज्यते कपालेत्यादि शिरः
संबन्धिनः पंच संधयः पंचानां कपालखण्डानां ये संश्लेषाः शिरसि प्रवर्तिष्ठन्ते तिर्य
गूर्द्ध्वगास्त एव सीमन्ताख्या मर्मविशेषास्तेषु सीमन्ताख्येषु विद्धेषु भ्रमेण त्रासोन्मादेन
नष्टा मनोनाशेन चित्तविभ्रमेण नश्यति ऽधानरं इत्यादि मस्तकस्याभ्यन्तरतोपः
रिष्यन्तस्तथैव प्रकृतत्वात् मस्तकस्यैवोपरि शिरासन्धसमागमः शिरासंधीनां सं
निपातो रोमावर्त्तलक्षणः सोऽधिपतिर्नाम मर्म विशेषो मर्मणामधिपो यथार्थनाम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हृदो॰ कंठेत्यादि कंठनाड्याः पार्श्वयोर्द्वयोः शिरा याश्चतस्रो धमन्यः एतास्विति तासु म
ध्ये द्वे शिरे नीले नाम द्वे मर्मणी मन्ये नाम द्वे मर्मणी एवमेते नेत्र कुष्ठिरिति शेषस्तासां व
धलद्दौ लक्षितं लक्ष्यध्वे स्वरप्रणाशाद्यो जायते स्वरप्रणाशः स्वरहानिरथवा वैकृ
तं नेत्रमकृतन्तात्स्वरस्यैव स्वरभावान्यथात्वमित्यर्थः रसाग्रहणं रसानवबोधः कंठ
मादि कंठनाड्या उभयपार्श्वयोः शिराः जिह्वागता नासिक्या नासागताः पृथगेक
कस्मिन्पार्श्वे चतस्रो द्वितीयेपार्श्वे चतस्रस्ता मातृकाह्वयाः मातृकासंज्ञाः नाविद्धा
सद्यो॰ मरणं घ्नंति एतानि मातृकाख्यानि शिरामर्माणि कृकाटिकेत्यादि शिरोग्री
वानयोः संधाने ये संधी पार्श्वद्वये कृकाटिकाख्ये ते द्वे मर्मणी तत्रास्मिन्मर्मद्व
यविद्धे चलमूर्धकं वा शिरो भवति ॰अधस्तादित्यादि ॰अधस्तात्कर्णयोः कर्णपृष्ठयोरधो
निप्रेनान्तने विधुराख्ये द्वे मर्मणी ते च संविद्धे सती श्रुतिं शब्दग्रहणं हरतः श्रुतिहारि
णौ फणावित्यादि फणौ नाम मर्मविशेषौ घ्राणमार्गमुभयतः पार्श्वयोः स्रोतपथा
नुगौ स्रोतोमार्गप्रतिबद्धौ ॰अंतर्गतौ लक्ष्यितौ गता अभ्यंतरे छिद्रितौ फणाविव संस्थाने रूपम
नयोः फणाविति नाम तेनैव धाकृं गंधविज्ञानं गंधोपलब्धिस्तद्धरतो लोगंधविज्ञानह
रिणौ नेत्रयोरित्यादि नेत्रयोर्द्वयोर्बाह्यतो नाम निम्नौ भ्रुवोः पुच्छांतयोरावस्थानयोरधः अ
पांगौ नाम मर्मविशेषौ प्रसिद्धावेव तत्रापरीति तेनैवाणयोगादृष्टिन्नाशे येन भ्रुवोः पुच्छा
नयोरुपरि निम्नावावर्तसंज्ञौ वेधनु॰अपांगावर्तौ ख्येषु चक्षुर्विद्धस्य नरस्यांध्यं भवति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

365

पाताच्चमत्वं ततो दौर्बल्यादनंतरं मरणं भवति पार्श्वांतरेत्यादि पार्श्वयोरंतरं मध्यं तत्र निब
द्धौ संश्लिष्टौ हौ पर्मविशेषौ पार्श्वसंधी इति निर्दिष्टौ तत्रैकस्मिन्पार्श्वांतरे एकः संधि
र्द्वितीयस्मिन्पार्श्वांतरे द्वितीयः संधिः कुक्षिस्थितौ कथं जघनस्य पार्श्वे जघनपार्श्वे जघन
पार्श्वयोर्मध्ये तिर्यगूर्ध्वं च एवमेकस्मिन्जघनपार्श्वमध्ये एकः संधिर्द्वितीयस्मिन् द्वितीयः स्थि
त इति भिन्नपार्श्वधास्तु सा रक्तपूरितकोष्ठस्य शरीरांतरसंभवोपशरीरान्तर्निमरणमित्य
र्थः स्तनेत्यादि स्तनयोर्मूले स्तनमूले तस्माज्जेवे भागस्योष्ठ उद्दिष्टौ पृष्ठवंशस्याश्रयेस्थिर
पृष्ठवंशस्यास्थाश्रयपार्श्वे शस्तिबंदोसिरे बृहत्याविति एतत्संज्ञे मर्मणी तत्र मर्मद्वयविद्धस्य
मरणं भवति रक्तसंहतयान्त्राण्यपा बृहतीत्यादि बाह्वोर्मूले बाहुमूले तत्र बाहुमूलनिष्ठितौ
मूलं हि प्रतिष्ठा वृक्षमूलवत् पृष्ठवंशस्य पार्श्वद्वयो बाहुमूलयोरभिमुखे तत्संबद्धे संश्लि
ष्टे के ते अंसयोः फलके अंसफलके इति निर्दिष्टाः छेदानुरोधात् फलकस्येव तनुपृथुत्वात्फलका
कारत्वाल्लिंगमस्यति अंसफलकाख्ये द्वे मर्मणी तयोर्विधाद्वाह्वोः स्वापशोषौ भवतः स्वा
प इव स्वापो पयासमस्पनिश्चेतनमंगं भवति तयोर्बाह्वोः अंसफलकाख्यौ विद्धे भवतः ग्री
वामित्यादि ग्रीवायाः उभयोः पार्श्वयोः स्थानेवनीहु अंसावुक्तौ कुक्षिस्थितौ ग्रीवाबाहुशि
रोंतरे ग्रीवायास्तस्या बाह्वोः शिरसश्च मध्ये तयोर्मध्यंतरालेऽस्थितौ कियत्यो जनेः स्कंधस्या ५२
दि अंसयोः पीठ इव पीठं प्रतिष्ठानं यत्रांसौ तिष्ठतः स्कंधपीठे च तत्र सबद्धः प्रया
जनं यपोस्तावे वंसौ विद्धे बाह्वोः क्रियाः आकुंचनप्रसारणादिकानां हरतस्तौ बाहुक्रिया

५६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्ती॰ अनिलवाहिनीवा तनवहे अत्र मर्मणि हृदये विद्धे कृत्ते न पूर्णः कोष्ठः॰ स्वासकासाभ्यां विपद्यते
इदानीं पृष्ठमर्माण्याह पृष्ठवंशमित्यादि पृष्ठवंशस्योभयतः॰ अनयोर्मध्ये तालेनयोरेव च पृष्ठे
रसार्थं कार्यं ते नयोः परिमाणयोः स्पर्शाद्वधः॰ अथ कालान्तरप्राणहरं मर्मणि विद्धान्ते न
वार्विद्धयोः रक्तेन कोष्ठपूर्णेन पूर्वतापाने न गते नलोहितेन न शोथवान् पूर्वनो
नयानां नाबद्धीवतेन न तु रक्तकोष्ठपूर्णमात्रादेव म्रियत इति भावः॰ पार्श्वयोरित्यादि
इदानीं पृष्ठवंशस्य पार्श्वयोः स्पर्शनप्रानिःश्वासौ लोहितपूर्णे प्रतिहिते वंशपार्श्वे
वंशसमन्वितं जानु उपरि पृष्ठवंशस्य नीकटीकतरुणे॰ एनत्संज्ञे मर्मणि स्थाने
उक्ते नतन्नमिन्नमर्महृदयविद्धे रक्तं सयाप्यादुर्भिगनकांक्षितः सन्निवेशविनश्यति पृ
ष्ठवंशमित्यादि पृष्ठवंशस्योभयतः कटिकापार्श्वयोर्यो संधीजघनस्य बहिर्भागे नानस्यो कुकुं
दरे नितम्बाकारे संधिमर्माणी तद्यथा नायाधादयः शरीरे चेष्टाहानिः नमनाकुंच
नप्रसारणाद्वधः कायाधामकसंघचानइत्यर्थः स्पर्शज्ञाने स्पर्शाभावितिर्भवति पृ
ष्ठवंशमुभयतइत्युभयवतनसारस्मादिनाहिनीया पार्श्वत्वात् पार्श्वानरेवार्श्वमध्ये
निवद्धोलग्नौ पार्श्वान्तरनिबद्धौ येन तथाश्रोणिकर्णयोरूर्ध्वपृष्ठवंशस्य न्यस्ताद्दीनां य
थाशायाः साधारणवस्तु आद्दयः तेषां छादनौ नितम्बौ नितम्बसंज्ञौ मर्मविशेषौ तौ च त
रुणास्थिगौ वर्णस्य संज्ञे॰ अधःस्थि स्थितावित्यर्थः॰ अत्रास्मिन्नमर्महृदयविद्धे स्मधः
कायशोषो भवति तथा दौर्बल्यमुत्कृत्तनादधः शरीर एव दौर्बल्यमल्पबलत्वं स्वमा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नेस्मरीवत्तोन् ॥ अथस्पृष्टेर्वा हस्तणेर्थपावत्तलः क्षिप्रनेनं तलं वर्जयित्वा नवात्पद्मरीवलेउभय
तः उभयकर्म्मत्तनस्य विद्धस्तलहृदयो सासृतलनलि हंति ॥ तस्मिन्नबस्त्रावेकपार्श्वेनाविद्धस्तिमूत्र
स्त्रावी तलः स्त्रावस्त्रचयन्नतः सार्द्धत्रेणपकार्तोरोहतिनान्यथा देहेत्यादि ॥ आमं च पक्कं च ॥ आ
मपक्कं स्थानंच स्थानं आमपक्कयोः स्थानं आमपक्कस्थानं देहस्य आमपक्कस्थानं च देहामप
क्कस्थानं तेन तेषां मध्ये नेत्रे कृत्वा देहस्य देहमध्यप्रदेशेन यो मया रामपक्काशयोर्मध्यं त
स्मिन्नाभिर्नाम मर्म्म सद्यः प्राणहरं तलं सकलशरीरगानां मार्गस्य आधारः स्नायुहिह सद्योघ्नः
नाभि प्रान्नसपुस्त्वंचि तं द्वारमित्यादि ॥ हृदयं नाम मर्म्म तदृप्पिसद्योघ्नं तच्चामाशयस्य
द्वारं मुखं तेन हि द्वारेण तत्पानमामाशयं प्रविशति ॥ तच्च सत्वादीनां स्तनरजस्तमसा
नयाधिष्ठानस्थो द्विपात्तलं त्वाथर्पं चकस्तनयोन्मनमध्ये नेत्रो धामस्थानं तच्च स्तनतारः कोष्ठ
मध्यगं स्तनो चउरस्थकोष्ठश्च स्तनतारः कोष्ठं तस्य मध्यं नेत्रे गच्छति निष्ठ्यन्निवधाति कोष्ठव
त्तमास्तनयोस्थम ध्योष्ठ्य नामित्यर्थः ॥ स्तनेत्यादि ॥ स्तनरोहितं च मूलं च यक्कतन्नाम स्तनरो
वेने स्तनरोहितं मूलं ॥ आरभ्यस्तनयोर्स्तनरोहितं मूलाख्यं द्वे मर्म्मणी वदन् ॥ कफ्वदेशाल
नयोः कमादिनिबन्धमाणामिहापि संबंधाते तेन स्तनयोरर्द्धद्व्यंगुले स्तनरोहितं स्तनयोर
धोद्व्यंगुले तयोः स्तनरोहितं स्तनमूलाख्ययोर्मर्म्मणोर्विद्धयोः पुरुषस्य कफपूर्णकोष्ठः
कमाद्यथाक्रमं तस्मात् ॥ तेन स्तनरोहिते विद्धस्तनस्य सृजा पूर्णकोष्ठान रोतस्मात् ॥ स्तनमू
ले विद्धे कफेन पूर्णकोष्ठान तस्मात् ॥ अपस्त्यादि ॥ उरसः पार्श्वान्तद्वेनाड्यो अपस्तम्भाख्ये मर्म्म

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न्तामध्यपार्श्वयोरप्यपि ऊर्वी मूले वंक्षणसंधेरधस्तान्मेढ्रादिनाशु नाम मर्म तद्विद्धं वर्द्धं हंस स
कक्षयोरध्यधोप्यपि मुष्कवंक्षणयोर्मध्ये विटपं नाम मर्म तद्विद्धं पुंस्त्वं घटनाकरं निरवद्यनाव
रं इत्येवमनेन प्रकारेण सक्थ्नोर्द्वयोः प्रत्येकमेकादशमर्माणि भवंति तथा बाह्वोः ते वप्रक
रणा बाहुमूले हृदादीत्येकादशमर्माणि भवंति अथ किंचित्तत्र मर्मविशेषमाह मणिबंध
इति अत्र बाहुमर्मसु गुल्फे तनुत्वमणिबंधः संज्ञामात्रभेदो जानुत्वेन कूर्परं तथा मणिबंध
कूर्परादयो बाहुमर्माण्येव विज्ञेयाः केचिदयं पाण्यंगुलिकुक्षिं तु विटपमादि कक्षाधरस्य
कक्षायां तथा मध्ये विटपेन च तुल्यं कक्षाधरः संज्ञेयं मर्म तत्र विद्धे सति कुणित्वं जायते बाहु
वाण्यंगुलिकुब्जता इति वाग्भटो हि मर्माणि चतुश्चत्वारिंशत्संज्ञान्यनतरा धोकव्यपति स्थूल
त्वेत्यादि स्थूलांत्र सूक्ष्मांत्र भेदात् द्विधा अत्र स्थूलांत्रबद्धो गुदो नाम मर्मविशेषः स
विद्धो नो वातवर्चसोर्विमर्गो नितिविद्धोन्तवमनः बाहुलत्वात् कठिनं विलुपति सगुदः स्थ
लान्त्रसंलग्नो बहुभिः सद्यः प्राणहरमनुष्यकं तत्र कोशेन इव गुदस्यान्तः अत्र पुंस्त्वं चितं न च द्वि
कीर्तितं विद्धं मर्मेति अधुना बस्तिलक्षणमाह मूत्रस्याशयमाधारं मूत्राशयापरत्र मूत्रनिष्ठान
सधनुर्वक्र अल्पाय वक्रकुटिलः तेनाशस्त संस्थानमुक्तं सच बस्तिर्नाम मर्मविशेषः अल्पत्वं मा
संच अल्पमांसे अल्पास्त्रमांसे न छिन्ति अन्यथा विद्धस्यपतत इति टः तत्र स्थानं बहुमांस
प्रदेशासंस्थ इत्यर्थः तथैकमध्योबदनं यस्या सा वेकाधो बदनः कटामध्य इति स्थानगति
र्देशः कटामध्यप्रदेशस्य साव बस्तिष्टति सविद्धः सद्यः स्वन्द्रलगत्वेवा सत्त्वाणान्निहंति स्त

अथ तेन विशिष्टहेतुत्वानुरागात् विशिष्टकर्मोत्पत्तिं दर्शयितुमाह मध्यइत्यादि पादतल
स्य मध्यप्रदेशे मध्यमांगुलिमभितो मध्यमांगुलेः पादसंबंधिन्याः सामनुरूप्येन यस्या
दतलं पृष्ठं तत्र तलहृन्नाम मर्म ॰ आहुः पूर्वाचार्या इति शेषः मध्यमांगुलिमित्यभितः
शब्दप्रयोगे द्वितीया तत्र तस्मिन्विद्धस्याहतस्य वच नाम मरणं भवति कया रुजया वे
दनया ॰ अंगुष्ठस्यांगुलिस्तनयोर्मध्ये ॰ अंगुष्ठांगुलिः मध्यस्थितं क्षिप्रं नाम मर्म
र्म तत्र विद्धमाक्षेपमारणं मारक्षेपकारणेन वातव्याधिना मारयति तस्योर्ध्वं तस्य हि
सार्धस्य मर्मण उपरिष्टाद्व्यंगुले ह्यंगुलं विमुच्य कूर्चो नाम मर्म तत्र विद्धे पादस्य भ्र
मणं वेपनं च करोति गुल्फसंधेरधः कूर्चशिरो नाम तत्र विद्धे शोफरुजाकरं जंघाच
रणयोः संधौ गुल्फो नाम मर्म तत्र विद्धे रुक्स्तंभ च मांद्यं च नाम करोति जंघान्तरे जंघा
मध्ये पार्ष्णिप्रत्यभिमुखं द्वादशभिरंगुलैः इंद्रवस्तिनाम मर्म तत्र विद्धे रक्तक्षयान्मारयति तान्य
न्ता तस्मादुत्सन्नरक्तत्वेन पतनेन स्यादिति प्रतिपादनार्थं रक्तक्षयादिति हेतुरुपन्यस्तः
एवमेवान्यत्राप्यन्यत्राप्यनुसर्तव्यः तेन पत्रवद्धेतुकं मारणादिकं कर्म कथितं तत्र चिकि
त्सायां यतितव्यमिति जंघोर्वोः संगमे संधौ जानु नाम मर्म तत्र जानुनि विद्धे पुरुषखास्ति
पतत एव ॰ अथ जीवति तदास्य जीवतः पुंसः खंजता स्यादित्यपर्यायेण मरणं पुरुषस्य
ति जानुनोर्जानुसंधेस्त्र्यंगुलादूर्ध्वमाणिर्नाम मर्म तत्र विद्धे श्वयथुवृद्धिः स्तब्धसक्थिता च ऊर्वी नाम
मर्म ऊरुमध्ये तत्र विद्धे शोणितक्षयात् सक्थिशोषः ऊरुकार्श्यं सक्थिशोषो वास्त संनयास्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वर्णान्नि मैत्री सर्वसत्वानामात्मभावनं न केवलं पूर्वोक्तं स्वस्वहस्तादिषु वर्द्धमानं शाने
रित्यंतमस्यर्थनियतत्वात् शालनंतं शरीरस्यायुर्वृद्ध्यादिहेतुर्यथावदयं ज्ञानशीलादिना लोमेऽत्र
वसानः पुण्यायुर्वृद्धिकृत् दानादयश्च यथासंभवं केचित्पुण्यकृतः केचिदायुर्वृद्धिकृ
तः केचिदुभयकृतश्च ॥ अत्र महायुरुपलक्षणं तत्तल्लक्षणं गुणसज्ज्ञायात्र शाति
पादयता शारीरकृता ॥ अध्यायावसाने ग्रंथसमाप्तिनिर्देशः कृत इति ॥ इति श्रीमद्
गांकदत्त० शारीरे तृतीयोऽध्यायः ॥ ३ ॥ अंगविभागादनंतरं मर्मविभाग व्याख्येयः शा
रीरः प्रक्रम्यते मर्मणां मांसास्थिनन्वाद्यनेकमर्माण्येवं गत्वा गम्यमांसास्थिनाद्यनल
त्रेव व्याख्यातुं युक्तानि बहुवक्तव्यत्वात्स्वयमेवोच्यते तस्मात्प्रत्येकाध्यायस्यारंभो युक्त
इत्याह ॥ अथात इत्यादि प्रत्येकमर्मनिर्देशं इति मर्मविभजनं विभागो मर्म
णां विभागो मर्मविभागः सोऽस्मिन्नध्याये स्तीति मर्मविभागो ॥ सप्तोत्तरमित्यादि ॥ व
व शारीरस्थानसंनिवेशत्वाच्च शारीरः प्रत्येकवन् सुखमनहलाद्यर्थं चपूर्वम
र्मणां संख्यामनुमाह सप्तोत्तरमित्यादि सप्तोत्तरशतमधिकानि यस्मिन् शतेन
तद्वं तेषां मर्मणां मध्यमपरकुन्येकं कृत्वा एकैकस्मिन् हृदयो बाहुवोश्च हृदयोरकादशादि
त्यादेवं चतुश्चत्वारिंशत्मर्माणि शाखासु विद्यात् कोष्ठे जठरे त्रीणि मर्माणि
उरसि द्वादशनवपृष्ठमानि पृष्ठे चतुर्दशजत्रोरूर्ध्वं जत्रुणः उपरि षट्त्रिंशत्तथा
सप्तएवं सप्तत्रिंशदिसर्थः जत्रोरितिपुस्त्वमत्रचिंत्यमयवानिमानमशासन
मित्यत्र तुकृतः इदानीमेषां मर्मणामापादनलानामलक्षणावहिर्विभेदाससमा

त्रिकमष्टादशोत्सेधं पृष्ठं द्वादश कं कल्ल नालं रंध्रं अंगुलस्य नवर्धनं चतुर्विंशत्यंगुलविशालं द्वादशोत्सेधमुरोंगुलं हृदयमष्ट
कोस्तनौ चकक्षे च अष्टाविंशो वाद्वाड्शकौ प्रवाहौ पंचदशो प्रवाली द्वंशांगुलौ पाणी तत्रापि पंचांगुला मध्यमांगुलि
५२ स्तत्पर्धांगुलहीने प्रदेशिन्यनामिके सार्धंगुलौ कनीनिकांगुष्ठौ चतुरुत्सेधा द्वाविंशत्यारणाह्यो ग्रीवा द्वादशोत्सेधं १

पं चतुर्विंशत्परिणाहमाननं पंचांगुलमास्यं चतुरंगुलं पृथक्चिबुकोष्ठनासा द्वयं पुनर
कर्णौ ललाटं शंखे गण्डाश्चतुरंगुलाः त्रिभागाङ्गुलविस्तारो नासापुटो द्व्यंगुलायतमं
गुष्ठोदरविस्तरं नेत्रं नेत्रत्रिभागस्तारा तत्तारात्रिभागः कृष्णः कृष्णान्तर्नवमांशस्तारा मस्त्रदल
मात्रा दृष्टिः षडंगुलोत्सेधद्वात्रिंशत्परिणाहं शिर इति सर्वं पुनः शरीरमंगुलानि च
तुराशीतिरायामविस्तारसममुच्यते तत्र यथोक्तं परिमाणमिष्टं तथा स्तानानुलिप्त
मापादानुपूर्व्या शुभमुष्करमनिष्टं हीनमधिकं वा यथोक्तं प्रमाणादि इत्यादि प्रकृती
नां तिसृणां कथं सुखदुःखानुभवः स्यादित्याह अनुत्सेकमित्यादि अनुत्सेकं क
त्वाभिमानं हित्वा सत्त्ववान् पुरुषः सुखं सेवते अनुभवति तथा दैन्यं कार्पण्यं हित्वा
स दुःखं सेवते सत्त्वप्रमाणं सत्त्वमिति नितुष्टितिरेकेपिन्नत्कर्मा राजसः पुनः पुरुषः सत्त्व
मानाहमेवामुना प्रकृष्टेनान्येन साधारणेन सुखेन सुखीत्येवं सुखं सेवते अहंका
राक्रान्तमानसो हमेवदं दुःखं सोढुं शक्त इत्येवं रजेमानेरा दुःखमनुभवति तामसः
पुनः पुरुषो नैव सुखं सेवते न दुःखमत्यन्तमूढत्वात्तामसो सुखेन सुखी न च दुःखेन दुः
खी प्राज्ञन्नीयमदायनपुरुषः एवं द्वंद्वप्रकृतिरपि सुखं न सेवते नापि दुःखं तस्य
मूढत्वात्समत्वादि प्रकृतिस्त्वनुत्सेकेऽहीनः ससुखदुःखं सेवते इदानीं प्रधा
नफलदायि यत्प्रधानं प्रशस्तलक्षणं वपुषस्तद्दर्शयितुमाह दानेत्यादि दानं धना
दित्यागः तच्छीलयस्यास्य स दानशील: शीलकामीत्यादिना ण दयाहीनेषाभ्यु

371

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हास्यिकजञ्च सुक्रसाराः ते स्त्रीप्रियोपभोगाः बलवंतः सुखारोग्यवित्तैश्वर्यसंमानापत्यभा
जनश्च भवंति स्मृतिमंतो भक्तिमंतः कृतज्ञाः प्राज्ञाः शुचयो महोत्साहा दक्षा धीराः सम
रविक्रांतयोधिनस्त्यक्तविषादाः सुव्यवस्थितगतिगंभीरबुद्धिचेष्टाः कल्याणाभिनिवेशनश्च
सत्वसारास्तेषां स्वलक्षणैरेव गुणा व्याख्याताना सर्वैः सारैरुपेताः पुरुषा भवंत्यतिबला
परंगौरवयुक्ताः क्लेशसहाः सर्वारंभेष्वात्मनि जातप्रत्ययाः कल्याणाभिनिवेशिनः स्थि
रसमाहितशरीराः सुसमाहितगतयः सानुनादगंभीरमहास्वराः सुखैश्वर्यवित्तोप
भोगसंमानभाजो मंदजरसो मंदविकाराः प्रायस्तुल्यगुणविस्तीर्णापत्याश्चिरजीवि
नश्च भवंति अतो विपरीतास्त्वसाराः संनहे च प्रमाणमप्युक्तं यथास्वांगुलैः पादांगु
ष्ठप्रदेशिन्यौ द्व्यंगुलायते तिस्रोन्याः क्रमेणोत्तरोत्तरं पंचभागहीनास्तन्नखहीना
वा चतुरंगुलायतना पृथक् प्रपदपादतलपार्ष्णयः वरं च चतुरंगुलविस्तृताश्चतुर्द
शैवमायामेदपादश्चतुर्दशेन परिणाहेन तथा गुल्फजंघामध्ये च चतुरंगुलोत्सेध
त्वादोष्टादशायामा जंघा पादाद्रूर्ध्वं परिणाहेन चतुरंगुलं जानु षोडशपरिणाहं अ गुल
ष्टत्रिंशत्परिणाहे अष्टादशायामावूरू षोडशौ बाहुशतायामौ परिणाहेन वाष्टांगुलो मेढ्र
षडंगुलयामाद्यं पंचपरिणाहः बाहुः शविस्तारा कटी पंचाशत्परिणाहा दशांगु
लं वास्ति सिरो द्वादशांगुलमुदरं चतुर्विंशतिविस्तारं द्वादशायामे पार्श्वे द्वादशोत्से

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

५२

स्थिरः कर्म्मसु स्थिरबुद्धिः मुनिनाचलसत्वमुक्तं तद्यथा त्वग्रक्तमांसमेदोस्थिम
ज्जशुक्रसत्वानि तत्र स्निग्धश्लक्ष्णमृदुप्रसन्नसूक्ष्माल्पगंभीरसुकुमारलोमसप्रभा
वत्वक्साराणां सा सारता सुखसौभाग्यैश्वर्योपभोगबुद्धिविद्यारोग्यप्रहर्षणा
न्यायुष्यानि च समाचष्टे नालुरोमदंतकर्णनासाक्षिजिह्वास्वोष्ठपाणिपादतलन
खललाटमेहनं स्निग्धरक्तंश्रीमद्भ्राजिष्णु सुखम्मिरक्तसाराणां सा सारता सु
खमुदग्रतां मेधात्वमनस्वित्वं सौकुमार्यमनतिबलमक्लेशसहिष्णुतां मां चाचष्टे
शंखललाटकृकाटिकाक्षिगंडहनुग्रीवास्कंधोदरकुक्षावक्षःपाणिपादसंधयः
स्थिरगुरुशुभमांसोपचितं मांससाराणां सा सारता क्षमांधृतिमलौल्यं वित्तं विद्यां सु
खमार्जवमारोग्यं बलमायुश्च दीर्घमाचष्टे वर्णस्वरनेत्रकेशलोमनखदं
तौष्ठमूत्रपुरीषेषु विशेषेण स्नेहो मेदःसाराणां सा सारता वित्तैश्वर्यसुखोप
भोगप्रदानान्यार्जवं सुकुमारोपचारतां चाचष्टे पार्ष्णिगुल्फजान्वरत्निजत्रु
चिबुकशिरःपर्वस्थूलास्थिनखदंताश्चास्थिसाराः ते महोत्साहाः क्रियावंतः
क्लेशसहाः स्थिरशरीरा भवंत्यायुष्मंतश्च तनुत्वगाबलवंतश्च स्निग्धवर्णस्वराः
सं५२ स्थूलदीर्घवृत्तसंधयो मज्जसारास्ते दीर्घायुषो बलवंतः श्रुतविज्ञानवित्तापत्यसन्मा
नभाजनाश्च भवंति सौम्याः सौम्यप्रेक्षणाः क्षीरपूर्णलोचना इव प्रहर्षबहुलाः
स्निग्धवृत्तसारसमसंहतशिखरदशनाः प्रसन्नस्निग्धवर्णस्वरा भ्राजिष्णवो म

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दैर्घ्यं बाल्ययौवनादीनां वयोवस्थाविशेषाणां तत एवं नन्वहि देवानीरजायस्य वपुरस्य
कुत्रहि दिनीरजं वपुः सुमं ॥आयामेत्यादि ॥आयामो दैर्घ्यं ज्ञानं लौकिको व्यवहारलेपः वि
ज्ञानं विज्ञानं ज्ञानं शास्त्रज्ञानं शास्त्राभ्यासादि सुखसुखं परमार्थावबोधपर्यन्तं नैर्थद
पुः प्राप्तेर्दैर्घ्यमानं दृष्ट्वा मात्र मुक्त्वा नखसहस्रादिनखसुम इत्यादि इति एवं प्रकारेण यथोक्तेन
सर्वगुणेहवनेयुक्ते शारीरे शरदां समानां शतमायुर्जीवितं तथैश्वर्यं च पूर्णशुभाय के
चिद्रूपाज्ञानं तत्तत्पाप्मने देहे सर्वप्राणिषु एनां व्यवस्थितानां विज्ञानानुबोधिनः एवं वपुषः
प्रमाणलक्षणमुक्त्वा बलप्रमाणं ज्ञानार्थमाह नवनक्षत्रादीन्यादि नवनक्षत्रादीनि एतानि
नानि देहिनां सारबलानि पञ्चानन्तरं सेष्टान्युक्तानि ते नव नव रसमांसमेदोऽस्थिमज्जाशुक्रबला
नीतिबोध्य मेवं वर्षशतमायुःप्रमाणं मस्मिन्काले संति वपुनस्कर्मविशेषाद्न्यूनाधिक
वर्षशतजीविनो मनुष्या इत्यादि बोध्यम्: प्रकृतिविशेषेरायुः प्रमाणमुपलभ्य वपरिव्र
धाविभज्येदिति किमर्थं ज्ञानं एतेषु युक्तानि बलप्रमाणज्ञानार्थं तथा वक्रदेहमात्रदर्शिना
देवहिमग्नमुहुरेतन ॥अल्पमुपचयेन महाशरीरत्वाद्बलवानयं कृशत्वादल्पसारत्वा
त् ॥अल्पशरीरत्वाच्चाल्पबल इति नचैवमपथ्यमपथ्यं तथाह एगजसिंहेह सर्वैः सारै
रुपेतः परमं सायेन गौरवं संयुतः स्यात् सर्वत्यादि सर्वारंभेषु रोगचिकीर्षितं का
र्येषु ग्रामान्स्यात् कृतादिद्रव्यदत्वयन इति ॥आकाशादेह... लघ्वासहिष्णुः स
हेन शीलानत एवं शारीरमानसैर्दुःखैर्नाभिभूयत इति पाचनतयानुमतिः सुधीस्तथा
॥अस्मात्कर्तव्यान्॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३७५

छत्रवत्समुन्नतं । तन्विमित्यादि । ननवोरःक्षोरूजंघाननानखायस्तनदेवंमूर्त्तिकालिपा
दं प्रतिष्ठितं प्रशस्तं भवति । तथाच्छिरः प्रशस्तं तथाश्रवणाभ्रुवंतत्त्वंसस्त्लं सुमना
ज्ञाघ्रमांसलं सुपचितमांसं । तथाशीर्षाश्छायातात्मः छिद्रापरस्परं संश्लिष्टाः अंगुलयो
यस्यतद्देवं नदामहृद्धिल्लीलं गूढशिरं । तथानृठोदृश्यते वंशोयस्यतद्देवंविधंपृष्ठं
प्रशस्तं तथावृहद्धिल्लीलं संपद्यानिर्मूढाः अंगनर्गीताः दृढाः मृदुटनमर्मिलाः धीराः
कृपणाः स्वराः प्राहुः अनुनादीघंटादिवदनुरणनन्यायेन वर्त्तिः स्निग्धः स्नेहास्थिरा
प्रभाकांतिर्यस्यप्रशस्तं एवंप्रशस्तं सत्वंस्वभावजातं स्वभावजं अनाहार्यंप्राकृतं मवाद्य
हेतुजंनमद्यादिहेतुजंस्थिरमहार्यमतएव विपत्स्वप्यविकारि अन्योपि अपिशब्दा
त्कि मुतसंपन्नस्तत्स्यादेवास्तिद्वन्सत्वं स्वभावजमहार्यंच उत्तरोत्तरमित्यादि क्षेत्रमिव
क्षेत्रं शोभनं क्षेत्रं सुक्षेत्रं वपुः तत्रशरीरस्यपथावन्यप्रशस्तप्रमाणलक्षणं सर्व्वंह
लक्षणं प्रशस्तम् इमित्यादिनेथोक्तं तदवयवानां ललाटादीनांयथावत्प्रशस्तगुणल
क्षणं ललाटमुन्नतमित्यादि । तथोक्तं तथाप्रशस्तसत्वलक्षणस्वभावजंस्थि
रमित्यादि । तथोक्तं उत्तरोत्तरं सुक्षेत्रं यस्मिन्वपुषि तदुत्तरोत्तरंसुक्षेत्रप्रशस्तलक्ष
णं भर्मिकं वपुः शुभमित्यत्रयोज्यं एतदुक्तंभवति यथोक्तप्रमाणलक्षणसुक्षेत्रंवपुःशुभं
तत्तोपिवयोक्तललाटाद्यवयवं सुक्षेत्रंवपुः शुभतरं ततोपियथोक्तसत्वलक्षणगु
णं सुक्षेत्रंवपुः शुभतममित्युत्तरोत्तरंसुक्षेत्रंशब्दस्यार्थः तथागर्भादिनीरजंगर्भा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सुखायुषोः पात्रं केशाः सुस्निग्धादिगुणयुक्ताः स्त्रीणां स्युः अनुक्तमर्थाद्विगम्यते तथा चैवं गुणविशिष्टैः केशैः युक्तं वपुः ३

सुखायुषोर्न पात्रं ॥ अस्निग्धादिदोषदुष्टं वपुः योज्यं दीर्घादिभिः लक्षणानि दीर्घं वपुः स्वार्द्धह
स्वत्वयुक्तं न तत् सुखायुषोः पात्रं ॥ अतिह्रस्वादिदोषदुष्टं वपोज्यं एवमीषद्दीर्घादियुक्तं
वपुः ह्रस्वत्वं च सार्द्धं तत्सुखायुषोः पात्रं भवति एवं ललाटादिदोषविचित्रं ललाट
मुन्नतं मृद्वर्धचंद्रतनत्वात् स्निग्धं वर्तुलं लोमयस्मिंस्तदेव तथा ॥ अर्द्धंदुसन्निभमर्द्धचंद्राका
रं कर्णौ नीचावुन्नतौ ॥ अधानी चावृद्धौ उर्ध्वमुन्नतौ बधानान्महान्तौ विस्तीर्णौ चलयो
स्निग्धौ च तौ मांसलौ च स्निग्धौ मांसलौ स्निग्धौरस्था मांसलावुपचितमांसौ ने
त्रे स्वक्षे सुरोमिनासिते वर्णौ पयालं एवं कृष्णो भागः कृष्ण एव शुक्लः शुक्ल एव
च नवर्णौ नरख्याभिरूप्या तथा सुवद्ध सुसंधि नीघने संहतेनपक्ष्मलौ याचालत एवं
नासिका घ्राणमुन्नतं नमस्त्यपस्याः सेवमहानुच्चासोयस्याः सेव तथा पीना ॥ अधि
पिला अनुरवक्रा तथा समा ॥ अनिम्नालला उष्ठौ रक्तौ तथानुद्धौ वहिरनिर्ग
तौ हनुमहान्तौ नाल्पलौ नौ नत्वतौ हनूशाहू स्त्रीत्व मतविंतं ॥ आस्यं मुखं महत्
दन्ताः जिह्वाः घनाः अविरलाः श्लक्ष्णाः कोमलस्पर्शाः स्निग्धाः स्निग्धकान्तयः
सिताः शुक्लाः समाश्च भवन्त्यः जिह्वा रसनारक्ता तथा ॥ आयता दीर्घा तथातन्वी
तथा स्थूला चिबुकं मांसलं महच्च ग्रीवा शिरोधरा ह्रस्वा ॥ अदीर्घा घनानि विडन्नाव
र्तुला स्कंधावंसावुन्नतौ च पीवरौ च तौ उदरमित्यादि दक्षिणावर्त्तयस्याः नाभेः
स दक्षिणावर्त्ता गूढा निम्ना नाभिर्यस्य तत् दक्षिणावर्त्ता गूढनाभि उदरं समुन्नतं से

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ह वयः पुनराषोडशाद्दशावर्षं यावद्बालं तदपि त्रिविधं क्षीरक्षीरान्नान्नम्
रेत्यादितस्मिन्काले वयसि धातूनां रसादीनामिंद्रियाणां चक्षुरादीनां तथा सर्वेषां धा
पकस्यौजसो वृद्धिः श्लेष्माधिक्याच्च बालस्य स्नेहमार्दवसौकुमार्यालस्यक्रोधत्व
सौभाग्यानि भवंति ॥ आसप्ततेर्मध्यं वयः ॥ आ ऽष्टमर्यादायां तावद्विधौ तत्तत्को
न सप्ततिं यावन्मध्यं वयः तदपि त्रिविधं यौवनं संपूर्णत्वमपरमपरिहानिस्तस्मि
न्मितोद्देकल्लनदीप्ताग्निता प्रत्तापरिपाकौजोबलासायश्चेति तत्रात्रिंशतो यौव
नमाचत्वारिंशतः सर्वधात्विंद्रियबलवीर्यपौरुषस्मरणवदनविज्ञानमध्ययगु
णसंपूर्णत्वमतः परं परिहानिः तेत्येपादि तस्मिन्मध्ये वयसि धात्वादीनामवृद्धि
रवर्द्धनं भवति परं वयः परमेकासप्ततेरजीर्णं यावद्धात्विंद्रियौजसां क्रमेण
क्षयस्तथा बलवीर्यपौरुषवचनस्मरणविज्ञानग्रहणगुणानां च तथा बलीपलि
तखालित्यकासश्वासादिभिरभिभूयमानं जीर्णं भवनमिवाभिवृष्टं सीदति
तस्मिन्वातोद्रेकस्तेन श्लथासारमांससंधिवस्थिमात्वकपारुष्यावनामाः का
सश्वासवेपथुश्लेष्मादिरोगकार्दीरणधातुक्षयश्चेति हंसहंसमित्यादि हंसहंसमात्मी
यं हस्तत्रयं सार्द्धं प्रमाणं तेन यद्वपुः शरीरं तत्सुखायुषां पात्रं भाजनं नचेत्यादि ए
वं प्रमाणमपि वपुरतिदिनैरधिकैर्निर्गतैर्निर्दिनैः स्वरसालैर्निजैः सहजैरिष्टाभिर्नपुनः कैः
प्यरोमश्रुतादिभिः तेन नारोमशं यद्वपुः तत्सुखायुषां नपात्रं तथा यदतिरोमशं तत्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सत्वादिगुणैः स्वभावैः सह सत्वादिगुणमयीश्च प्रकृतीः देशकालजन्मना प्रमूलक्षणैः आदिभिः ४

देशवर्णादेशाश्चवार्धा स्वप्रयोगित्वं न दोषानुशायित्वात् विशेषतश्च हृद्यप्रकृतय
श्च बुद्धिगुणमिश्रविकारकारित्वेन तु निपातना दिग्वारोगव्यपदेशाः एवं वातादिप्रकृ
तीनां निर्दिश्य सत्वादिप्रकृतीर्निर्दिशन्नाह सत्वेत्यादि तत्र ह्यभिलक्षणो गुणम
यीश्च स्मृताः पुष्टं एवं वातादिप्रकृतिवत्पृथग्द्वंद्वसर्वाभ्यां सोऽपि चालिकादिभिः सत्वा
पा० ६ दीनां गुणैर्पर्यायपर्यं सत्वादिप्रकृतेर्येऽपि सत्वे वजातिकुलदेशकालावयोबलप्रकृ
त्यात्मसमुत्था याश्च स्वभावेन हि दृश्यन्ते पुरुषाणां जात्यादिनियतास्ते भावविशेषाः प
रस्परविलक्षणाः वातादिप्रकृत्या च संख्या भेदो वेशाच्च रूपस्वरवर्णानुकरणैः श
द्वैर्वा प्रमाणसंख्याभेदं भवति सत्वाद्यास्विशास्तु नंतरजन्माभ्यासवासनया जन्यन्ते
तस्मादेवमनुष्ठानेर्थ्यक् येन नारकाणां न दोषाणां च पर्याय पर्यायमेवानुकंपु
रुषप्राप्त्वे सेन तस्माच्छरीरं सत्वादीननुरुध्यते सत्वादयोऽपि शरीरं प्रकृतिविभा
गश्चायमनुरूपे चिकित्सायां वर्तनीय चोपयुज्यते वैद्यैर्योपयुज्यते तत्राद्यास्त्वयोनि
त्यानुरागः दोषानुशायित्वशारीरत्वात् विशेषतश्च हृद्यप्रकृतयः तस्माद्विपरीतगुणे
नाविधिना दोषापक्रमणीयोऽन्येन तानुपचरेदेव सम्पधानुप्रकृतिस्तु सर्वरसेन सा
त्म्येनोपाचरणीय स्तथा च मुनिः समसर्वरससात्म्य समधातोः प्रशस्यते इति
एवं वातादिप्रकृतीः सर्वादिप्रकृतीश्च परस्परानुरोधिनीर्निर्दिश्य वयोनामाप्रमा
ह वयस्त्यादि कालकृता शरीरावस्था वयः तत्त्रिधा बालमध्यवृद्धत्वभेदेन सा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

379

कफेषु क्लाशिते तथा पद्मले एवं भूते·प्रह्लिणीयस्य स एव इंद्रवज्रावृत्तं ·अल्पाश्नाहार
ह्यापस्य स एवं आहारो भावलं प्रज्जेय मत्तं·अधुर्विज्ञेयस्य स एवं दीर्घदर्शी·मवषपभा
विकार्थ पश्यनीदं कुर्वन्न इदमवशं पसंपन्नस्मनः इति वदान्यो वल्गुभाषी दानाच स्माद्दा दा
नादो महावान् गंभीरो महाचिन्तनः स्थूललक्ष्यो भूरिदाता क्षमावानद्भानि पुनः स्था
थः सज्जनः निद्रालुर्बहुनिद्रो दीर्घसूत्र चिरकालकार्यकारी कृतज्ञानानीति कृतज्ञः
वेश्मवदेवीवृत्तं कुञ्जर कुटिलचित्त विपश्चित्पण्डितः सुभगो जनप्रियः सुष्ठुलज्ज नत्तिति
सुलज्जः गुरूणां पित्रादीनां भक्तः सेवकः तथा दृढस्थिरसौहृदमैत्रीकस्य स एवं सम
स्त्रुरागाः त्वापारार्थादीन्सजलजात पद्दिपंक्तिपुनांश्च वशयति तोपदांश्च वशयति उपजाति
वृत्तं ब्रह्मादिभिः श्लोकप्रकृतयः समानानासिंहादिभिश्च एवं पृथ्वानादिप्रकृतीर्लिखे
अभिधाय द्वंद्वसर्वदोषप्रकृतिः लक्षणमभिधित्सयेदमाह प्रकृतीरित्यादि द्वयात्मंस
र्गाद्दुद्रुजातास्तु ः प्रकृतयः सर्वात्मया सर्वदोषोद्भूतेका प्रकृतिरेवं प्रकृतयो द्वयस
र्वात्मयाश्च तेषां गुणशाहोत्र धर्मवचनो लिंगवचनो वा द्वंद्वशब्देन दोषद्वय सर्वशब्दे
न च दोषत्रय लक्ष्यते द्वंद्वं च सर्वं च द्वंद्वसर्वे तेषां गुणदोषद्वदोषत्रयाणां धर्माः लिंगानि
वा तेषामुदयः प्रादुर्भावो द्वंद्वसर्वे द्वयसर्वे तेभ्य उत्थाने पासांनाएवं द्वंद्वदोषगुण
द्वयद्वंद्वात्याः प्रकृतीर्वदेन सर्वदोषगुणोदय सर्वात्म्यां प्रकृति वदेत् उत्यइत्युक्तर्वा
न्निष्ठेतः सुपिस्यशनियोगविभागात्कः उदस्थात्स्तंभोः पूर्वस्येति सस्थानकारादेशः पू

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मश्रयः अप्रमत्ता उच्चाभ्यासाद्योग्यस्य स एवं रूपेऽप्यन्विकः सुमः सन्कर्णिकारादीनामेव शालिनी वृत्तं
एषां च पैत्तिकानां लोचनानि ताम्रादिगुणयुक्तानि भवंति तानि च क्रोधादौ दीर्घाणि लोहितं
कानि उपजातिवृत्तं ते च पैत्तिका मध्यायुष्याद्गुणयुक्ता भवंति आयुषादीनामेवान कं येषां तए
वं श्लेष्मप्रकृतिलक्षणमाह श्लेष्मत्वात् यस्मात् श्लेष्मा सोमः तस्मात् हेतुः तान् श्लेष्म
लो नरः सौम्यो भवति कारणानुविधायित्वात् कार्याणां सोम इति सौम्यः शशित्वादित्वात्
तथा गूढास्थिसंधिस्निग्धानि संधयस्थिमांसानि यस्य स एवं तथा अनुद्रादि भरनतः श्लेष्मा
भवति तथा बुद्ध्यान्वितः अप्रमत्तसत्त्वप्रसात्त्विकः सत्त्वप्रधानः तथा आरंभसंदधाति प्रति
जानीते इति सत्यसंधः अनयोर्षपमर्गोऽयं उपजाति शालिनीवृत्तं प्रियंग्वादितुल्येन वर्णेनैकेन
युक्तः कश्चित्प्रियंगुसमानवर्णः कश्चित् दूर्वासमानवर्णः कश्चित् शरकांडसदृशवर्णः क
श्चित् शस्त्रतुल्यवर्णः कश्चित् गोरोचनतुल्यवर्णः कश्चित् पद्मतुल्यवर्णः कश्चित् सुवर्णव
र्णः तथा प्रलंबबाहुर्दीर्घभुजस्तथा विस्तीर्णपीवरवक्षास्तथा महल्ललाटमलिकं यस्य
स तथा तथा घननीलकेशः उपजातिवृत्तं मृदंगः कोमलावयवः समसुविभक्ताविभ
क्तावयवस्मारदेहो यस्य स एवं बहव तेजोरत्निसदृशो यस्य स एवं तथा जलदादिसदृश
शब्दस्तथा शरीलस्थितिः भनताभियोगाविनपीच बालत्वपि नातिरोदनः उपकृदृश
कं वृत्तं सदाल्पं तिक्तादि भुंक्ते तथा अल्पमपि भुंक्ते स्वभावात्तथापि बली भवति रक्तांतो
पयोस्ते रक्तांते तथा सुस्निग्धविशालदीर्घं च तथा सुव्यक्तौ शुक्लासितौ पयोस्ते सुव्यक्तासित

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१८

लानि अत्र वातप्रकृतेश्च लक्षणानि वनयाप्युक्ते स्वल्पत्वात्मी लिंगानि नीचे द्रष्टव्यानि तानीव भवन्ति
वातप्रकृतयः स्वप्ने सलिलेषु लङ्घमाना गगनेचरा इति इदं वक्ष्याबन्ते तेनाधनाश्च अल्प
मत्सरेणाधमानाः स्वपूर्वोक्त्या लता नासिकाग्राः स्वाद्वावृष्टिकाले घायास्मात्स्मानमा
नान् प्रकृत्येणाल्पानां पित्तकार्यबलानाएवं अनेकस्वभावोस्य चेष्टानुकरणात्स्वादीना
मिवान्न कर्येषां वातिकानां न एवं वातिका इति सुश्रुतमत्व पीपः ठक अधुनापित्तप्रकृति
लक्षणं प्रस्तौति पित्तमित्यादि धन्वतरिमतेपित्तमेव वह्निः पाकादिकर्मकरणादथवा
वह्निजं वह्निजीन मन्याधारत्वात् पतञ्जवमतो हेतोः पित्ताधिकः पुरुषः क्लीबतस्तावनु
द्रो भवति तथा विधाल्काररणाद्युत्पन्नत्वादस्य धातुः रस धातुश्चानेन स्वादा गंधवान्सुगन्धी
तिभावस्तत्याभोर उष्णगात्र तेषां ताम्रवर्णिहस्ताग्रवक्त्रं यस्य सएव तथाम्रतामा
नीवकपिलकेशः खल्परोमाच शालिनीवक्त्र इयतानि मालवादीनि यस्य सएवं त
थायामनवद्विजितस्तस्यामधुरिः कायवाङ्मनोव्यापारैः लिङ्गेरसस्पृष्टः आश्रितानां
वत्सलप्रियकृत्स्निग्धवादि पुत्रकसुतयाभीत्युभयधुष्टिवता मयिगतिः शारद्पत्वाद्भवति
अपिशालात्सुहृदामधारस्यानां किमुस्वगतिर्नभवतीति व्यात्तयति तुत्रविलंविनवृत्ते
मेधावीति प्रसंसार्थे प्रस्मायामेधापाद्इति विनिः संधिवैधाश्रमां संचतानिप्रशिथि
लानि यस्य सएव तथा स्त्रीणामनभीष्टः अल्पोपश्रुक्तकामोयस्य सएव पलितादीना
मावासः तान्यस्य वहूनसंतीत्यर्थः सचमधुरायन्नं भुङ्क्ते पहर्षणी वृत्ते घर्मद्वेषी न्याभी
त्रणाणि लिः स्विद्यतीति स्वेदनः पूतिगंधोयस्य सपूतिगंधिर्गस्यादित्यादिनाइदादेशः

१८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रयोगतत्हत्वं विसर्गविचारार्थं ॥ तएवास्मादेवकारणात् पवनाधुषिताः वायुनाधि
ष्ठिता मनुष्याः प्रायः एवंरूपा भवंति कारणानुविधायित्वात्कार्याणां दोषात्मकान
नुगुणस्वभावान् अनुभजु स्वस्वभावा भवंति स्फुटकार्त्तवरूपा वस्यात ॥ साजी वि
तपवनाधुषिताः मानवाः स्फुटितधूसरकेशगात्राः स्फुटितानि धूसराणि केशगा
त्राणि स्फुटितधूसरकेशगात्राणि येषां ते एवं तथा शीतं द्विषंतीति शीतद्विषः उष्णाभि
लाषित्वात् तथा चलधृत्यादयो गत्यंता येषां ते तथोक्तास्तथा निश्चयेन बहुप्रलापा अस
त्संबंधभाषणे येषां ते एवं वमनतिलकं वृत्तं ॥ अल्पाः पित्तादयो निद्रा येषां ते एवं त
था सन्ना रुक्षा चला जर्जरा वाक् येषां ते एवं केषांचित् सक्ता ॥ अवसादन्तीना केषांचि
त्सक्ता भाषते विलम्ब्य विलम्ब्य प्रवृत्ता केषांचिच्चला केषांचिज्जर्जरा भिन्नकांस्यधनिस
दृशी वागिति तथा नास्तिकदृष्टमतिर्येषां ते नास्तिकाः ॥ अस्ति नास्ति दृष्टमतिरिति उ
क्तः तथा बहुभुजोऽनल्पाशनाः तथा सलीलास्तथा गीतहास्यादिलोलास्तत्प्रियाः
रागतावृत्तं तथा मधुराम्लपटूष्णसात्म्या मधुराद्यभिलाषिणोऽस्यन्ते कृशाश्च ते दीर्घा
कृतयश्च ते कृशदीर्घाकाराः स्तपाः सशब्दगतयस्तेषां ते सशब्दगतयः नदृढा न दृ
ढशरीराः नजितेंद्रियाः न च आर्याः अस्सतः कान्ता न स्त्रीणां न च दयिता अभिमतानां न च
बहुप्रजाः ॥ अपि तल्पसत्ततयः पांचतः दोषं पूर्वसाम्यादोषं दृष्टं इति केवदंति सतः एषां चक्षू
तसहतीनां नेत्राणि खराणि धूसराणि तथा धूमराणि पांशुनेवावकीर्णानि रक्तानि वर्त्म

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

८८ 383

त नैकदोषाधिकं प्रकृतीनां हि दोषाधिकप्रकृतीनां काले ऽपाययोः कालहानेन एवंजलि प्रमाणेन
हिकार्यापाययमज्जाहीनां हि दुर्लयोर्भिद्यात् अधुनाप्युक्तमायुष्कामीयः ध्याये शुक्र
नैवस्यैर्जन्मादौ दोषविषयोर्वा विषक्रमः तेष्वतिस्वः प्रकृतयः इत्यादि सूत्रस्यैव विवरणमाह
शुक्रार्त्तवस्थैरित्यादि शुक्रं चार्त्तवं चेत्यादिर्हेतुः गर्भिणी संपद्यमानागर्भमाता तस्या भोज्य
चेष्टाहारविहारास्तेनैव दोषावानादिलिन प्रकृतिः सप्तधा सप्तप्रकाराभिर्हिता सूत्रस्था
नय इति जानीतावक्कवचनं तेन यादोषा यो दोषौ ये दोषा इत्यर्थो वा निष्पन्ने एकदोष द्विदोष
त्रिदोषप्रकृतिषु यथासंख्यमेको दोषो द्वौ दोषौ त्रयो दोषा अधिका इत्यर्थः ननु समाधा
तोर्वातादीनां समत्वात् कथमिवाधिकास्यात् ब्रूमः समधातोरपि समानानां त्रयाणा
मपि दोषाणां तस्मिन्काले स्वप्रमाणेनापि यथास्वं तुल्यैनाधिकत्वं भवतीति युक्तं तत्राप्या
धिक्यं यदि वा दोषाधिक इति बाहुल्येनोक्तं तेन बहुत्वप्रकृतिषु दोषाधिकभावो ननु सम
धानाविति निवेद्यं अधुना वातस्य प्राधान्यं बहुभिः कारणैः प्रदर्शयन् प्रकृतिं प्रागपि पथ्ये वि
मुत्वादि विभुत्वाद्व्यापित्वात् तथाशुकारित्वात् तथा बलित्वाद्यथाह वायुर्बली आशुकारी
बली च न तथापि तस्य प्रमाणेन तथान्यकोपनात् तज्जानीयात् पित्तस्य प्राप्तो पित्तश्लेष्मणाव
तेन यथा कार्यं तेन न तत्साम्यं न तथायं तथास्थानत्रयान्तरकत्वात् यथाहि नासावन्येन प्रेर्यते
मतः स्वतन्त्रोऽसौ न तथा बहुरोगत्वात् तथा चोक्तमशीतिर्वातजा रोगाश्चत्वारिंशच्च पित्त
जाः विंशतिः श्लेष्मजाश्चेति एवं त्रयाणां दोषाणां मध्ये ऽनिलः प्रवरः प्रधानः प्राय इति

गर्भिणी भोज्यचेष्टेत्यस्य प्रमाणमस्य एव हीनतरदोषावेष्टया प्राधिकत्वेन न तथा प्रत्येनेन दोषणं शुक्रादि ८८
दुष्ट्येनेन प्रकृतिसप्तधा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सुखसाध्यः कालयोगो बीजहेतुगुणशरीराहारसत्त्वसंपन्नश्च तथा वयोगाः रसायनवाजीक
रणोक्ता स्तम्भाजानमज्जोरस्करयोगजं बहुलं तद्देवियुक्तिजं संप्रति त्रिविधं देशं दर्शयति देश
इत्यादि स्तोकजलवृक्षशैलाकान्तस्य स्य रोगदे जांगलो देशः सुदुश्चो न तथा न तथा च म
रुदेशाद्भवाः स्वल्परोगाः स्थिरजीविनश्च दृश्यन्ते । अस्माज्जांगलाद्विपरीतो बहूदकनरगिरिस
मधिष्ठितः बहुरोगदश्च आनूपः समं स्तुदेशापोनानां बहुवृक्षपर्वतो न चात्यल्पवारिनरगिरिः
समाधारणो मध्यश्च रोगारोग्यः एवं भूमिलक्षणे देशमुक्त्वा मज्जादीनां परिणामार्थमा
ह मज्ज इत्यादि मज्जादिद्रवजलाद्यवसाने ऽञ्जलिन्योऽरोषदेहएके कृतजलिवर्द्धितं
तेन मज्जा एकाञ्जलिर्द्वी मेदः यावज्जलस्य देहाश्रितस्य दशाञ्जलयः उक्तो मस्तिका
शुक्राणां देहगानां पृथक् प्रत्येकं स्वप्रसृतिप्रमाणं स्त्रियास्तन्यस्य द्वावञ्जली रजसश्च
त्वारश्चत्वारोऽञ्जलयः स्वेन मानेनाञ्जलिप्रसृता विहरहस्तस्य स्यात् न विशेषवाच्योग्रहे
ने ननु चतुःपलद्विपलपरिमाणोन्मानवाच्योऽस्वशब्दप्रयोगात् प्रसृतिशब्देनानुमा
नवाचिनि गृह्यमाणे स्वशब्दोऽनर्थक एव हि स्यात् ननु यथा मज्जादीनां समत्वाधिक्यादि
तथा विद्यते तथा पवनस्यापि तथा च शार्गभ्यधायि उच्चश्वासोच्छ्वासनिश्वासेत्यादि त
था च वृद्धस्तु कुरुते निलः कार्श्यमित्यादि तथा लिंगं क्षीणे निलेगस्येत्यादि तस्माद्वायो
रपि प्रमाणं वाच्यं स्यात् तत्र यद्यपि हीनोत्क्रमवृद्धीभ्यां ने पवनस्य मूर्त्तत्वात् प्रमाणं वक्तुम
युक्तं तथा चरकः नमानोन्मानतावायोः रूपत्वान्न युज्यते इति तस्मा[illegible]व
समत्वाधिक्यहानयोऽनिलस्य वक्तुं युक्ताः समधातोरित्यादि समप्रकृतेरेतन्मानं विद्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

७६

विधिमुक्तमन्नं सम्यगेव पच्येत समम् एवं भवतीति तु शब्दो वावधारणे ॥ अन्तमितिशब्दं तेयोस
मशनविदेशकालमात्राविधिः ॥ एतमशन्नं मुक्तमाशु पच्येत सम्यक् कालमुक्तं चिरात् पच्येत साधि
बमयोः ॥ सम्यगशन्नं मुक्तं द्राक् पच्येत सतीहशारपस्तु सम्यगशन्नमुपयुक्तमा समशाबादी
न्तस्याचिरात् पच्येत समदः ॥ आटोपः शूलमामंदाग्नौ च समन्तं मेवाबद्धं प्रायेणेनचयानुपु
ज्यते तथा च समनेहेपपाठ पामेभ्रतुभिर्हीभ्यां च भोज्यमेवजयोः समम पाकोग्नौ प्रयु
ज्यते तथा चसमनेहेपपाठ ... पाकोग्नेर्युक्तमिति इत्यादिना एकरूपतया
क्तयाः प्राकृती लोमदेपुनश्चिरात् समन्तं मोवबद्धं तस्मान्नदेन खचारयदिति ए
वमग्निमुक्तागन्यायत्तत्वाद्बलस्य बलं त्रैविध्यं दर्शयति सहजमित्यादिना सहजं का
लजं युक्तिकृतं देहबलं त्रिधा सहजायन इति सहजं कालाज्जातमिति कालजं यु
क्तिभिरूपजातं युक्तिजं तत्र सत्त्वशारीरसाम्यमिति सत्त्वमादि तत्रेतेषु बलेषु मध्ये स
त्वरजस्तमः समुत्थं शारीराङ्गं वं च यद्बलं तत्प्राकृतं स्वाभाविकं सत्त्वशाहेन गुणत्रय
त्व रजस्तमः ... बालयौवनादितेन कृत
मत्र लक्षणे शरीरं त्वगन्त्रादिसारमयं यद्बलं जातं बलो बाल्ययौवनादितेन कृत
मत्र लक्षणे राशीरंत्वगन्त्रादिसारमयं ... अनुमाहेमन्तादिभ्य उद्भूत मनन्त्य एतदुभय
वयस्कृत वयोनुसारेणानिष्पादिते ॥ अतः कृतकमिकं सेत्यादिनासः तथा युक्तिज
बलं कालजं बलं वयः कृतमिति ॥ अतः कृतकमिकं सेत्यादिनासः आहारः पूर्वमुक्तः विहा
बलं पुनर्विहरणं विहारो व्यायामनिद्राद्यालक्षणेनानेकप्रकारः ॥ आहारः पूर्वमुक्तः विहा
राहाराभ्यां जनितं विहाराहारजनितं यदेतद्बलं तद्युक्तिजं युक्तिर्योगा इति कर्त
वता तेनेजातं युक्तिजं तथा जेस्करास्त्विमे योगाः तद्यथा बलवत्पुरुषे देशे जन्म ७६

राणां तेषां मूलं प्रधानं येषां भूतानामग्न्यादीनां तेन स्मात् तन्मूलाः मूलमिव मूलं यथा वृक्षा
णां प्रधानमवयवो मूलं सर्वेषां हि तदवयवानां जन्मादिषु तत्कारणं तेन विना तेषां
जन्माद्यसंभवात् तस्माच्चैवं मूलं सर्वावयवेभ्यः प्रधानमवयवस्तस्मात्तेन तत्पल वृद्धिह्र
सवृद्धिक्षयात्मका वृद्धिश्च क्षयश्च वृद्धिक्षयौ तस्य जाठरस्याग्नेर्वृद्धिक्षयौ ययोश्च यो
तान्मांसादिवृद्धिक्षयौ तद्वृद्धिक्षयवृद्धिक्षयौ तावात्मा स्वभावो येषां तेन तद्वृद्धिक्षयवृद्धिक्षया
त्मकः तेनेतदुक्तं भवति जाठरानलवृद्ध्या परेषामग्नीनां वृद्धिः तत्क्षयेन तेषां क्षयस्त
स्मात्तं पावकं मतिमान् विधिवत् शास्त्रोक्तेन विधानेन युक्तैः पथ्यैरन्नपानेन्धनैर्हितैः प
थ्यैः पालयेत् अन्नपानान्येवेन्धनानि तैः कथं पालयेत् प्रयतो यत्नवान्नावहेलया
हि यस्मात् तस्यान्नस्य पक्तुः स्थितौ सद्भावे आयुर्बलस्थितिस्तन्नस्थित्यां नावापुरवति एत
बलं च तथा चोक्तं मग्निमूलं बलं पुंसां बलमूलं हि जीवितमिति जाठराग्निमधुना च
तुर्विधं वक्ति समइत्यादि समाने वायौ स्वस्थानस्थे स्वाणस्थिते सति समाग्निर्भवति
विमार्गगे मार्गमुक्तत्वात् तथा प्रकृते समाने सति विषमाग्निर्भवति पित्तेनाभिमूर्छिते ए
कलीलीभूते समाने तीक्ष्णोऽग्निर्भवति अस्मिन्समाने कफपीडिते श्लेष्माभिभूते म
न्दोऽग्निर्भवति समइत्यादि एवं समादिभेदेन चतुर्विधोऽग्निर्भवति इदानीमस्य चतुर्वि
धस्याग्नेर्लक्षणं वक्ति यःपचेदित्यादि वक्ष्यमाणेन संबंधाः यो वह्निः सम्यग्यथा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तमेव तस्मिन्विकारं कुरुत इति तदत्र न प्राप्नोतीति रसस्य तत्कर्तृत्वाभावात्तर्हि रसस्यावि
तमुत्पादयतेत्यगं करोतीति भ्रमः उपचारिककर्तृत्वाभिप्रायः कल्प्यः ॥ अनेनैव न्यायेन व्रीहिणा
तपः शोषयतीत्याद्युपपन्नं यानेतः रसधातुं पचनयति तत्र विकारइति तावद्रसस्य विद्ध
ष्टः दोषाणामित्यादि एवमिति दोषप्रकोपक्रमानतिदेशार्थं यथा रसः द्विष्यमाणः स्व
वैगुण्यात् यत्र सज्जति तस्मिन्विकारं कुरुते एवमनेनन्यायेन दोषाणामपि वानादीनां
यानेन विहितिष्यमाणानामेकदेशप्रकोपणं विकारकरणं स्यादत एवसिध्यद्दूष्य
प्राद्युक्तरसेजायते एवं तेषाणां स्वभावनामप्यस्थानं स्थाने विकारिकारित्वं भवति
॥ अन्नेत्यादि भुक्तमेव भौतिकं विनाथाग्निना कुणम् ॥ अन्नं च भौतिकं च धातव एव ॥ अन्नभौ
तिकधातवस्तेषामग्निरन्नभौतिकधात्वग्निः तस्य कर्मान्नभौतिकधात्वग्निकर्म्म
इति प्रकारेण एवं पूर्वोक्तेन प्रकारेण ॥ अन्नभौतिकधात्वग्निकर्म्मपरिभाषया तत्पुरः
निश्चयीकृतं तत्रान्नकालेऽपि वहतमित्यादिना कुतमारभ्य इत्येतेन ग्रन्थेन तत् यान्त
सारं किट्टं च यापत्तिरित्युक्तमिति तदेतज्जाठराग्नेः कर्माभोमाव्यानेतत्परस्य शोषाः
शोषांश्चदेहगातानित्येवमनेनन्यान्ति हिट्टं नद्युः तो ग्नेः कर्म्म सारस्तु समाभिर्भूयि इमा
रम्य प्रसादकिट्टो धातूनामित्येवमनेन यान्ति हिट्टं तद्धात्वग्निकर्म्मेति ॥ अन्नस्य
त्यादि सर्वेषां वक्तुमण्म सर्वेषा ॥ अन्नस्य पक्ता पाचकोजाठराग्निः सोऽधिकोमतो
बलीयानभिप्रेतस्तत्र कुतामितिशेषः कुतः ॥ इत्याह तन्मूलाइत्यादि सज्जाठ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यामनमूढगर्भजरायुभिः कमलादिकापुष्पाणि सद्यस्तत्क्षणादेव स्फुटत्वं दुर्लक्ष्यं न यावि
धं नादृश्यं प्रभावमाहात्म्यतानि परिणमंति शुक्रबलादिः कुर्वन्नेनापरिणमंति प्रायइत्यादि
॥अन्नद्विमवज्रं चूर्णगुटकादिदीपनक्रियमहाराजेण प्रायः स्वं स्वं कर्म करोति प्रायोमदृ
णं किंचिद्वज्रमहाराजाद्दृष्टं किंचिन्नतोपर्दीक्ष वीर्याद्विवशनकर्म करोतीति द्योतनो
र्थं ॥आहाररसारेरसधातुनासहैकतामापन्नो रसरक्तादिभावेन परिणमति यावच्छुक्रप्रसा
दोगर्भत्वेनेत्युक्तं ततः कथं कदाचिदेकदेशो रोगोद्भूतिःस्यादिति तत्रसयुक्तिवचनमाह
कदाचिदेकदेशादेशे रोगकृतरुधिरमांसादेरेकदेशवृद्धिक्षयविकारकृत्त्वाद्भवतीति संश
यापनोदार्थमिदमाह व्यानेनेत्यादि यस्मादाहाररसोजाठराग्निनापक्वः प्रसादोधाता
कारकत्वान्धातुवाच्योयस्माद्व्यानेनेन सदा सर्वतः सर्वस्मिन्देहे विक्षिप्यते विशेषणपू
र्पते सर्वतइत्याद्यालापः किंभूतेनविक्षेपप्रेरणमेवोचितं योगपत्कर्मयस्यतेनविक्षेपो
चितकर्मणा कथं विक्षिप्यतेयुगपदेककालेन यतो जस्रमनवरतं हारसधातुराहारप्रसाद
रुपोव्यानेनविक्षिप्यमाणः स्ववैगुण्यात्कुतो दुष्टःप्रदेशे स्रोतोवैगुण्यात्प्रकुपितोपि संजायते
स्वोव्यानेनविक्षिप्यमाणः स्ववैगुण्यात्क्वचित् दुष्टप्रदेशे ... एतदेव दृष्टांतद्वारेण स्पष्टयति खे
तः संपद्यते तस्मिन्प्रदेशे देहविकारं कुरुते न सर्वत्र एतदेव दृष्टांतद्वारेण स्पष्टयति खे
वर्षमित्यादि यथा खवैगुण्यात् तो यदाम घावातवशाद्भिन्नो वर्षति क्वचिदेव देशे कुरुते न
सर्वत्र खवैगुण्यात्खवैगुण्यमितिषष्ठीसमासः पूरण
गुणात्स्वादिना चात्रयथासमासनिषेधो न भवति तथाभिधानाधीश्रियदौर्बल्यमित्यत्र यतिपादिः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कैः पाकक्रमादिभिः पाकस्य जाठराग्निना भूताग्निभिर्धात्वग्निभी रसरक्तादिविशिष्टा
द्यत्वेवं प्रकारक्रमः स्वस्थादिर्वीर्यप्रभावादीनां तैः । अन्ये त्वाचार्याः षडहात् षड्भिर्दि
नैरन्नं पाकक्रमादिभिः शुक्रत्वं यातीति वदन्ति । अन्ये त्वहोरात्रान्मध्यमन्ति मासपर्यन्तावधिं
प्रमाणेनावधिरन्नस्य रसादिपाकक्रमादिना परिणाममतः शुक्रत्वगमने ननु उक्तं ईदृकदा
चिदपि तथा च पाराशरे षडरात्रेण अन्नं परिणम्य शुक्रत्वं यातीति निषेधयन्ति तथा च
तद्वचः । आहारो भुक्तमात्रस्तु प्रथमे रसत्वं समागच्छति द्वितीये रक्ततत्वं तृतीयेऽह्नि चतुर्थे मांस
तामपि मेदस्त्वं पंचमे षष्ठेऽस्थित्वं सप्तमे व्रजेत् मज्जानां शुक्रतामेति दिवसेऽष्ट
मे तथा । तस्माद्विपथ्यापथ्याभ्यामाहाराभ्यां तं ध्रुवं सप्तरात्रेण शुद्धमिति मदु
र्वान्तिरधानवदिति । अन्येत्वन्नं तद्रसादिभावेन परिणामेन शुक्रत्वं यातीति किंच तच्छ
न्नं कृत्वा च कालवदन्तरं तं कृत्वा पाकक्रमेण तानपाह संततेत्यादि भोज्यपक्वं तेधानव
भ्र भोज्यधानवभोज्यशाल्मलीनेहयस्य पातार्थं आहारस्य सर्वस्य ग्रहणं उक्तं हि धानके
धान्याहाराद्भिन्न एतदुक्तं भवति यस्य धातोर्यस्मादुत्पत्तिः स तस्याहार इति भोज्य
धातूनां परिवृत्तिः परिकीर्तितं भ्रमणगतिः सा चक्रवदनुच्छिन्नप्रबंधस्वरूपता आ
हाररसेनाप्यायितत्वात् एवं पूर्वोक्तेन कालावधिना पानविधिना हृष्यापथ्याद्यपिपद्व
लजातं तदपि शुक्रत्वं यातीत्याशंकायामिदमाह वृष्याणीत्यादि वृष्याणि
क्षीरमधुकमाषकूष्माण्डहंसादिप्रयोगा यान्ति तथा आशुप्रग्रहणात् विषगरव

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

माह कफ इत्यादि कफादयो धातूनां क्रमेण मलाः रसस्य कफो मलः रक्तस्य पित्तं
मलः खेषु नासिकाकर्णविवरादिषु ये मला नः संभवन्ति ते मांसस्य मलः यच्छरीरे प्रस्वे
दो रोमकूपः सलिलसंभवस्स मेदसो मलः नखरोमाणि चास्थ्नो मलः मज्ज्ञो मलः
स्नेहः कर्णसंबंधी नेत्रयोस्त्वचो विट्शः पुरीषस्य च यत्तेजः सर्वधातूनां तेजः शा
रीरसमुत्थस्य मलः न केवलमाहारस्य प्रसादकिट्टतया द्वैविध्यं यावद्धातूनाम
प्याहाररसाप्यायितानां प्रसादकिट्टतया द्वैविध्यमिति दर्शयन्नाह प्रसादेत्यादि
धातूनां स्नेहः सारो धातुस्नेहः आहारस्य धातूनां रसादीनामेवमनेन प्रकारे
ण यथा दर्शितेन पाकादग्न्याहितात्प्रसादकिट्टौ द्विधा रूपतां द्वैविध्यं व्रजतः कि
ट्टभागस्य पोषणं त्वस्ते लोकाश्रयत्वाल्लिंगस्यैव निबोधयं अर्दैर्घ्यादिषु तत्पाठ एवास्य पर
स्परोपसंस्लमादित्यादि धातूनां स्नेहः सारो धातुस्नेहः आहारस्य धात्वात्मना प
रिणमतो यथायथं धात्वग्निभिः पच्यमानस्य क्षीरस्येव स्तनस्य सारस्तथा पाव
कवशात् धातूनां यथान्तरं धातुस्नेहोत्कर्षक्रमपरिणतिः सा धातुस्नेहपरंपरा
परस्परमुपसंस्तंभादुपसंश्लेषाज्जायते अत एव शोणितप्रभृतीनां धातूनामुत्त
रोत्तरं गौरवं यथोत्तरं स्नेहोत्कर्षः इदानीं परिणामकालमाहारस्य निरूपयन्ना
ह केचिदित्यादि केचिदाचार्या अहोरात्रान् रात्रिंदिनेनान्नं प्रभुक्तं त्वं यातीत्याहुः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वपरिणामेन वर्द्धिशुक्रं प्रवर्त्तते कथं सर्वगतं शुक्रं प्रवदंति मनीषिणः ॥ अथ प्रसादात्
मज्जायाः शुक्रं भवति देहिनां छिद्रं न दृश्यते स्थौल्या चतन्नि:सरति वा कथं एवं पृष्टः सुश्रु
तेन गुरुः प्राह हे सुश्रुत तेजो रसानां सर्वेषामंबुजानां यदुच्यते विनोक्षणः स रागे
ण रसो रक्ततां गच्छति वायुनाग्निना तेजसा युक्तं रक्तं मांसत्वं गच्छति श्लेष्मणा च समा
श्रितं मांसं स्नेहादिसंयुतं स्थिरतां प्राप्य शुक्लं च मेदो देहे भिजायते पृथ्व्यप्तेजोनि
लादीनां संघातः श्लेष्मणा कृतः खरत्वं प्रकरोत्यस्य जायते स्थितो ततः करो
ति तत्र शौषिर्यमस्थ्नां मध्ये समीरणः मेदसा तानि पूर्यंते स्नेहो मज्जा ततः स्मृतः
तस्मान्मज्ज्ञः प्रपरस्य च शुक्रं संजायते तदा वाय्वाकाशादिभिर्भावैः शौषिर्यं जाय
न८ तेस्थिषु येन स्रवति शुक्रं तवा कुंभादिवोदकं स्रोतोभिः स्यंदते देहात् समंता शुक्र
वाहिभिः हर्षरोदीरितं रागात् संकल्पाच्च मनोभवात् विलीना सम्यक् स्थानात् निर्याति स्थ
लान्निम्नमिवोदकं तथा चरकमुनिरपि साक्षात् दोधजगो स्रोतसा च तथा स्वेन धा
तुः पुष्यति धातुनेति तथा धातवो हि धात्वाहाराः प्रकृतमनुवर्त्तंत इति तत्र जि
त्याह तत्राहाररसात् सर्वरसधातुर्विवर्द्धते रक्तधातू रसात् एव रक्ताख्यान्मांस
मेव च मेदोधातुस्ततो मांसात् दस्थ्यास्थ्नो मेदसस्तथा मज्जधातुस्ततोस्थ्याख्य
न्मज्ज्ञः शुक्राख्य एव च शुक्रात् गर्भः संभवः परिकीर्त्तितः तस्मात् क्रमपरि
णामपक्व एव शुक्रः एवं रसादीनां धातूनां प्रसादं दर्शयित्वा किट्टं यथाक्रमं दर्शयितु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जातानि तथा रसपाद्यम्याशुक्रस्य तत्तथानान्त्यवनिष्ठते यानि कार्याणि तथा परिणते सर्वाण्ये
भिव्यक्तिं यान्ति कार्याणि दृश्यन्ते ननु क्रमपरिणामपक्षे धातोर्धात्वन्तरस्य पन्नावाक्षी यथा प्राग
प्राप्तो यो धातुर्धात्वन्तरभावेन देहे परिणमति न स धातोर्धात्वन्तरभावेन देहे परिणत
त्वाद्भावः प्राप्नोति पूर्वस्य पूर्वेवन तस्य शुक्रं प्रसादस्यैव देहे सद्भावः स्यात्तद्रसादीनां धा
तूनां तथा चैवमाहारविनिवृत्तावपि स्त्रीगमनसामर्थ्यं स्यात् शुक्रस्याविद्यमानत्वा
रज्ञोच्यते ऽव्युच्छिन्नप्रवाहसन्तानक्रमेण सर्वाणि कृत यथा धातूनां धात्वन्तरभावापत्ति
र्न तु स्वकाले सर्वैरवयवैः कृत्स्नान्निरिति कृत्वा यो यो धातुर्धात्वन्तरभावेन देहे परिणमति
न तस्य धातोः पूर्वस्याभावः प्राप्नोति सर्वैरवयवैरपरिणतत्वात् तदेवं सर्वथा क्रमपरि
णामपक्ष एवाश्रयितुं न्याय्यः तथा चाक्षपाणिसंग्रहेऽप्यधीतं तत्राहाररसो व्यानविक्षि
प्तो यथास्वं स्वेषु धात्वग्निषु क्रमात् पच्यमानः स्वात्मभावप्रच्युतिसमनन्तरमेव प्रा
प्नोति रक्तादिसंज्ञः कालवदस्सवलिप्राप्यते देहमज्जैव नित्याह तथा चरकसंहितायामाह
रसाद्रक्तं ततो मांसं मांसान्मेदस्ततोऽस्थि च अस्थ्नो मज्जा ततः शुक्रं शु
क्रवक्तोऽप्याह रसाद्रक्तं ततो मांसं मांसान्मेदस्ततोऽस्थि च मेदसोऽस्थि ततो मज्जा ततः शुक्रं शु
क्राद्गर्भः प्रसादजः इत्युक्तं तन्मा चार्थविभ्रमाच्चिदमचोदयत् रसाद्रक्तं विसदृशात्
यं देहेऽभिजायते रसस्य न चरागोऽस्ति स कथं याति रक्ततां रसाद्रक्तान्न स्थिरं मांसं क
यं तज्जायते नूनं रसाद्रक्तात्तथा मांसान्मेदः सम्भवतीति तत् कथं स्नेहस्निग्धमांस
मेदोभ्यां खरत्वं कथमस्थिषु खरेष्वस्थिषु मज्जा च केन स्निग्धो मृदुस्तथा मज्ज

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

८२

रिणमंति मेदसः अधारोहति पूर्णे स आहाररसो मेदस्त्वं प्राप्तः पुनः प्रतिस्रोतोन्यायेन मां
सस्य विशेषवती वृद्धिं करोति नन्वेवं रक्तस्य अनंतरं रसस्य पुनरस्र रसाधारोहति पूर्णः
रक्तस्य वृद्धिं विधत्ते रक्तधातुर्मांसस्य मांसधातुर्मेदस इत्येवमस्ति स्थूलस्य मेदोवृद्
साद्येषां मांसावसानानां अप्युपचीयते अस्थ्यादयः अस्थ्यादि स्रोतसां मेदसा वृत
त्वान्नतथोपचीयंते तस्मादाहाररसेन मेदोभावेन परिणमता उदकपूर्णाभिन
व मृत्कुंभजललेवस्पंदनन्यायेनास्थ्यादयो धातवः केवलमाप्याय्यंते न तु तथोप
चीयंते तथा च मुनिः स्थूलस्य मेद एवोपचीयते तस्मादाहाररसेन मेदोभावेन पर
णमता ननु तथेतरे धातवः अस्य ह्ययमर्थो मेदसोपि अस्थ्यादयो शुक्रावसाना स्रोत
स्याप्याप्यायंते न पुनः पूर्वरसादयो धातवः स्थूलस्येनोपचीयंत इति अत एवाह मुनिः
मेदोमांसातिवृद्धत्वाच्चलस्फिगुदरस्तनः अयथोपचयोत्साहो नरोतिस्थूल उ
च्यत इति अपि च यदि क्रमपरिणामपक्षोंगीकरी क्रियते तदानीं गर्भस्य शुक्रधा
तुसारोत्पन्नस्य रसादयो मज्जावसाना धातवो नस्युः कारणानुविधायीनि हि का
र्याणि भवंति शुक्र क्रमपरिणामपक्षे पुनः शुक्रप्रसादस्य सर्वधातुप्रसादरूपतया
परिणतत्वात् शुक्रप्रसादो गर्भतया परिणमत्सर्वधात्वात्मरूप एव परिणमति कारणा
नुरूपत्वात् कार्याणां तथा च बीजकारणे वटधानकादौ सकलान्यवयवान्यपदार्थ

८२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

णं च विज्ञेयो नाविरुद्धः ॥ अन्ये तु न रसधातुरेवाऽन्यतत्त्वकथमुक्तं यतो रसाख्यो धातुस्तेन नवि
क्षिप्यते किन्त्वाहाररसेनैव धातुसाह्यो वा दानमनर्थकं क्रमः धातुरसाह्व प्राकारानि
षेधत्वेनेहोक्तं रसस्य देहधारणत्वं दर्शयितुं सर्वेषां हि धातूनां यद्देहधारणं स्वभावत्वं न
दाहाररसस्य प्रापितानामप्याकूकूलाप्यापितानां मतः यत आहाररसो धातूनामाकरः सु
द्रवस्थाने यथा लोके हेमादीनामाकारः प्रतीतो यतो विशिष्टो रसो धातु
सत्यामप्येतेन इयं रसादिमधातुरिति व्यञ्जनं धातुरेभिव माहाररसो ध्यानेन विक्षिप्यते न
रसाख्यो धातुरिति स्थितमेतत् किं चाऽऽहाररसादेककालं सप्त सु धातुष्वागतः सुरस
वेशितानादुष्टरक्ता रसाद्धातव उत्पद्यन्त इति यद्यपि एककालं धातुपोषणपक्षे प्राप्नोति तत्ते
नसानामिदं विरुद्धमते पूर्वो धातुः परं कुर्याद्वृद्धः क्षीणश्च तद्विधमिति यतः सर्वधातवश्च
हाररसेनानुगतव्याख्याने विक्षिप्ते न स्वस्वोष्मणा न स्वव्यानिश्चमानाः स्युस्ते आहाररसाप्यायि
तानुबन्धेनानाप्यायिताः क्षयं यान्ति ततो वेदेकं यत्र पूर्वस्य धातोर्वृद्ध्या परस्य धातोर्वृद्धिः पूर्व
स्य धातोः क्षयेण परस्य क्षयः स्यान्न हि कदाचिदपचयदर्शनेन रक्तेन सुहितः स्यात्तदनेनैवासुहितः
स्यात् तथा स्थूलस्य मेदसो वा प्रचीयत इति दर्शनेन च समं कृत्वा सप्त धातुष्वागतः सुविनि
क्षिप्तेरसेमेदसोऽधिकावृद्धिः कथं सप्त धातुष्वागतः सुनिक्षिप्तेन मेदसः क्षयः न हि कदाचि
दाहरदत्तेऽप्यधिकावृद्धिः कदाचिद्यवद्याने क्रमपरिणामपक्षेतु स्थूलस्याहाररसोरस
धातुं तथा परिणमति रसधातुरक्तं तथा रक्तं धातुर्मांसं तथा ततो मांसधातुर्मेदस्तथा प

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मनोत्यमुमर्थं चोनयितुमुवाच रूपादिष्वित्यादि रसाद्यानुरसादाहारहेनस्वहेकनामावन्ना
दुक्तम्प्रनापने स्वधातुरसस्तथाम्नो रक्तनयाम्मपद्यते तावद्यावत्स एव नमेत्त्वेनेनियाज्य
त्यत्रवादयन्ति ननु यद्याहाररसाद्यानविच्छिन्नारएधानुनाम्सहेकनापरिणमनक्रमेण
क्वाहीनभावान् नभीवसानाम्परिणमति नहि कथमुक्तसाररस्तु सप्तभिर्भेदोपयाति [illegible] सं
वत्सरेनाग्निभिरिति अत्रोच्यते कार्यकारणोपचारादेतदुक्तमित्यवेहिसारकार्येषु रसादेः
हि वसुसप्तभिर्दिनैरग्निभिः पच्यमानेषु सारस्तु सप्तभिर्भेदोपयाति स्वपच्यमानेग्निभिरित्युक्तं न
स्मादसादिधातव एव सारसाम्यान्मलकारणादुन्यपिनाः परमार्थेन पच्यन्त इति बाध
ननु पदिक्रमेणाहाररसादसारसादक्तरक्तान्मांसमित्यादि क्रमआश्रीयते तत्कथ
मुक्तं व्यानेनरसधातुर्हि विच्छिद्यते चिनकर्मणोति अत्रोच्यते युगपदेतानि निर्दिश्यन्ते युगप
देककाले व्यानेनरसादेहविच्छिद्यते विच्छिन्नाश्चरसात्सर्वधातून्यनिरिति शतशत्ताविद
हरसरक्तमांसादिक्रमेणाहाररसाद्यातुनिष्पत्तिरित्युच्यते तदेतत्परस्परं विरुद्धमि
वलक्ष्यते क्रमयुगपत्राहोत्रशोधक्रमार्थं तथाचोवाच सांख्ये युगपच्चतुष्टयस्य वृ
त्तिः क्रमशश्च तस्य निर्दिष्टेति अस्यार्थः मनोबुद्ध्यहंकाराणां त्रयाणामेकस्य श्रोत्रादीनां मध्या
दन्यतमः इत्येवं चतुष्टयमेतत् अस्य च वृत्तिर्युगपन्निर्दिष्टा क्रमेण च नच युगपत्वृत्ति
रुत्पलपत्रशतसूचीभेदनन्यायेन क्रमेण च वृत्तिर्यथा च सुरादीस्यादिकं पश्यति म
नसात्रसंकल्पते बुद्धिर्निश्चिनोति अहंकरोमीत्यहंकार उद्यमं याति तदेतदपि युगपत्क्रमे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वाङ्कं तत्र शरीरगतं तत्सौकारिकावदेशं प्राप्नोतीति अन्ये त्वेवमाहुः देहे त्रयोदशाग्नयस्त
था हि पञ्चभिराशयस्थानेषु हन्ना ग्निशानानि पंचसु मांसाशयेषु स्थितैः स्थानेषु पंचाग्निशाना नीति
एवं च महाभूतात्मकाद् आहाराद्यथास्वमग्निना पक्वाद् देहः आहारसारः तत्र स्थैर्ये महाभूत
गुणैर्देहगा महाभूतगुणा रसधात्वाग्निना पच्यास्वपभिवर्द्धते किंरूपमित्यादि तदन्नपक्व
द्विधा संभवति द्विप्रकारं जायते किंरूपं प्रसादरूपं तथा किंरूपमपि यदेतदन्नस्य पक्वस्य तद्
अ च्छानच्छभेदेन द्विधेत्याह तत्रेत्यादि तत्र तयोरच्छानच्छभेदभिन्नयोः किंद्रव्यमि
त्याह अच्छमन्नं किं ट्टं तन्मूत्रं विद्यात् यच्छन्नं संहतमन्नस्य किट्टं तच्छकृत्पुरीषं जानीया
त् सारइत्यादि सारः प्रसादाख्यो भागो भूयः सप्तभिरग्निभिः पच्यते उदराग्निनापच
मितस्य भूताग्निभिः पूर्वं पक्वः स्वस्थाशारीरभूतान्वितं धातुभिः पच्यत इति प्रतिपाद्यनार्थ
भूयो ग्रहणं कथं पच्यते यथा स्वं योगस्य सारस्य रसादिषु धातुस्थस्य योग्निः स्वप्रा
तीयस्तेनैव तेन स सारः पच्यत इत्यर्थः स धातुस्थः सारो रसधात्वग्निना पच्यते इति भा
वस्य नु विधो व्याहारो भवति जाठराग्निना भूतसहायेन पक्वः किं सारतां या
ति ततोयः सारः प्रसादाख्यः सपूर्वं हृदयं याति ततो हृदयावस्थेन व्यानेन विक्षिप्तस्त
त स्याभिः सिराभिर्दशाभिर्मूलभूताभिः कृत्स्नं शरीरं सह्यमानो रसधातुना स हैकतां
प्राप्तो रसधात्वाशयस्थेन वह्निना भूताग्निसहायेन पच्यमानो रक्तधातुसारतया
परिणमते मांसधातुसारतया परिणमति यावत्सर्वाहाररसक्रमेण गर्भतया परिणम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्य कृत्वा नैकं सर्वेण सर्वाणि कृत्वा मेवं प्रत्येकं भूतगुणानुप्रविश्य वोष्मपक्वाहारगुणं कृत्वा
समुच्छ्रीकुर्वन्नाह पार्थिवा इत्यादि पार्थिवा महाभूतगुणाः पार्थिवानेव गुणान् देहगतान् स
कुर्वन्ति पुष्णन्ति वृद्धिं नयन्ति शेषाः पार्थिवगुणेभ्यो ये महाभूतगुणा आप्याग्नेयवा
यव्यनाभसास्तेन शेषाः पार्थिवगुणव्यतिरिक्ता आप्यादिमहाभूतगुणानुपुष्णन्त्याप्याय
यन्ति गुणानां च निराधाराणामसम्भवात् सहाधारेण पृथिव्यादिना महाभूतेन वर्द्धः
एते महाभूतगुणास्तथाविधानेव महाभूतगुणान् पुष्णन्तीति सामर्थ्याल्लभ्योऽर्थः अत्र
चोदयन्ति ननु च पृथ्व्यादिमहाभूतचतुष्टयव्यतिरिक्तस्य उद्देशमात्रत्वादाकाशस्य
तत्रैव दुर्घटा कुतः पुनस्तस्योष्माणः सम्भवति अत्रोच्यते आकाशस्य सत्तानावगद्
व्यतिरेकपयस्तावेशावकाशप्रदानेनैव तथा नासिकास्यश्रोत्रास्यादिषु सुषिरेषु स्थानेषु स्थि
न ऊष्मा दाहपाकादीकुर्वन्नाभस ऊष्मस्वपचर्यत इत्यौपचारिक ऊष्माऽप्युपपन्नत ए
व पंचभौतिकाः पञ्चाग्नयः एक उदराग्निः सप्त धात्वग्नयो वक्ष्यमाणा इति त्रयोदशाग्न
यः ननु पार्थिवाद्यूष्माभिः सत्यमेवैतत् किन्तु न एवं पञ्चोष्माणः पार्थिवादयः स्थानान्त
रप्राप्ता धातूष्माण इति व्यपदेशमासादयन्ति पुनः पाककृत्यैव महादशां प्राप्नुवन्ति ए
कस्मात्पुनश्च धातूष्माभिः पाककाले धातूनामविपाचभौतिकत्वात्तेषां पार्थिवाद्यू
ष्माभावस्तेऽप्य पार्थिवाद्यूष्माभिः पच्यादकं स्थानान्तरगतं लसीकादिव्यपदेशं लभते तथा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तथाहि मात्रावस्तिविधावभिधानं यथा वा स्नेहपक्तिः स्यादतोऽल्पुल्वणमारुतानामा
पामनिमान्द्रीप्राग्नीत्यादि तदेवं पक्वाशयस्थस्यानुवासनस्य स्नेहपाकोऽभिहितः
तस्मात्पक्वाशये अग्निना पक्वस्य पुनः पाको युक्त एवं तत्रांतरेषु मांसादीनामपि वि
क्लेददर्शनादन्यत्रापि पाकोऽनुज्ञातः एकत्रा ठरस्याग्नेः कर्माभिधायेदानीमन्येषाम
ग्नीनां कर्माभिधानुमाह भौमेत्यादि भूमेरयं भौमः आप्य इति चित्रं आग्नेय
इत्याग्नेयमिति ठक् वायव्यमिति सोमदेवतेत्यर्थं वाय्वृतुपितृषसो यादिति यण न
दत्तोऽपमार्थेन बोधो वायव्यवायव्य इति किंपुनस्तदित्याह पंचोष्माण इति किंभू
ताः सनाभसा सनाभसेनोष्माणः पंचोष्माणः पंचाग्नयो भौम उष्मा याव नाभस
उष्मा तदेते न यः पंचाहारगुणाननुपच्यन्त्यत्र च ति कुतोऽनुप्रकृतत्वादुदर्याग्निनिव
र्त्तितादन्नपाकात् किंभूतानाहारगुणान् स्वान् स्वान् पार्थिवादीन् यथायस्य महाभू
तोष्मणः पार्थिवादेरात्मीयो गुणस्तं गुणः स एव पार्थिवाद्यूष्मा पचति अनया चो
क्त्याहारः शरीरगतानां भावानां समानगुणानां गुणहारेणवर्द्धनहेतुर्विपरीत
गुणानां च ह्रासहेतुरिति प्रतिपादयति यथास्वमित्यादि तेषु च गुणाः पंच महाभू
तोष्मणा यथास्वयेषां महाभूतानामात्मीया गुणास्ते यथास्वमात्मीयेन वह्नि
ना पक्वा आत्मीयान्वे देहस्थान्महाभूतगुणान्पुष्णंति कथं पुष्णंतीत्याह पृथक्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राप्यं प्राप्तं जाठराग्निना शोषितं सन्नं तथा पिण्डितं तदानीं पिण्डं जातं संहतं संपन्नं तथा
कटुकटुकं जातं सन्नं सन्मात्रं नीयात् अवस्थां प्राप्य मारुतं कुर्यादिति योजना एतच्च सर्वं स्व
भावसिद्धत्वात् स्वसंवेद्यप्रायं कार्यानुमेयं च अत एव रसबहुत्वेपि यतद्द्रव्याणां विपाकः त्रिवि
धः मधुराम्लकटुकत्वलक्षणमुक्तं तदनयानीत्योपपन्नं वं तं त्रैभवन्ति तथा हि बहुरसस्याप्य
न्नस्य जाठराग्निनापच्यमानस्य रसत्रयेणापि लक्षितेन मधुराम्लकटुकस्वभावेनावस्थात्र
येण परिणामो वैभेति तथान्नमिति त्रैकस्मादुदाजग्धिर्लघिकृतीति जग्धादेशान्न भ
वति [illegible] अन्नात्त्वं ब्रूमः अन्नाम इति निपातनाद्बहुलं छन्दसीति बहुलव
चनाद्जग्धादेशाभावः ननु विदाहादम्लत्वं गतमिति सामान्येनोक्तं मधुरमि
वाभाति यतो द्राक्षेक्षुशर्करादीनामविदाहित्वं श्रूयते अपि च विदाही निवर्जयेदिति
तंत्रकारः पठति अनया च रीत्या अविदाहिद्रव्याभाव एव स्यात् तस्मात् सामान्येना
विदाहित्वमभ्युपगम्यमानमन्याय्यमिव मन्यामहे उच्यते विदाहस्य द्वैविध्याद्दो
षः इह द्विविधो विदाहः अग्नेर्दोषस्थानकृतो द्रव्यकृतश्च तत्रेह दोषस्थानकृ
तस्य ग्रहणं आमाशयाच्युतमग्निनापक्वमिति कथमुक्तं यतः पक्वाशयस्थ
स्याग्निनापाकोनुपपन्नो दूरव्यवधानाद्ध्यग्निरामाशयस्थस्तस्मात् पक्वा
शयस्थस्यान्नस्य पक्वत्वमनुपपन्नमतोऽभ्यन्ते पक्वाशये योऽस्ति पाकस्तत्र कारवचना

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वेशमाहारणं करोतीत्यन्नप्रवेशकृत् प्राणानिलाहृतमित्यनेनाप्ययमर्थः प्रत्यायादि ततः किमे
तेनाग्नेत्याह अन्नप्रवेशकृदित्यनेनान्नप्रवेशकरणमात्रमुक्तं ननु कोष्ठप्रापणमिति प्राणस्य
हि वायोर्मूर्द्धाश्रितस्य उरोयावत्संचार उक्तो न तु नाथः एवमन्नप्रवेशकरणं तावत्प्राणो यावत्कोष्ठमिति
कोष्ठं प्राणानिलाहृतमित्यनेन तु कोष्ठप्रापणमेवार्थविशेष उक्त इति द्वयमप्यनेन दत्तं पुनः संधुक्षि
तः समानेनेति न वाच्यं यतः प्रागुक्तं समानोऽग्निः समीपस्थः कोष्ठे चरति सर्वतः इति एवं जाठरेण
ग्निना सहचरः समानो वायुः संधुक्षयतीत्यर्थो वर्णितः तस्मात्संधुक्षितः समानेनेत्यनेन नार्थः
उच्यते ऽर्थविशेषणमन्यपार्थमेतदुक्तं तथाहि समानोऽग्निः समीपस्थः कोष्ठे चरति सर्व
तः ऽन्नं गृह्णाति पचतीति समानस्य वपाकक्रियां प्रति वृद्धिसंधुक्षणमाहारणकर्तृत्वमुक्तं नाग्ने
रिह पुनः संधुक्षितः समानेनाग्निः पचति न समानो वायुरित्यपौनरुक्त्यमेव यद्यपि चैकस्यापज
लेन न किंचिदस्ति तथाप्यन्नपाकक्रियां प्रत्यग्नेरेव कर्तृत्वं न समा[...]नादेः समानादयो ह्युप
कारकाण एव उक्तमिदमग्निः पचतीति तस्मान्न स्यादानीमग्निसमीपस्थस्य स्यायाः ऽवस्थायास्त्नाः कुत
यस्मात्तस्यैव पाकं निर्दिशति आदावित्यादि आदौ प्रथमं षड्रसमपि ऽपिशब्दान्नहि त्र्यादिरस
मप्यन्नमभ्यवहृतं माक्षितपीतादिकं तत्समानं मधुरीभूतं मधुरं मधुररससंपन्नं सफेनमीरये
त् किंभूतं कफं फेनभूतं पानीयादेरपि पच्यमानस्य प्रथमं फेनोत्पत्तिदर्शनादेवमुक्तं विदाहादम्ल
तां ततः पित्तमामाशयात्कुर्यात् च्यवमानं ततः प्रथमावस्थातो माधुर्यप्राया ऽनन्तरं मध्यमावस्था
प्राप्य जाठरेण वह्निना पक्वषड्रसमप्यन्नमभ्यवहृतमम्लतां यातमनम्लमम्लसंपन्नं पित्तं विदग्धा
न् कस्मात् पुनरम्लतां यातीत्याह विदाहाद्विदग्धोऽविदग्धभावाद्दाहाद्विदाहस्ततो विदाहाद्धेतोर
म्लत्वं यातं किंभूतमन्नमामाशयाच्च्यवमानं ततः ऽऽमाशयादित्यनेनैव च सूतं पुनस्तच्चामाशयात्पक्का
द्रा।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२८

कृतेनस्य चान्नपाकस्य हेतुरग्निरत: आह यदन्नमित्यादि यदन्नमाहारो देहधात्वादिकोबलं भवति न
त्वग्निरेव तु कुत इत्याह नहीत्यादि हि यस्मादपक्वाद्रसाहाराद्रसरुधिरादयो न संभवंत्यतो देहधात्वा
दिपोषणे सर्वे ऽग्नि: कारणं पाकक्रियानिर्वर्त्तनात् एवमन्नपक्तिरेकाग्न्याश्रयत्वाने ऽन्नं देह
धात्वादिहेतुरग्निप्रभावादेव तस्मादग्नि: पाककरणं पक्वमन्नं देहादिपोषणमिति परस्परकारणं
त्वमनयोर्न इत्यपक्वाद्रसादय इत्युक्तं अन्न:पाकस्य कस्य निकर्षितानि रूपयन्नाह अन्नमित्यादि
कालमप्रहृष्टविण्मूत्र इत्यादिनान्नस्य तत् प्राणिनः स्थिति अन्नमभ्यवहृतं कोष्ठं हरत्याहृतं नाभिबंधने
स्थाने प्राणाख्येन वायुना आहृतमानीतं क्षीवनसंबंध्यन्नारेत्यादिनैव प्राणानिलाहृतं तेनलब्ध
पुनरुक्तमप्यर्थं न च द्वेदेवं गलोपलक्षितेन स्रोतःसंजननमपूतीरादिभिर्विभिन्नसंघातमपनी
तविकृतिमवनयाह स्नेहेन मृदुत्वं प्रापितं तथा आमाशयस्थितमग्नि: पचति नाभिस्तनान्तरं जंतोरामा
शय इति स्मृत: इति आख्यानं आमाशयस्तत्रान्तरे किं भूतोऽग्नि: उदर्यो जठरभवस्तथा समाना
ख्येन वायुना संधुक्षित: उद्दीपित: कालमहत्वमुपावलत्वमार्थितान्नमात्रादिसहायेन जाठराग्नि
ना समानोद्दीपितेन पक्वमन्नं देहधात्वादिपोषणं ननु उदर्योऽग्निर्देहरूपत्वादन्नसाधने कथं पच
त्यात तदर्थं बाह्यदृष्टान्तेन निदर्शयन्नाह यथेत्यादि यथा बाह्योऽग्नि: स्थालीस्थितो
यन्तु तलं पचति तोयं च तण्डुलाश्रितं तोयं तु तलस्थं केवलद्राव: तथैवामाशयस्थोऽग्नि: संधुक्षित: समा
नेनामाशयस्थितं चतुर्विधमन्नमशितपीतलीढखादितं भेदभिन्नं प्राणानिलाहृतं पचति
ननुद्रावमदीयध्यायप्रवमुक्तायप्राप्तोत्तमइत्यादि आमपालिखासातिर्नवेराकुरिति अन्नमप

२८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दीनयन्ति किंकृत्वा विपाच्य विविधैः प्रकारैः पाचयित्वा बलवन्तीत्यादि बलवन्तीत्युक्तं
विपाच्याधीनयन्ति अबलाः पुनः रसाः स्वं स्वं साम्यमेवावस्थामेव विमुञ्चन्ति ननु जाठराग्नि-
ना मन्दहुतो ह्यपचन्ति न मन्दहुतो ननु स्वरूपमुक्तं सान्निपात्यं न यन्त्यध इति अत्रोच्यते
जितिमन्दहुतेनाधाराधेयभावे न ह्येवं तत्वात्युच्यते एतेन दृष्टं मन्दहुतो ह्यनेनाधारस्त-
स्याधस्तादुक्तं कल्पान्ति न धराहूयन्ति पित्तं च वह्निरित्यादि पुनैवबध्नाति पित्तेवदुष्टानीत्यादि
न रवेवं दुष्टा धराधाकला सा श्लेष्म मन्दहुताद्दहन्ति मुख्यते ननु स्वाधारतया मन्दहुतो नास्ति
त्वाग्निः पाककरणे समर्थो भवति नाधारत्वं तेनैकेवलएव न देवमन्त्वाधारस्य मन्दहुत
त्वस्य पाकनिर्वर्तनं प्रतिकर्तृत्वं पुनः मेवेन्यनः सान्निपात्यं न यन्त्यध इत्येन दुपपन्नमेव
अग्नितमन्दहुतेनाधाराधेयभाव न यावदुष्यानामरस्य बलाधानेनापकार्यांवकारकमा
वः संभाव्यतइत्याह मन्दहुतादित्यादि हियस्मादर्थे यस्मान्मन्दहुतस्य बलं साम्यं तेन स्य
हेतुरस्ति यस्तितो मन्दहुतो बलमुत्पाद्यते स चाग्निर्मन्दहुतो बलो मन्दहुते बलं यस्माने
एवं अदिधातो लक्ष्यं केवलमग्निमन्दहुतो बलं मन्दहुते प्यग्नेर्बलं यतो हेतो दूषितेनाग्ने
दुष्टमन्दहुतो रोगकारी संपद्यते एवं चार्थान्मन्दहुतोपि दुष्टा यामग्नि इच्छन्ति दुष्टस्य
सापि रोगकारी संपद्यते एवं यापित्तधराकला सा दुष्टा सती ग्रहण्यादीनां दुष्टये भवतीत्यु
क्तं दुष्टस्य सापि रोगकारी संपद्यते एवं यापित्तधराकला सा दुष्टा सती ग्रहण्यादीनां दुष्टये
भवतीत्युक्तं अन्नमन्दहुतान्मन्दहुता एवं रूपता न स्वान्नविवेकं देहधात्वादिपोषणं नाप

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३८ ४०३

चयन्तो निधनं तनुहिमतं ॥ आत्रेयेनादि ॥ अत्रिपुत्रस्य शासनमात्रा इति एवं दोषादीना
मुख्याश्रयित्वमिति दोषावानाद्व्याधाविव रसादयमलामूत्रपुरीषस्वेदाः ॥ आदिरादे
न दूषकदण्डल्वं दोषादीनां संबंधो ऽत्र ॥ आग्निर्धः स एवान्नस्य पक्तानं तु पित्तं पा
चकाख्यमिति तदधिष्ठानमित्यादि ॥ तस्याग्नेर्जाठरस्याधिष्ठानमाधारो पक्वाशया
माशयोराग्निर्लिङ्गमिति साम्यस्य ग्रहण्यान्नसंज्ञा ग्रहणीति मानात् ॥ आमाशयस्था
विशिष्टोऽधमनो विशेषः ग्रहण्यर्थः ॥ सेवनादिलोधन्वं तनूरेमनेकलापित्तधरा नामकला
तं यत एवं ग्रहण्यग्नेराधारभूता तथान्नग्रहणान्नसंज्ञा ॥ तन ॥ आयुरादिरित्युपस
पद्यत इति वाक्यशेषो धात्वाग्निनाः सह संबंधः ॥ आयुरादीनां द्वंद्वं ॥ आ
युः शरीरेन्द्रियसत्वात्मसंयोगविशेषः ॥ आरोग्यं धातुसाम्यं वीर्यं शक्तिः कर्म
ण्यसामर्थ्यमोजः ॥ ओजः रसस्य परप्रसादः सर्वधातूनामाप्यायकं वृद्धिकरं प्रदहस्तुजातं तदु
क्तं ॥ आयुर्वृद्धये ॥ आरोग्यवृद्धये वीर्यवृद्धये ओजः वृद्धये पंच
महाभूतानामग्निवृद्धये धात्वग्निवृद्धये च पक्वाशयस्य द्वापक्वाशयवद्धा ॥ तस्या स्थितना साहि
ग्रहणीमन्नस्य सद्यः सावष्टम्भप्रवेशा रोधिनी वार्गलेव यथा द्वारकपाटमार्गरो
धायवार्गला महाविभ्रान्ते देशः कोष्ठावस्थम्भवती एवं ग्रहणी गृहीत्वा वनिष्टते ॥ अ
नं तरं जाठरेणाग्निना विपक्वं शनैः पक्वाशयमुच्यमपत्तए वोच्यते स्थितना पक्वाशयपह
रिमुक्तमार्गार्गलेवेति पक्वाद्यान्नादा पुरीषादयः वृष्णाति ना पक्वादिमाह मुक्तमिमा
दि मुक्तमप्यवहृतमन्नमामाशये आमान्नस्यानेपक्वामप्यन्नेनेत्रसाग्रहणीरधावत्या

३८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ध्या मूत्रवाहिस्रोतसां प्रमेहवद्बहुमूत्रता संगो प्रवृत्तिः किंचिद्वा प्रवृत्तिर्मूत्रकृच्छ्रवत् साकु
द्वाहिनां स्रोतसामतीसारवत् पुरीषातीसरणमतिप्रवृत्तिः संगः स्तोकस्तोकं कृच्छ्रात्पुरीष
स्य प्रवृत्तिरेव वा सर्वं सर्वत्र बिंदुकयोः द्वावत्रैव पुरीषस्य प्रवृत्तिरेव मूत्रवाहिस्रोतसां मूत्राति
प्रवृत्त्यादयः प्रवृत्ती तत्रस्रोतोदुष्टिलक्षणं एवमन्येषामपि स्रोतसां यथायथ वस्तुवाहिनां
पथास्वेव स्वातिप्रवृत्तिः प्रवृत्तिर्नैवादुष्टिलक्षणं । अथवा स्रोतसां स्रोतसामन्ययथः कु
दिलभावस्तु दुष्टस्य लक्षणं [illegible] विमार्गतो वेति । अथवा स्वमा
र्गमुक्त्वा मार्गान्तरानुसरणं स्रोतसां दुष्टिलक्षणं विस्रोतसां यथास्थूलानि द्वाराणि च्छि
द्राणि दूरं प्रसृतानि सकलविसृतानि च येव स्रोतसां द्वाराणि मुखानि सूक्ष्माणि दूरं
प्रविसृतानि कृत्स्नदेहप्रकर्षेण गतानि येह्यारे: छिद्रैर्देहशरीरे प्रवहन्त्याहारस्य का
यानि तान्यपक्वमानस्य रसस्य भावाय समुद्भवन्ति सरसः प्रसादस्य वा उपचीयते वृंहणीय
ते अधन्विदत्वादि स्रोतसां च अधनाडिते सन्ति मोहादयो भवन्ति मोहादीनामितरेतरहं
दुः प्रलापादीनां च विषमूत्र्योर्बाधनसंबंधः । अथवा मरणमेव भवति । अतो स्मार्त्तो वि
नसंज्ञापादेनार्वैद्यः अस्मात्स्वात्यः शक्रियाया धुवोऽस्मात्पुरिषाद्युक्त्वा शलासु हृद्य वहिनि
कास्य प्रसाधयन् कथयन्नेनानावहेलया केन प्रसाधयन्त्स्वयः स्तनविधाननः सद्यो
बणमानिषधात्केनाविधिना । मल्लस्तम्भादि तुरवधारणं । अनेकविधस्याहारस्याम्भव
हृनस्य पित्तमेवपक्ता किंभूतं पित्तं वा वकारग्रयपुरेरितं पर्वर्द्धो वमदीपकेऽत्र यथा पक्ता
मात्र्यमध्यगामित्यारभ्य यावत्पाचकनामतत्स्मृतमिति तदीहशं पित्तमाहारपा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

405

३६

पन्नो वा हि त्न्यः वंध्या नेता नेत्ययः ॥ अथ पञ्चानि मार्गणः हारीरूपिङ्गालि हंवन्तानि द्य्यानान्या
श्यायाः ज्ञायानि कुलाक्ष्मानि शारीरे धात्वावक्रा शानानास्त्यालह्यालवर्णा वे लनामा
लानि ॥ अहितेत्यादि ॥ अहितानामाहारविहाराणां सेवनात् शीलनानानि ह्योताति
रागाय संवधने नत्साधनार्थं दोषादिविज्ञानीयान्क्रमवगच्छेत् विमुह्यानि चाउश्रो
निश्चानां हि सुखार्थे रागयायस्वयद्येते स्वधात्वित्यादि स्वो धातुः स्वधातुः योयस्यस्वो
तस्य ॥ आधारभ्यात्मीय प्राधान्येन स्थितो धातुस्तेन स्वधातुना समः समानो वर्णोयेषां
स्रोतसां तानि स्वधातुसमवर्णानि यथा रसधातुतुल्यवर्णानि रसवाहिस्रोतांसि यथा
वन्त्युकधातु सहशावर्णानि सुक्त्वाहिश्चानानि तथा कानि चिद्वृत्तानि वर्तुलानि
कानिचित्स्थूलानि कानिचिदणूनि सूक्ष्माणि स्रोतांसि तथाप्याकृत्या सस्या
नेन दीर्घाणि सर्वाण्येवतनया प्रतानसहशानि पत्रेरेखानुल्यानि पत्ररेखानुल्प स
वर्तन रूपरवाप्ररूपा स्वनयानेकधादूरप्रविस्तानीतिगमयनि यतश्चाहितानाहारवि
हारसेवनं स्रोतोदुष्टेः कारणं मतसदुष्टिकारणानिवक्ति ॥ आहारश्चेत्यादि ॥ आ
हारः पानाशनादिलक्षणो दोषवगुलैर्वीनपित्तश्लेष्मगुणैरोरुक्षादिभिर्यः समतुल्य दोष १
समानगुणः स स्रोतसां प्रदूषको विहारोपि यो वागेहमनश्चेष्टालक्षणः सापि गु
णैः समः समानगुणो वच्यापथ्यं स्रोतसां प्रदूषकः पत्त्वाहारस्तथाविहारो धातु
भिरसादिभिर्विगुणो विरुद्धगुणो न समानगुणैः विपरीतगुणः सपथ्यापथ्यमेवस्रोत
सां प्रदूषकः स्रोतोदुष्टकथं तापनदित्याह ॥ अतिप्रवृत्तिरित्यादि ॥ अतिशयेन प्रवृत्ति

३६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रोत्रं नरे त्रयोदश स्रोतांसि वदन्ति ॥ आचार्या इति शेषः स्रोतांसि च स्रोतांसि हि जीवितायतनानि
विशेषेण जीवितस्याधिष्ठानानि किंभूतानि प्राणधातुमलाम्भोऽन्नवाहीनि प्राणं च
वायुं वहन्ति यानि तानि प्राणवाहीनि धातुवाहीनि रसादिधातून् यानि वहन्ति मलवाहि
नि मूत्रशकृत्स्वेदाख्यानि वहन्ति तेषामम्भोवाहीन्युदकवाहीनि तथान्नवाहीनि ॥ अन्ने
मन्नं वहन्ति यानि वहन्ति स्वेदं त्रयोदश संख्येह चोक्ता तत्र प्राणवाहिनां हृदयं मूलं महास्रोत
श्च तानि क्षयरौक्ष्याद्विषमाशनाद्व्यायामवेगविधारणादिभिर्दुष्यन्ति ततो विसृष्टमतिब
द्धं कुपितमल्पाल्पमभीक्ष्णं वा सशब्दशूलमुच्छ्वसन्तं कुर्वन्ति तत्र स्रोतःस्वेव साधनं रस
वाहिनां हृदयं मूलं दश धमन्यश्च रक्तवाहिनां हृदयं मूलं यकृत्प्लीहा च मांसवाहि
र्जकोरगुलुवारुणकमलणलप्रभृतीनि मधुरस्कंधप्रोक्तान्याद्दिशादीनि म्लादिस्कंधेप्यनुवर्त्तंते
तेनानुक्तान्यपि द्रव्याण्युह्यानि अथ सामान्योक्तानां रसकर्मापवादः तत्र मधुररसस्याह मधुर॰
मित्यादि जीर्णाच्छाल्यादिभ्यः अन्यत्र विना मधुरं श्लेष्मलं जीर्णादिति प्रात्याद्दीनां चतुर्णां विशेषणं
जीर्णात् संवत्सरोषितात् षिताव्छार्करा प्रायोग्रहणं जीर्णक्षाल्यादीनां व्यभिचारी दारुणत्वं तेलादी
नामप्यश्लेष्मलत्वात् एवमम्लादिष्वपि बोध्यं अम्लस्यापवादमाह प्रायोम्लमित्यादि लवणस्याप
वादमाह अपथ्यमित्यादि तिक्तकटुकयोरपवादमाह तिक्तमित्यादि अमृतापटोलीभ्यां विना तिक्
तमवृष्यवातलं च तद्वत् शुंठ्यादीन् विना कटुकं अमृता गुडूची कृष्णा पिप्पली रसोन लशुनः कषाय
स्यापवादमाह कषायमित्यादि अभयाहरीतकी अथ रसानां गुणतारतम्यं तत्र वीर्यतारतम्यमा
ह रसाइत्यादि कटुकोरसः उष्णवीर्यः ततोम्लः ततोपि लवणः तिक्तरसः शीतवीर्यः ततोपि कषायः ततो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मधुरः तद्वदेवेति पयोन्नत्वं च तीक्ष्णो रूक्षो बद्धमलश्च कटुकस्ततोपि कषायः लवणः स्निग्धः सृष्टमल
श्च ततोम्लस्ततो मधुरः लवणो गुरुस्ततोपि कषायस्ततोपि मधुरः अम्लो लघुस्ततोपि कटुस्ततोपि ति
क्तः अत्रापि प्रायइत्यनुवर्त्तते तेनाम्लस्यामलकस्य शीतवीर्यमित्यादि स्वयमूह्यं अतः एवं मधुरा
म्ललवणाः स्निग्धा गुरवश्च कटुतिक्तकषाया रूक्षा लघवश्चेति सुश्रुतोक्ते मम्लस्य गुरुत्वम् कषा
यरसस्य लघुत्वमप्युपपन्नं रसानां संयोगकल्पनयोर्विभागं प्रतिजानीते संयोगाः सप्तपंचाशत्कृ
त्स्नानां तु इत्यादि रसानां संयोगाः सप्तपंचाशत् भवंति कल्पना तु त्रिषष्टिधा भवति तदुभयमिति
विभज्यते यौगिकत्वेन विभागेन कल्प्यंते कथं यथास्थूलं सूक्ष्माणां संयोगानां रसानुरसभेदेना
नंतत्वात् केन हेतुना विभज्यते यौगिकत्वेन यत्तत्तदुभयं यौगिके स्नेहविचारणादिषु प्रयोगाम
तोविज्यते संयोगान् विभजति एकैकहीनादित्यादि द्विके क्रियमाणे रसाः एकैकहीनाः कार्याः ते
वतान् संयोगान् पंचदश यांति त्रिके क्रियमाणे स्वादुर्दशसंयोगान् यांति अम्लः षट् लवणः त्रीन् कु
एवं चतुष्के क्रियमाणे स्वादुर्दशः अम्लश्चतुरः लवण एकं पंचके क्रियमाणे म्ल एकं संयोगं सवते
भजति मधुरः पंचषट्के क्रियमाणे षडास्वादरूप्यमेवं भेदं संवत्ते इति पंचाशत् तद्यथा द्विके पं
वरसा यथा मधुराम्लौ मधुरलवणौ २ मधुरतिक्तौ ३ मधुरकटुकौ ४ मधुरकषायौ ५ अम्ललवणौ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ तिक्तकटुकौ १३

६ अम्लतिक्तौ ७ अम्लकटुकौ ८ अम्लकषायौ ९ लवणतिक्तौ १० लवणकटुकौ ११ लवणकषायौ १२ तिक्तक
षायौ १४ कटुकषायौ १५ त्रिके विंशतिर्यथा मधुराम्ललवणाः १ मधुराम्लतिक्ताः २ मधुराम्लकटुकाः ३ मधुरा
म्लकषायाः ४ मधुरलवणतिक्ताः ५ मधुरलवणकटुकाः ६ मधुरलवणकषायाः ७ मधुरतिक्तकटुकाः
८ मधुरतिक्तकषायाः ९ मधुरकटुककषायाः १० अम्ललवणतिक्ताः ११ अम्ललवणकटुकाः १२ अम्ल
लवणकषायाः १३ अम्लतिक्तकटुकाः १४ अम्लतिक्तकषायाः १५ अम्लकटुककषायाः १६ लवणति
क्तकटुकाः १७ लवणतिक्तकषायाः १८ लवणकटुककषायाः १९ तिक्तकटुककषायाः २० चतुष्के पं
चदश यथा मधुराम्ललवणतिक्ताः १ मधुराम्ललवणकटुकाः २ मधुराम्ललवणकषायाः ३ मधुरलव
णतिक्तकटुकाः ४ मधुर लवणतिक्तकषायाः ५ मधुरलवणकटुककषायाः ६ मधुरतिक्तकटुकषा
याः ७ मधुराम्लतिक्तकटुकाः ८ मधुराम्लतिक्तकषायाः ९ मधुराम्लकटुककषायाः १० अम्ललवण
तिक्तकटुकाः ११ अम्ललवणकटुककषायाः १२ अम्ललवणकटुकषायाः १३ अम्लतिक्तकटुकषा
याः १४ लवणतिक्तकटुकषायाः १५ पंचके षट् यथा मधुराम्ललवणतिक्तकटुकाः १ मधुराम्ललवणति
क्तकषायाः २ मधुरलवणतिक्तकटुकषायाः ३ मधुराम्लतिक्तकटुकषायाः ४ मधुराम्ललवणकटुकषा
याः ५ अम्ललवणतिक्तकटुकषायाः ६ एकं षड्रसास्वादं यथा मधुराम्ललवणतिक्तकटुकषायाः १ नवेता

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वेतश्चैद्रसभेदास्तत्र कथमुक्तं षड्रसा इत्यत आह स्वस्थं पुनश्च षड्रसा इति मिश्राः सप्तपंचाशत् संख्या याः क
ल्पनां विभजति षट्पंचकाद्युत्यादि पंचकाः पंचरससंयोगभेदाः पृथक् रसभेदाः षट् चतुष्कादि काश्च पंच
दश त्रिका विंशतिः षडास्वादं द्रव्यमेको भेदः इत्येवं त्रिषष्टिकल्पनाभेदः उक्तभेदानामवांतरभेदैर्यानं
त्यं दर्शयति ते रसा इत्यादि ते रसा भेदरसानुरसकल्पनया तारतम्यकल्पनया च गणनां समतीता भवं
२५ ति यथा मधुराम्लद्रव्यस्य मधुरस्य स्वरसत्वे अम्लस्यानुरसत्वे क्वचिदम्लस्य रसत्वे मधुररसस्यानुरसत्वे
बहुभेदत्वमित्यादि तथा मधुरस्य मधुरतरत्वं मधुरतमत्वं चेत्यादि तारतम्ये सर्वेषां रसभेदानां यौगि
कत्वं दर्शयति दोषभेषजवशादुपयोज्या इति दोषवशाद्भेषजवशाच्चास्त्र वै [illegible] पि रसा उपयोज्या यौगि
का भवंति दोषवशाद्यथा केवलेनापावमूत्रः पित्तयुक्तैः हन्ति ज्ञौ श्लेष्मयुक्तोम्लकटुकोइत्यादि भे-
षजवशाद्यथा विरेचनमेव मधमेव रसत्वादद्दह्यं हि रस त्रिरसादि कार्य संग्रहेतु रसः स्वल्पाप्यः प्राग
व्यक्तश्च षट्कत्तु कष्ट्यात्कालस्य महाभूतगुणानां न्यूनाधिकविशेषेण संसृष्टे विषमाविदग्धः बोद्ध
विपरिणमते पाच्यकं मधुरादिभेदेन श्वयथः शिशिरपवनधरणीधर विविधवनगहननदी तडाग
पल्वलोदकपानकमलकुमुदकुवलयाकीर्णरम्य स्थिरस्निग्धभूमि भूरि हरिततृणाति दूरविस्तृत
पुतानपुष्पवालोपसछन्नपादपः मत्स्यसरीसृपखगबहुलः श्लेष्मपित्तप्रायोगुर्वीवविसलिलः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इतरो जांगलसाधारण इतरयोर्निलकषायरसयोनिः॥

श्लीपदगलगण्डरोगापचीज्वरप्रायो बहुजनपदैः योनूपो मधुररसयोनिः यस्तु विषमविपुलासिकतास्थलो
बहुलोतिदूरावगाढविरससलिलकठिनलोकमहारोगशालिरूक्षदीर्घायुःप्रायोजनपदोनूपविपरीतश्च
सजांगलः कटुकरसयोनिः अत एवोभयसाधर्म्यादनूपसाधारणो जांगलसाधारणश्चेति विक
ल्पः तयोरन्योः अम्ललवणयोर्योनिरितरश्चेतरयोरिति इतिहेमाद्रिटीकायामायुर्वेदरसायने रसभेद
प्रकरणं सामस्त्येन निरूपितं हेतुस्कंधानंतरं लक्षणस्कंधमारभ्यते तत्र दोषादिविज्ञानीयमध्यायं
व्याख्यातुं प्रतिजानीते अथातइत्यादि दोषादिविज्ञानाधीनत्वाल्लक्षणस्य दोषदूष्यवैषम्यं च रोगलक्ष
णं वैषम्यज्ञानं च साम्यज्ञानाधीनं अतः एवादौ साम्यज्ञानं तत्र साम्यफलमाह दोषइत्यादि दोषा सू६
वातादयः धातवो रसादयः मलाः पुरीषादयः मूलकारणं सदा सर्वांजन्मैव स्यासु समा इति प्रक
रणाल्लभ्यते वायोः साम्यं लक्षयति तं वलः उत्साहोच्छ्वास इत्यादि तं देहे चलो वायुः उत्साहोध्यव
सायः उच्छ्वासः श्वासनिर्गमः निश्वासः श्वासप्रवेशः चेष्टागमनादिक्रिया वेगप्रवर्तनं विण्मूत्रप्रव
र्तनं धातूनां सम्यग्गति मार्गेणाद्रुतविलंबितसंचारः अक्षाणामिंद्रियाणां पाटवं विषयग्रहणसामर्थ्यं
अनुगृह्णाति उपकरोति अविकृतः समः पित्तसाम्यं लक्षयति पित्तमित्यादि पक्तिः पाकः उष्मा औ
ष्ण्यं दर्शनं चक्षुषा ज्ञानं क्षुद्बुभुक्षा तृट्पिपासा रुचिः प्रीतिः प्रभा कांतिः मेधा ज्ञानधारणं धीर्ज्ञानं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शौर्यं बलं तनुत्वमस्थूलत्वं मार्दवं सौकुमार्यं श्लेष्मसाम्यं लक्षयति श्लेष्मेत्यादि स्थिरत्वं दृढाङ्गत्वं स्निग्ध
त्वं स्नेहात् कृतत्वमिव संधिबंधः सुश्लिष्टसंधित्वं क्षमा सहिष्णुता आदिशब्दाल्लौल्यादयः तमनुगच्छत्यावि
कृत इति वा कथं धेनुवर्त्तते धातूनां साम्यं लक्षयति प्रीणनमित्यादि प्रीणनं तर्पणविकृतरसस्य श्रेष्ठं क
र्म जीवनं प्राणधारणं रक्तस्य लेपो मित्रेर्थ इति कर्म पेव मांसस्य स्नेहः स्निग्धत्वं मेदसः धारणमवलंबनम
स्थ्नः पूरणमस्थिपूरणं मज्ज्ञः गर्भोत्पादः शुक्रस्य श्लेष्मग्रहणं दन्त्यान्यपि उक्तान्यार्तवस्तन्यादीनि संतीति ज्ञाप
यति पुरीषसाम्यं लक्षयति अवष्टंभ इत्यादि अवष्टंभो धारणं मूत्रसाम्यं लक्षयति मूत्रस्य क्लेदवा
हनमिति तद्धि निरसनं स्वेदस्य साम्यं लक्षयति स्वेदस्य केशविधृतिरिति केशा विधृति रोमाणाम
वलंबनं श्रेष्ठं कर्मेति वाक्यं येनुवर्त्तते तेनानिलेनलधारणं वस्तिपूरणं क्लेदधारणादीनि अन्यान्य
पि ज्ञेयानि अथ वैषम्यज्ञानं तद्रूपं च धा वक्ष्यती हि निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा संप्रा
प्तिश्चेति विज्ञानं रोगाणां पंचधास्मृतं इति तत्रादौ रूपं तस्यांतरंगत्वात् पूर्वरूपं तु रूपमेवाव्यक्तं व
क्ष्यति हि लिंगमव्यक्तमल्पत्वादिति वैषम्यं च द्वेधा वृद्धिक्षयभेदात् तत्रादौ वृद्धिलक्षणं तत्र वायो
राह वृद्धश्चेत्यादि कार्श्यं कृशत्वं कार्ष्ण्यं कृष्णवर्णत्वं उष्णाभिलाषः कंठमूत्रनेत्रत्वचां पीतत्वं द
तृषा विहती वेज्ञेयं समयोः साम्यलक्षणत्वात् दाहः संतापः अल्पनिद्रता निद्राल्पत्वम् आह श्लेष्मा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

७४१

ग्नीत्यादि अग्निसदनं अग्निमांद्यं प्रसेको लालाश्रावः आलस्यमनुत्साहः गौरवं दुर्वहांगत्वं श्वैत्यं शुक्ल
त्वं शैत्यं शीतस्पर्शत्वं श्लथांगत्वं अवयवशैथिल्यं श्वासकासौ रोगौ अतिनिद्रता निद्राधिक्यं रसः
स्याह रसोपि श्लेष्मवदिति श्लेष्मवदग्निसादादीन् करोति अपिशब्दादन्यान्यपि अतिदेशान्सूचय
यति तेनरक्तोपि तद्वत् मांसमेदसी श्लेष्मवत् रक्तस्याह रक्तं विसर्पप्लीहविद्रधीन् कुष्ठवातास्रेत्या
दि विसर्पादयो रक्तगतारोगाः तत्र उपकुशः दंतमांसरोगाः व्यंगः हृद्रोगः विशेषः संमोहो मूर्छा
त्वङ्नेत्रमूत्राणां रक्तत्वं मांसस्याह मांसमित्यादि गंडादयोरोगाः गंडो गलगंडादिः गंडयोरूर्वोरुदरे
च वृद्धिता स्थौल्यं कंठादिषु कंठ जिह्वातालुषु अधिमांसं मांसोपरिमांसं मेदसश्चाह तद्वन्मेद इत्या
दि तद्वन्मांसवत् अस्थ्नोपि चेदिति श्रमं श्वासं च करोति स्त्रियादीनालंबनं स्फिक्जौ प्रोथौ अस्थ्नः श्चा
ह अस्थ्यध्यस्थ्यधिदंतान्करोति अध्यस्थि अधिकमस्थि अधिदंता अधिकदंता मज्जश्चाह मज्जा नेत्रांग
गौरवं पर्वसु स्थूलमूलानि कुर्यात् अरूंषि चेति अंगगौरवं लोचनैर्नेत्र गौरवं नेत्रगुरुत्वमतिश
यार्थे पर्वसु संधिषु स्थूलमूलानि मूलप्रदेशे स्थूलानि [illegible] साध्यानि अरूंषि व्रणान् शुक्र
स्याह अतिस्त्रीत्यादि अतिस्त्रीकामता पुनःपुनः संगेच्छा अश्मरी रोगः कृच्छ्राविभ्यादि कुक्षौ उदरे
आध्मानादीनि करोति आध्मानं वातेनोदरपूरणं आटोपो गुडगुडाशब्दः [illegible] गौरवं दुर्वह
त्वं वेदना शूलत्वं शकृतपुरीषं मूत्रस्याह मूत्रं तु बस्तिनिस्तोदं कृतेप्यकृतसंज्ञामिति बस्तिनिस्तोदं

कृ टि ६

२।

[illegible]कृतमाह ३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वस्तिदेशाध्मानमपि मूत्रोत्सर्गमकृतमिव मन्यते स्वेदस्याह स्वेद इत्यादि अतिस्वेदः स्वेदाधि
क्यं दौर्गंध्यं दुर्गंधिता कंडुः दूषिकादीनाह एवं चेत्यादि दूषिका नेत्रमलः आदिशब्दात्कर्णमलादयः
एवमिति यथास्वाधिक्यस्वाशयगौरवादिभिः पुरीषादयवल्लक्षयेत् आदिशब्दात्स्वाशयव्य
थादयः अथ क्षयलक्षणं तत्र वायोराह लिंगेत्यादि अंगसादः श्रांतत्वमिव भाषितुं चेष्टितं च
क॰१ भाषितेहितं भाषितं वा चिकीर्षा ईहितं कायिकं कर्म संज्ञानुद्धिस्तस्या मोहो वचनासमर्थत्वं श्लेष्म
वृद्ध्युक्तामया अग्निसादादयः पित्तस्याह पित्त इत्यादि मंदोऽनलो अग्निमांद्यं शीतं हिमस्पर्शो निष्प्र
भाहानिः कांतिनाशः कफस्याह कफेत्यादि भ्रमश्च कारुठस्येव श्लेष्माशयानामुरःप्रभृतीनां
शून्यत्वं रिक्तत्वं हृद्द्रवोनुकंपयेव पीडा हृदयस्य श्लथसंधिता संधिशैथिल्यं रसस्याह रस इत्यादि
रौक्ष्यं स्नेहाभावः श्रमः श्रांतत्वमिव शोषो मुखादीनां ग्लानिः क्लमः शब्दासहिष्णुता श्रवणेद्वेषः
रक्तस्याह रक्त इत्यादि अम्लशीतयोरभिलाषः शिराणां शैथिल्यं रूक्षता शरीरस्य मांसस्याह मांसे
त्यादि ग्लानिर्निंद्रियदौर्बल्यं गंडयोः स्फिजोश्च शुष्कता संधीनां व्यथा मेदसस्याह मेदसीत्यादि क
ट्याः स्वापं स्पर्शाज्ञत्वं प्लीहो वृद्धिरतिरेषामंगानां कार्श्यं अस्थ्नःस्याह अस्थ्नि इत्यादि अस्थितो
दो स्थ्नां व्यथा दंतादीनां शातनं पातः आदिशब्दाल्लोमादयः मज्जस्याह अस्थ्नां शौषिर्यं सरघुत्वं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

743

भ्रमश्च तिमिरदर्शनं सर्वस्यैव वस्तुनस्तमोरूपत्वेनावभासः शुक्रेस्याह शुक्रेत्यादि शुक्रे संभो
गे चिरात्प्रसिच्यते लिः स्रवेत् शोणितमेव वा वृषणयोरत्यर्थं वेदना मेढ्रं धूमायति सह धूममिव भव
ति लोहितादिकषायं तात्पर्यस्यैव पदं पुरीषेस्याह पुरीषेत्यादि पुरीषे क्षीणे वेष्टयन्निव सशब्दो वायुः
कुक्षौ भ्रमति कदाचित् हृत्पार्श्वे पीडयन्निव ऊर्ध्वं याति मूत्रेस्याह मूत्रेत्यादि मूत्रक्षये मूत्रं कृच्छ्रात्
मूत्रयेत् विवर्णं रक्तमिश्रं वर्णेन रक्तमिश्रमिव वा एवकारेण रक्तवर्णाभासत्वं व्या
वर्तते अत एव वैवर्ण्यशब्देन तन्न भण्यते स्वेदेस्याह स्वेदेत्यादि केशानां रोम्णां च्युतिः केशां
चित् स्तब्धता त्वचः स्फुटनं विदारणं दूषिकादीनामाह मलानामित्यादि अति सूक्ष्माणां मलत्वा
नां सूक्ष्मत्वादि बहुलक्षणं मलायनं मलमार्गं नेत्रादि तस्य शोषादयः निदानमाह दोषादी
नामित्यादि यथास्वं विपरीतानां गुणानां लयेन निदानेन वृद्धिं वर्द्धनेन क्षयं जानीयात् तो च
ऋक्षादीनां बहुत्वात्स्वल्पाभ्यां क्षमाङ्गतः तत्र क्षये लोत्पन्नं विकारं वायोर्वृद्धिरिति व्यवस्थे
त वर्द्धनेनोत्पन्नक्षयः इति एवं पित्तादिष्वपि तथा मलानामप्यतिसंगात् निदानादोषा
दीनां वृद्धिं विघात् अति विसर्गात् क्षयं तत्रातिसंगो यथाकालमशोधनात् वेगधारणात् स्वे
मकाहारविहारशीलनाच्च अतिविसर्गो अतिशोधनाद्वेगोदीरणात् स्वसनाहारविहारसे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वनाच्च प्रयत्नतः पीडाकरत्वे नाऽऽत्ततप्यमाह मलोचितत्वादिति दोषादीनां वृद्धिर्देह
पीडनी क्षयस्तु न तथापि देहपीडनः कुतः मलोचितत्वात् देहो हि मलसात्म्यः सात्म्यं च
वृद्धिर्नाति बाधते क्षयस्तु हि विरुद्धो ह्यपि त्वादि मलोच्चयानां विशेषसंग्रहाकरः स्थ
स्मादिति दूष्याणां वृद्धिहेतुत्वादि विज्ञानार्थं दोषदूष्ययोराश्रयाश्रयिभावमाह तत्रा
स्थिनीति तत्र दोषादिषु मध्ये पृथोक्षु रसमांसमेदोमज्जशुक्रमूत्रपुरीषादिषु आश्रया
स्थ यिभावस्य फलमाह तेनेत्यादि आश्रयाश्रयिणामाधाराधेयभावेन स्थिता
नां यद्येकस्य वर्द्धनक्षपणौषधं तदेवान्यस्य कथं मिथः परस्परं यदाश्रयस्य तदाश्रयिणः ५५
यदाश्रयिणस्तदाश्रयस्येत्यर्थः वर्द्धनं वृद्धिहेतु क्षपणं क्षयहेतुः औषधं वैषम्यनिव
र्त्तकं साम्यहेतुरित्यर्थः अपवादमाह अस्थीत्यादि एतयोराश्रयाश्रयिभावे एवं
न ज्ञेयं यद्धि वायोर्वर्द्धनं रूक्षादि तदस्थ्नः क्षपणं यदस्थ्नो वर्द्धनं स्निग्धादि । तद्वा
योः क्षपणं अस्थ्नोर्वृद्धौ लंघनमौषधं वायोर्वृद्धौ बृंहणमौषधं अस्थिक्षये बृंहणं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

745

औषधं वातक्षये लंघनमौषधमिति अथोपक्रमणीयं विविधं चिकित्सामाह चिकित्सैव पुनः ज्यमानोप
शय उच्यते वक्ष्यति हि हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणां औषधान्नविहाराणामुपयोगं
सुखावहं विद्यादि चिकित्सा द्विधा बृंहणलंघनभेदात् तत्र बृंहणलंघने विभजति शाय इत्यादि वृद्धि
जान् विकारान् लंघनेन साधयेत् क्षयजान् बृंहणेन कुतो वं विभागः हि यस्माद्वृद्धिर्बृंहणेन भवति
सा च श्लेष्मानुगता यत्र यत्र वृद्धिस्तत्र तत्र श्लेष्मा पित्तादिवृद्धावपि श्लेष्मानुगमोस्तीत्यर्थः तस्मात्सर्वे २५
४६ वृद्धिजविकारेषु लंघनमौषधं हेतुविपरीतत्वात् श्लेष्मानुगमेन व्याधिविपरीतत्वात् तथा क्षयस्तद्वि
पर्ययात् तर्पणविपर्ययाल्लंघनाद्भवति स च वायुनानुगतः यत्र यत्र क्षयस्तत्र तत्र वायुः कफादिक्ष
येपि वायुरनुगमोस्तीत्यर्थः तस्मात्सर्वेषु क्षयविकारेषु बृंहणमौषधं हेतुविपरीतत्वात् वातानु
गमेन व्याधिविपरीतत्वाच्च एतत्सर्वं वायोरन्यत्र वायुवृद्धौ तर्पणं न हेतुः न वा लंघनमौषधमित्यर्थः तर्हि
तत्र किमित्यत आह तज्जांस्तु इत्यादि तज्जान् वायुवृद्धिक्षयजान् वृद्धिजान् बृंहणेन साधयेत् क्षयजा
न् लंघनेनेत्युक्तं मयाजनना वायुवृद्धि लंघनात् क्षयो बृंहणात् इत्येतद्वयं प्रायोग्रहणाद्व्यवचारोपि यथा २४
वृद्ध्येक लंघनसाध्येपि कर्त्तरि ज्वरगुल्मयोः तुल्येपि देशकाले च लंघनं न शमं मतमिति अथ केषांचिद्वि
शेषः तत्र रक्तवृद्धिजानाह विशेषादित्यादि रक्तं स्राव्यति शिराव्यधादिः मांसवृद्धिजान् रोगान् शास्त्र
शस्त्राग्निक्षारकर्मभिरिति मेदोजानाह स्थौल्येत्यादि मेदोवृद्धिजान् स्थौल्योपचा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रोगाद्धियोपक्रमणीयाध्यायोक्तेन भेदः क्षयजान् कार्श्योपचारेण अस्थिक्षयजानाह अस्थिसंक्षया
ना२ ज्जान् क्षीरघृतैस्तिक्तसंयुतैरिति वस्तिभिस्तिक्तघृतेति तिक्तसंयुतैः त्वाचरवारणादिः पंचकर्माणि
सर्पिषि सति तान्वस्तयस्तथेति न चैवं सति तिक्तसंयुतैरिति वास्तिनामेव विशेषणं वक्तुमुचितं वस्त
क्षीरसर्पीषिति तिक्तकोपहिताश्रयेद् इति चरकवचनात् मज्जः शुक्रोद्भवान् रोगान् भोजनैः स्वादुतिक्तकैः वृ
ष्यशुक्रं व्यवायाद्येर्यथान्यायं चक्रं हृष्टो विकं विडवृद्धिजानाह विडित्यादि अतिसारक्रियया तीसारचि
कित्सितेन विट्क्षयजानाह मेषाजयोर्मध्यमंतराविधिः माषद्रव्यं माषो राजमाषश्च आदिशब्दा
न्मत्स्यमांसादयः मूत्रवृद्धिक्षयोत्थांश्च मेहचिकित्सयेति मूत्रवृद्धिजान् मेहचिकित्सया मूत्रक्षयजा
व८ न्मेहचिकित्सया स्वेदक्षयजानाह व्यायामेत्यादि धातुजानामुपक्रमान्तरमाह स्वस्थानेत्यादि स्वस्था
नस्थस्य ग्रहणी उदरस्य ग्रहणी कलास्थस्य ग्रहणी कलाहि पाचक पित्तस्थानस्थस कायाग्रेरन्नपक्तुः
अंशाः सूक्ष्माणि रूपाणि धातुषु धात्वाशयेषु सर्वधातवग्नय इत्यर्थः तेषां सादेनु मांद्येन धातुवृद्धेरुद्भवः
अतिदीप्त्या धातुक्षयः धातुवृद्धौ मांद्योपक्रमः धातुक्षये तीक्ष्णोपक्रमः कार्य इत्यर्थः तथा रस
धातुः पूर्वो धातुर्वृद्धः परं वृद्धं कुर्यात् क्षीणः क्षीणं परधातुवृद्धौ पूर्वस्य क्षयः कार्यः क्षये वृद्धिरि
त्यर्थः इत्युपशयपर्यर्कणं वृद्धिक्षयविकारसंप्राप्तिमाह दोषाइत्यादि रसैर्मधुरादिभिर्दुष्टा दोषा वा
तादयो रसादीन् धातून् दूषयंति रसग्रहणं वीर्यादीनामुपलक्षणं उभये दोषधातवश्च मलान् पुरीषा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

747

दीन् तेमलामलायनानि स्रोतांसि दूषयंति कानिपुनस्तानि अधोदे गुह्यं गुदश्च सप्तशिरासि कर्णौ नेत्रे नासि
केमुखं च स्वेदवहानि रोमकूपाश्च मासंख्यत्वात् संख्यानुक्तिः अतोदुष्टेरनंतरं तेषु दुष्टेषु धातुमल
मलायनेषु गदास्युः कथं यथा तं तस्यामिति नामेणा स्थानविभागउक्तः संग्रहे वक्ष्यते वातजास्तत्र निदाने
वातरोगिके पित्तं त्वचि स्थितं कुर्यात् विस्फोटकमसूरिकाः रक्ते विसर्पं दद्रुं च मांसे स्याकोथनं सदाहानूमे
दसिग्रंथीन्स्वेदरक्तं वमनं भृशं अतिदाहं भ्रमं च गिंहारिद्रनखनेत्रतां पूतिपीतावभासं तत्रुक्ते भुक्त समा भु
श्रितं शिरागतं क्रोधनतां पुनापं स्नायुगं तथैव कोष्ठगं मदतडदाहान् व्यापिनोन्यांश्च यक्षिणः श्लेष्मा
त्वचिस्थितः स्तंभं तथा श्वेतावभासतां पांडुमयं श्लेष्मणि तु गोमांससंस्थो बुद्धेपचीः आर्द्रचर्मावनद्धमि
गात्रतां चातिगौरवं मेदोगः स्थूलतां मेहमस्थ्नां स्तब्धतामस्थिगः मज्जगः शुक्लनेत्रत्वं भुक्तस्थः भुक्ते संव ४
र्यं वि बंधगौरवं चातिशिरास्थः स्तब्धगात्रतां स्नायुगः संधि शून्यत्वं कोष्ठगो जठरोन्नतिं अरोचकाविपा
कौचतां स्ताश्च कफजान् गदान् विण्मूत्रयोः साश्रयोस्तत्र तत्रोपदेक्ष्यते उपतापोपघातौ च स्याश्च ये
द्रियगे मलइति ग्रथोजोविज्ञानं तस्यापि मलत्वात् वक्ष्यतिहि कफः पित्तं मलः खेषु प्रस्वेदो नखरोमच
स्नेहाक्षित्वग्विशामोजौ धातूनांक्रमशो मलाइति वहुतं संग्रहे भुक्तस्य सारमोजोतंतु भुक्तं तथा च नास्ति
न्मलसंभवः अन्येपुनरतएव तस्य नेच्छंति पाकमिति तन्न शारीरस्य भुक्त विषयं यत्तु संभोगादे गन्नागमाश
यगतमात्रवेनैकत्रैकलनीभूतं जीवाधिष्ठितं भुक्तं तस्यपाकादसादि न्मलसारीस्तः तत्र मलग्योजः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सारो गर्भः वक्ष्यति हि रसोदकं ततो मांसं मांसान्मेदोऽस्थि मेदसः अस्थ्नो मज्जा ततः शुक्रं शुक्राद्गर्भः प्रजाय
ते इति मलत्वेन गर्भापेक्षया रसाद्यपेक्षया सारत्वमेवेति श्रूयते चाह चरकः यः सारमादौ गर्भस्य यच्च गर्भरसा
द्रसः संहृत्य वर्तमानं हृदयं समाविशति देहिनः यः शरीररसस्नेहः प्राणा यत्र प्रतिष्ठिताः इति नैवेदमोजो नैक
त्वं नाव्यं यदेकं शुक्रे मलरूपमोजस्तदेव गर्भहृदयमनुप्रविश्य बिन्दुप्रमाणं प्राणैरेवानुविद्धत्वात्
ईषदुक्तं पीतं जीवानुविद्धं जीवशोणितमुच्यते उक्तं च तंत्रांतरे प्राणाश्रयस्यौजसोष्ट बिंदवो हृदया
श्रिताः तथा चरकोपि हृदि तिष्ठति यच्छुद्धं रक्तमीषत्सपीतकं ओजः शरीरे व्याख्यातं नाशान्नेति च
तद्धिनेति तदेवाहाररसेन समानगुणत्वात् आप्यायितमर्द्धाञ्जलिप्रमाणं सर्वदेहव्यापि रसात्मकमु
च्यते वक्ष्यति हि दशमूले शिरा हृत्स्था ताः सर्वं सर्वतो वपुः रसात्मकत्वेन वहन्त्योजस्तन्निबद्धं हि चेष्टित
मिति एवं रसादीन्व्याह्य रसधातोः परं धाम पच्यमानात्प्रसीदति सौम्यस्वभावं रसाग्रे तदोजः प
२६ रिकीर्तितमिति तदेव सर्वधातु ननु प्रविष्टितं तेषां प्रभावातिशयमादधानं तदोज उच्यते यथाह सुश्रु
तः रसादीनां शुक्रांतानां धातूनां यत्परं तेजस्तदोजस्तद्बलमित्युच्यते तदेव पुनः पाकाद्यामीकराणि
वापेतोपाधि मलमत्यंतं शुक्रसार उच्यते तदोजोहेतुत्वात् श्लेष्मणा ओजस्त्व अप्रसिद्धमिति नत्र एतेनैतदप्यु
पपन्नं धातूनां तेजसि रसे तथा जीवितशोणिते श्लेष्मणि प्राकृते वैद्यैरोजःशब्दप्रकीर्तितइति ओजसो
मलत्वे विपद्यपक्षु कथनं प्राधान्यख्यापनार्थम् प्राधान्ये हेतुमाह ओजस्त्वित्यादि ओजः पुनः परं प्रधानं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्मृतं तद्धि शुक्रांतानां धातूनां परं तेजः शुक्रांतानां ग्रहणं सर्वधातुप्राप्त्यर्थं तथा हृदयस्थं न केवलं
तत्स्व देहे व्याप्यापि देहस्थिति निबंधनं देहस्य स्थितयो नानावस्था तासां निबंधनं कारणं कारणमेव
विवृणोति यन्नाश इत्यादि क्षयहेतुनाह ओजः क्षीयते कोपक्षुध्यानशोकश्रमादिभिरिति क्षुत् बुभुक्षा
ध्यानं चिंता आदिशब्दाद् व्यवायकटुरूक्षादयः ओजः क्षयं लक्षयति बिभेतीत्यादि बिभेति त्रस्य-
ति दुर्बलो हीनबलो भवति अभीक्ष्णं पुनः पुनः अबाधमा ध्यायति चिंतयति व्यथितेंद्रियः हृदयादिस्था
नेषु व्यथावान् दुश्छायो मलिनकांतिः दुर्मना विगतोत्साहः रूक्षो निःस्नेहांगः क्षामः कृशांगः क्षयो बध
मो र्यावृद्धिहेतुमाह जीवनीयेत्यादि जीवनीया जीवंत्यादयः रसो मांसरसः अपिशब्दात्क्षीरादयः ओ
जोवृद्धिं लक्षयति ओजोवृद्धावित्यादि तुष्टिः संतोषः पुष्टिः स्थौल्यं बलोदयः शत्रुप्रकर्षः ओजोवृद्धेस्तु हंसनेप
क्षयादिहेतुत्वात् नवातादिवद्वृद्धिकारित्वम् वृद्धमपि यदा व्यापद्यते वा स्वस्थानात् तदा वातादिवद्वृद्धिका
रित्वं तथाचे सुश्रुते त्रयो दोषा बलस्योक्ता व्यापद्विस्रंसनक्षमाः बलमोजः वृद्धिस्तस्योज्ञातापदनुब
धं तत्संक्षेपेणाह यदन्नमित्यादि यद्यदन्नं द्वेष्टि तत्तत्त्यजेत् तथा यद्यत्प्रार्थ्यते तत्तत्समश्नन् तौ तौ वृ
द्धिक्षयौ जयेत् समश्नीयादित्यर्थः किं तत्सर्वमित्याह अविरोधि त्विति यत्प्रार्थयते तच्चेद विरोधि
अपथ्यं न भवति तत्समश्नीयादित्यर्थः तच्छंदे वीप्साकरणाद्यच्छंदेपि वीप्सा ज्ञेया न च यथा रूक्षयुपा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्वारव्यस्यानुचितत्वमाशंकनीयं हि यस्मात्‌ धातोषाविपरीते रुचिं कुर्वंति क्षीणा समाने चकारात्‌ वृद्धा
दोषाः समाने द्वेषं कुर्वंते क्षीणास्तु विपरीते इत्यपि ज्ञेयं अयमेवार्थः तदा वायोर्वृद्धिस्तदा तद्विपरीतानां
स्निग्धादिगुणानां रुचिस्तत्समानां रूक्षादीनां द्वेष उत्पद्यते अतस्तु सेवनाद्विपत्यागाद्वायोर्वृद्धिः
जयेत्‌ यदा तु वायुः क्षयस्तदा तत्समानां रूक्षादीगुणानां रुचिस्तद्विपरीतानां स्निग्धादिगुणानां द्वेषः
उत्पद्यते अत एव तत्सेवनाद्धेनिषत्यागाद्वायोः क्षयं जयेत्‌ एवं पित्तादिष्वपि दोषधातोदोषधातु
मलानामुपलक्षणं रुचिद्वेषं पाचेण कदाचिदन्यथापि रुचिद्वेषौ भवतः मद्यान्यस्यपीति हि तामेव
रो वायौ वृद्धे रूक्षाभिलाषेण तद्विधौ यथायेन चेति एनं सत्यत्वेतार वांछितिमबुधान लक्षयंति ए
५८ तेन वृद्धिमता भिषजा परीक्ष्या यमुपचारः कार्यः मंदबुद्धीनां तु यथोपदेशमित्युक्तं भवति उक्तं च
संग्रहे यथोक्तसारणमेवक्षेयो मंदबुद्धेरिति उक्तयोः रुचिद्वेषयोरुपपत्तिमाह यथाबलमित्या
दि वृद्धादोषाः रूपाणि रोक्षादीनि चितन्वंते विशेषेण प्रकटयंति तान्येव क्षीणा जहति न्यूनानि
दर्शयंतीत्यर्थः यथाबलं वृद्धाः अधिका अधिकतरा अधिकतमाः वृद्धानि वृद्धतराणि वृद्धतमा
नि एवं क्षीणेष्वपि यथा स्वं वायुः रौक्षादीनि पित्तमौष्ण्यादीनि श्लेष्मा स्नेहादीनीत्यर्थः एतदुक्तं
भवति शरीरे यो यो धातुको गुणो भवति तस्य तस्य द्वेष उत्पद्यते यो यो हीनं तस्य तस्य रुचिरुत्पद्यते

घ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

५१

वायौ वृद्धे रूक्षादयः शरीरे व्याधिका भवंति तत्तत्तेषां देहे बद्ध्यते सीदंत एव हीना अतस्तेषां र
द्धिः एवं पित्तादिष्वपि समेषु पुनर्देहेषु अपूर्वो रुचिर्द्वेषो नोत्पद्यते इत्यत आह समास्त्वं कर्म कु
र्वते इति स्वशब्देन देशकालजातिवयोनुरूपं शारीरं कर्मोच्यते न दोषकर्म तस्य यथा स्वमित्व
नेन लब्धत्वात् तस्माज्जात्यादिवशाद्यस्य यथा रुचिर्द्वेषो तस्य तथैवानुवर्त्तयंति समा दोषा
नान्यथा कुर्वंतीत्यर्थः दोषवैषम्यानुत्पादने यत्नं विधत्ते यत्त्वेत्यादि हित चर्यापापथ्याभ्या
माहारविहाराभ्यां चरते रोगीति भक्षणार्थत्वात् एवं प्रकारेण हितचर्यायायोगोऽहितचर्या
यायोगो वा वर्ज्यते इति हेमाद्रिटीकायामायुर्वेदरसायने दोषादीनां प्रकरणं सांगत्वेन निरू म६
पितं दोषभेदीयमध्यायं व्याख्यातुं प्रतिजानीते अथातो दोषभेदीयमित्यादि यतः पूर्वाध्या
ये दोषादूष्यमुक्तं तदग्र दोषभेदा दत्तुधाभिधीयते दोषभेदज्ञानार्थमयमध्यायः अतः एवायं दो
षभेदीयः तद्भेदश्च स्थानकर्मावस्थाहेतुत्वाद्गतिसाधनसंयोगभेदाद्भवति तत्र स्थानतो यथा
चितो यः प्रकुपितो यं हेतुतो यथा मिथ्यायोगकुपितो यं अतियोगकुपितो यं अयाकृतितो
यथा स्वसलक्षणो यं व्यासलक्षणो यं साधनतो यथा स्निग्धोपशमो यं उष्णोपशमो यं संयोगतो
कदाशयस्थो वायुः कटिस्थो यं कर्मतो यथा स्वासोच्छ्वासप्रवर्त्तको यं अवस्थातो यथा वृ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यथा पित्तयुक्तो पंथः श्लेष्मयुक्तो वा मिति एवं पित्तादिष्वपि तत्रादौ स्थानतो भेदः स्थानं द्वेधा सामा
न्यविशेषं च तत्रादौ सामान्यं तत्र वायोः स्थानमाह पक्वाशयेत्यादि पक्वाशयो नाभेरधः पक्वा
२२ न्नस्थानं कटिश्रोणीत्यादि विह्वं सक्थि जंघोतं श्रोत्रं कर्णौ स्पर्शनेंद्रियं त्वक् तत्र तेषु स्थानेषु मध्ये
पक्वाधानं पक्वाशयो विशेषतः स्थानं पित्तस्याह नाभिरित्यादि आमाशयो नाभेरूर्ध्वमपक्व
स्थानं लसीका स्वादुः समलो जलप्रायस्त्वगाश्रयः दृक् चक्षुः स्पर्शनं त्वक् अत्र एषु स्था
नेषु मध्ये नाभिर्विशेषतः स्थानं कफस्याह उरः कंठेत्यादि उरो वक्षः क्लोम उदकवहस्रोतोमू
लं हृद् हृदि स्थितो मांसग्रंथिः पर्वाणि संधयः घ्राणं नासा एषु मध्ये उरो विशेषतः स्थानं पृथ
विशिष्टं स्थानं कर्म च सामान्यं कर्म उत्साहादेः पूर्वाध्याये निर्दिष्टत्वात् तत्र वायोर्विशेषमा
ह प्राणादीनि प्राणादयः प्राणोदानव्यानसमानापानाः पंचात्मा पंच विशेषाः प्राणस्य स्थान
कर्माण्याह प्राणोत्रेत्यादि प्राणस्य स्थानकर्माण्याह प्राणोत्रेत्यादि प्राणस्य मूर्धा स्थि
तिस्थानं उरः कंठश्च विचरणस्थानं बुद्ध्यादिधारणं ष्ठीवनादिकरणं च कर्म हृदयं मनो धि
ष्ठानं चित्तं मनः इंद्रियाणि चक्षुरादीनि उदानस्याह उरः स्थानमित्यादि उदानस्योरो वसतिः
स्थानं नासादि विचरणस्थानं वाक्प्रवृत्त्यादिकं कर्म प्रयत्न उत्साह ऊर्जा प्रीणनं व्यानस्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ह व्यान इत्यादि व्यानस्य हृदयमवस्थितिस्थानं सर्वशरीरं विचरणस्थानं गत्यादयः सकलाः क्रि +53
याः कर्म अपक्षेपणमंगस्याधोनयनं उत्क्षेपणमूर्द्धनयनं तस्मिन्नतिवद्धात्तदेवानिष्ठा घा
महाजवः प्राणादिभ्यो वेगवान् समानस्याह समानोऽग्नीत्यादि समानस्याग्निसमी
पमवस्थितिः स्थानं सर्वकोष्ठो विचरणस्थानं अन्नस्य ग्रहणं गृहीतापाचनं पक्वा
सारविवेचनं विविच्य किट्टमोचनं च कर्म अग्निसमीपमग्निस्थानमन्नस्य
गृहीतापाचनस्यास्याग्नेरुद्दीपनकाराः अपानस्याह अपान इत्यादि अपानस्या ६६
पानं गुदमवस्थितिः स्थानं श्रोण्यादि विचरणस्थानं शुक्रादिनिष्क्रामणं क
र्मवास्ति मूत्राशयः मेढ्रो मूत्रमार्गः गोचरो विचरणविषयः पित्तविशेषा
नाह पित्तं पंचात्मकमिति पाचकरंजकसाधकालोचकः भ्राजकभेदा
त्पंचधा पित्तं पाचकस्य स्थानं वामीत्याह तत्र पक्वेत्यादि पाचकस्था
पक्वामाशयमध्यं ग्रहण्याख्यं स्थानं अन्नस्य पचनं प्रकासारकिट्टविभागो रंजकादेवनु
ग्रहानुग्रहकर्म कीदृक्तत्रयत्नं पंचभूतात्मकत्वेसत्यपि तेजोभूतगुणाधिक्यात्स्यात्द्रवत्वे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तथा पाकादीनामग्निकार्याणां करणादनलसंज्ञयोक्तं एतेन पाचकापेक्षयाग्नि
पित्तयोरभेदो रंजकाद्यपेक्षया भेद इति मतद्वयं व्यवस्थापितं तत्र स्वस्थानस्थं रंजकस्या
ह आमाशयेत्यादि रंजकस्यामाशयस्थानं रसरंजनं कर्म साधकस्याह बुद्धीत्यादि सा
५८ धकस्य हृदयं स्थानं बुद्ध्यादिद्वारेणाभीष्टसाधनं कर्म अभिमानोऽहंकारः आलोचकस्याह रू
पेत्यादि आलोचकस्य दृष्टिः स्थानं रूपालोचनं कर्म भ्राजकस्याह त्वचीत्यादि भ्राज
कस्य त्वक् स्थानं त्वचो भ्राजनं प्रकाशनं कर्म संग्रहे तु तदभ्यंगपरिषेकलेपादीन् पाचय
तीत्युक्तं कफविशेषानाह श्लेष्मा तु पंचधेति अवलंबक क्लेदक बोधक तर्पक श्लेष्मक भेदा
त्पंचधा श्लेष्मा अवलंबकमाणाह उरःस्थ इत्यादि अवलंबकस्योरः स्थानं त्रिकाद्यवलंबनं
कर्म त्रिकस्य पृष्ठाधारस्य स्ववीर्येण आत्मप्रवेशनादवलंबनं करोति हृदयस्यान्नवीर्याच्च का
रात्स्ववीर्याच्च हृदयावलंबनेऽन्नवीर्यसकारि अन्नरससहितेनेति संग्रहवचनात् तत्स्थ
एवं शेषाणां कंठादीनां कफस्थानानां जलव्यापारेण क्लेदनतर्पणपूरणादिनाऽवलंबनं करो
ति केचित्तु बाहुग्रीवास्थित्रयस्य संघातं त्रीकमाहुः तदसत् त्रिकं पृष्ठवंशाधार

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवं रूढत्वात् रूढिस्तु योगाद्बलीयसी आसन्नत्वं च प्रयोजनं द्वितीयस्यामपि कफ
धामामवलंबनो नेः क्लेदकस्याह यत्तेत्यादि क्लेदकस्यामाशयस्थानं अन्नसंघातक्लेदनक
र्म बोधकस्याह रसेत्यादि बोधकस्य रसनेन्द्रियस्थानं रसबोधनं कर्म तर्पकस्याह
शिरःसीत्यादि तर्पकस्य शिरःस्थानं इंद्रियतर्पणं कर्म श्लेषकस्याह संधिश्लेषात् इति श्लेष
कस्य संधयः स्थानं संधिश्लेषणं कर्म प्रकरणार्थमुपसंहरति इतीत्यादि प्रायेण वाहुल्येन
यद्यपि सर्वशरीरव्यापिनस्तथापि अति… प्रायेणैतेषु तिष्ठंतीत्यर्थः अविकृतानामच्युता
त्मनां तु न स्थाननियमः इति स्थानकर्मप्रकरणं अ[illegible]सा च द्वेधा साम्यवैषम्यं च वैष
म्यं च द्वेधा क्षयो वृद्धिश्च वृद्धिर्द्वेधा चयप्रकोपभेदेन चयप्रकोप नयसाम्यभेदाच्च तत्रावस्थाः
तत्र नयसाम्यप्रशमस्य भेदो नोपात्तः निष्पाद्यमानस्य प्रशमस्य क्षयरूपत्वात् निष्पन्नस्य साम्यरूप
त्वात् प्रशमहेतूनां प्रसादादिति योगेपुनः क्षयहेतुत्वात् क्षयहेतूनामपि प्रशमहेतुत्वाच्च तत्र च
यादिनिदानं तत्र वायोराह उष्णेत्यादि उष्णेन गुणेन युक्ता रूक्षादयो वायोः संचयं कुर्वीत त
एवेन शीतेन युक्ताः कोपं उष्णेन युक्ताः स्निग्धादयः शमं कुर्वन्ति पित्तस्याह शीतेनेत्यादि शीतेन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वा.टी.१२५

पुक्तास्तीक्ष्णादयः पित्तस्य चयं कुर्वते तएवोष्णेन युक्ताः कोपं शीतेन युक्ता मंदाद्याः शमं कुर्व
ते कफस्याह शीतेनेति शीतेन युक्ताः स्निग्धाद्याः कफस्य चयं कुर्वते तएवोष्णेन युक्ताः कोपं
उष्णेन युक्ताः रूक्षादयो शमं कुर्वते अथ चयादित्वमाह तत्र चयं लक्षयति चयो वृद्धिरिति दोषः
स्य वृद्धिश्चय सा च पूर्वमं स्वधाम्न्येव भवति यावानेवाशयः संचारवता दोषेण व्याप्तस्तावानेव निः
चारेण व्याप्यते स च संहरति रूपत्वात्संचयाख्यः ततः सर्व एव आशयो व्याप्यते तदा वृद्धिहेतुषु स
म६ मानगुणेषु द्वेषउत्पद्यते स च कोपप्राग्रूपत्वात्सकोपाख्यः ततः परस्थानं प्रविशति तदा विपरीत
गुणेच्छा चकारात्समानगुणेषु द्वेष अप्रसररूपत्वात्प्रसराख्यः कोपं लक्षयति कोपास्त्विति उ
स१८ मार्गगामितात्स्वमार्गादन्येन मार्गेण गमनं कोपः तत्र यदा पूर्वं स्थानमभिभूयान्यत्स्थानव्याप्तिः
तदा हि वातलिंगानां शैत्यादीनां दर्शनं समंतादन्यस्थानाश्रयणात् स्थानसंश्रयाख्यः ततो विकु
र्वाणो ज्वरादि रूपेणाभिव्यज्यते तदा स्वास्थ्यं प्रकृतेः स्पष्टयथार्थं स्वरोगरूपेणाभिव्यक्तत्वाद्व्यक्त्या
ख्यः ततस्तमेव रोगमवस्थांतरेणानुभवन् अवबध्नाति यदा रोगसंभवः संभवो दीर्घकालानुव
र्तनमिति यावत् सा अवस्था रूपभेदत्वात् भेदाख्यः एताश्च षडवस्थाः सुश्रुते स्पष्टमुक्ताः संच
यं च प्रकोपं च प्रसरं स्थानसंश्रयं व्यक्तिं भेदं च यो वेत्ति दोषाणां स भवेत् भिषक् तत्र भोजनं च

हे.१२५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शरदि प्रशमः पित्तस्य वर्षासु चयः शरदि प्रकोपः
हेमंते प्रशमः श्लेष्मणः शिशिरे चयः २

व१ 751

संचयेपेहतादोषाल्लभंतेनोत्तरागतीः ते चोत्तरासु गतिषु भवंति बलीयांस इति प्रशमं लभतीति स्वस्था
नेति स्वस्थानत्वं समत्वं प्रतिकूलत्वं चेति मिलितप्रशमलक्षणं रसवर्णस्पर्शाद्यन्यत्वं विकारः
चयादीनां कालमाह चयप्रकोपेति वायोर्ग्रीष्मे चयः वर्षासु प्रकोपः वसंते कोपः ग्रीष्मे प्रशमः
कालनियमे युक्तिमाह चीयत इति ग्रीष्मे आहारस्य देहस्य च लघुरूक्षत्वे करोति ताभ्यां लघु
रूक्षो वायुश्चीयते न तु कुप्यत्युष्णेन प्रतिबद्धत्वात् वर्षाकाल आहारस्याम्लपाकित्वं करोति ते
नाम्लविपाकेन पित्तं चीयते न तु कुप्यति शीतेन प्रतिबद्धत्वात् शिशिर आहारस्य देहस्य च स्नि
ग्धशीतत्वं करोति ताभ्यां स्निग्धशीतः कफश्चीयते न तु कुप्यति शीतेन घृतवत् घनीभूतत्वात् का
लादाहारादीनां बलित्वमाह इति कालेति आदिशब्दाद्विहारो देशश्च लब्धोपि स्वकालं विनापि
यांति स्वकालेपि न यांति प्रकोपशमयोः शीघ्रविस्तारं व्याप्तिमाह व्याप्नोतीति सहसा वेगेन
मलो दोषः अल्पाल्पं चिरेण जलौघवत् नदीपूरवत् सहितैव न कृत्ये चिरेणाद्रयाते श्रयहेतु त
द्विशेषाणां निःशेषहेतुं ख्यापयितुमसंख्येयत्वात् सामान्यं वाच्यं तदेवाह नानारूपैरित्यादि वि
काराणामसंख्यत्वे प्रतिविकारं च रूपाणामसंख्येयत्वात् तद्वेतादि प्रतिविकारं वक्तुमशक्यं सा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धारणादुच्यते तत्र दोषहेतुरेव साधारणो रोगहेतुः तत्र युक्तिमाह दोषा इत्यादि दोषा एवकार
णं दोषाः कारणमेवेत्येकशब्दाभ्यामुच्यते अत्रार्थे दृष्टान्तद्वयं यथा पत्ती देशभेदे विहगाः॰ ज२
संबंधनं स्वज्याति तथा विकारो देहसंबंधं यथा च महदादि पृथिव्यन्तं कार्यं गुणसंबंधनं ज्याते
किं दोषजमेव दोषसंबंधनमपजतीत्याह तथा स्वधातुवैषम्यमित्यादि यो धातुर्यस्य रोगस्याधिष्ठानत्वेनोक्तः
स तस्य स्वधातुः तस्य वैषम्यं क्षयो वृद्धिर्वा विकृतत्वं उन्मार्गगत्वं तन्निमित्तं यस्य तत्तथा रसजानामपि दोषैर्विनानो॰
त्पत्तिः दोषकोपहेतुमाह तेषामित्यादि स च त्रिविधः असात्म्यविषयसेवा दुःकालो दुःकर्म चे
ति सोपि प्रत्येकं त्रिधा हीनयोगोऽतियोगो मिथ्यायोगश्चेति तत्रासात्म्यविषयसेवायास्त्रैवि
ध्यं लक्षयति हीनार्थेनेत्यादि इन्द्रियस्य चक्षुरादेः स्वेनार्थेन रूपादिनाल्पः संयोगः नैव वा संयो॰
गो हीनयोगः विकटोत्कटतया अनिवृत्तिहीनमामिसर्पः उत्कटानिवृत्तानपि सेवनमतियोगः सू
क्ष्मादिरूपसेवा अप्रसन्नवाद्यादिशब्दसेवा पूत्यादिगन्धवा अमेध्यादिरससेवा अतिशीतादिस्प
र्शसेवा च मिथ्यायोगः भासुरमतिदीप्तं भैरवं भयंकरं विप्रियं दुष्टं दुःकालस्य त्रैविध्यं लक्ष
यति कालस्त्वित्यादिना शीतोष्णवर्षाभेदात्त्रिविधः कालस्य शीतोष्णादीनामल्पत्वं हीनयोगः
श्वाधिक्यमतियोगः दुःकर्मणस्त्रैविध्यं लक्षयति कालेत्यादिना कायिकवाचिकमानसमे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देनत्रिविधकर्मणः प्रवृत्तेरल्पत्वं हीनयोगः आधिक्यमतियोगः वेगोदीरणादिरूपत्वं मिथ्यायोगः धार
णं वेगधारणं विषमैः दुःस्थितैरंगैः क्रि याया आरम्भः सात्विमृतस्यभाषणमद्धभोजने मौनः
त्यागः प्राणातिपातादिहिंसास्तेयेत्यादि दिनचर्याक्रमम् इहास्मिन्जन्मनि अमुत्रप्राग्जन्मनि संगृ
हेतु तएतेति योगादयः सात्म्यतोनुपलक्षणः सर्वे वा प्रज्ञापराधएवायं येषामपिवर्जनं स्वर्य
कर्मकालाः पुनस्सप्तयोगेनोपलक्षणात् भूयिष्ठं स्वास्थ्यहेतवस्तत्रापि रसवर्ज्या विषया यथाय
सकमर्के सिद्धिं यंबाधंते नुग्रहं तिशेषास्ते देहे अपि च सर्वभावाभावोनां तरेण योगातियोगादीन् व्यवसेत
न्ता सर्वेषां पुनर्विकाराणां निदानदोषदूष्यविशेषेभ्यो भावाभावविशेषा भवंति यदा ह्येते निदाना
सर्व। हि विशेषा नान्योन्यमनुबध्नाति ईषद्वानुबध्नंति अबलावान् तदाभिनिवर्त्तंते व्याधिश्चिरा
द्वाभिनिवर्त्तंते नवाभयंत्वसंपूर्णलिंगा वा विपर्यये तु विपरीताः तथान्यः प्रधानमेव रोगोन्यस्य प्रधा
नस्य हेतुर्भवति यथा ज्वरो रक्तपित्तस्य रक्तपित्तं वा ज्वरस्य तेद्वासस्य प्लीहा जठरस्य तेस्त्वयो अर्शांसि गु
ल्मोदरातिसारगृहणीदोषाणां प्रतिश्यायकासज्वरयोः रक्तपित्तः समस्यक्षमः शोषस्य एकस्मा
द्वानिमित्तएकस्य व्याधेर्बहूनां च तथा बहवः तद्वदेकं लिंगं एवमेकः प्रशमे प्रयुपायः तथासए

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वान्यस्य प्रकोपे तस्माज्ज्ञानवहितः सम्यगागमादिभिः परीक्षेत तत्रातो रोगमेकैकं प्र
कृतिकोपनमेवं योनिमेवमात्मानमेवमधिष्ठानमेव वेदनमेवं रूपशब्दस्पर्शगंधरस
मेवं पूर्वरूपमेवमुपद्रवमेवं वृद्धिस्थानक्षयान्वितमेवमुदर्कमेवं नामानं तस्मि
सू॰ ४ न्नियं प्रवर्तिकारस्य प्रवृत्तिरथवा निवृत्तिः प्रत्यक्षतस्त्वातुरस्य यथा स्वमिन्द्रियैर्वर्णे
संस्थानप्रमाणोपचयच्छायाविण्मूत्रछर्दितादि कूजनमंगुल्यादिसंधिस्फुरणं
देहे माकृष्णत्वादिगंधं शीतोष्णस्तंभस्वेदनश्लक्ष्णत्वखरस्पर्शांश्चैव प्रकृतिविकृतिप्रत्यनीकरसं
तु प्रश्नेन तथा सुखदुःखदर्शनं मृदुक्रूरकोष्ठानां स्वप्नदर्शनमभिप्रायं जन्मामयप्र
तिनसत्त्वादिवेष्वसुदुःखानि च तथा वयः प्रमाणेनानुमानेन तु प्रकोपसर्पणे
नशरीरवैरस्यं मक्षिकापसर्पणेन माधुर्यं तथाग्निं जरणशक्त्या बलं व्यायामश
क्त्या गूढलिंगं व्याधिमुपशयानुपशयतः दोषप्रमाणमुपचारविशेषेण आयुःस
द्रिष्टैः प्रकृतिसत्त्वसारसात्म्यवतामनुशीलनेनेति भवति चात्र ज्ञानबुद्धिप्र
दीपेन यो नाविशति योगवित् आतुरस्यान्तरात्मानं न स रोगांश्चिकित्सति इति द्विवि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

व्याधिस्वरूपस्याप्रकाशकौ तथैवैको गुरुव्याधिसंदेहे बलाप्रमापात् लघुव्या-
धिवदाभाति लघुव्याधिस्तुतोऽन्यथा वा ह्येवागममात्रेण तयोर्मुह्यति बालिशः ततोऽल्पमल्पं
दीर्घं वा विपरीतं मनोऽपथ्यं वा पथ्यं विपर्यये युंजन् प्राणान् मुष्णाति रोगिणां ज्ञानांशेन
नहि ज्ञानं कृत्स्ने ज्ञेये प्रवर्त्तते बुभुत्से तमपि षट्कं तस्मात् सर्वं तत्रानुशीलनात् सुभि-
युक्तस्तु सततं मालोच्य सर्वथा न जातु स्खलति प्राज्ञो विषमेष्वपि क्रियापथेष्वागंतुर
न्वेति निजं विकारं निजस्त्वागंतुमतिप्रवृद्धः तत्रानुबंधं प्रकृतिं च सम्यक् ज्ञात्वा
ततः कर्म समारभेतेद् इति दोषहेतुमुपसंहरति निदानमेतद्दोषाणामिति दोषहेतो
रोगहेतुत्वमाह कुपिता इति तेन निदानेनाप्यनेकधा विविधानीति हेतुत्वान्त्यात्
कोपानेत्य तस्माद्रोगाणां तत्र दोषा एव कारणमित्युक्तं तस्मिन्वीहार्थमाह शाखा-
कोष्ठास्थिसंधिश्चिति पत्नाखादीनामाधारत्वेन कारणत्वं तत्र शाखाव्याख्यापरे शाखे
त्यादि रक्तादयो धातवः त्वक् च शाखा सा च बाह्यरोगायनं बहिर्मार्गो रोगाणां
ते च रोगा मशकादयः मषव्यंगो सुद्रोगेषु गंडालसुखरोगेषु बहिर्मार्ग इति दुर्ना-

माद्दीनां विशेषणं अंतर्भागनिवृत्त्यर्थः कोष्ठं व्याचष्टे आमेत्यादि अंतरं तत्र मार्गे
णरोगाणां महास्रोतो महाविविरं आमाशयो यत्र मन्वंतीति वृत्तिपक्वाशयोय
त्रयं तत्स्थाना कोष्ठाश्रिताः अंतरमार्गं घुते पाद्दीनां विशेषणं बहिर्मार्गनिवृ
त्त्यर्थं समाहारद्वंद्वाद्देकवचनं नपुंसकं अस्थिसंधीन् व्याचष्टे शिरा इत्यादि मर्मा
णि मर्माणि बद्धाः शिरादयश्चास्थिसंधयः ते च मध्यमो रोगमार्गस्तदाश्रिता य
क्ष्मादयः यक्ष्मा राजयक्ष्मा च यक्ष्मवद्धः एकांगरोगः अर्दित मेकायामः ग्रह
स्तब्धत्वं संध्यास्थित्रिक्शूलादयः अपावृत्तिः तत्र वातरोगाणां लक्षणमा
ह स्रंसव्यासव्यध स्वापेत्यादि स्रंसः शैथिल्यं व्यासः संकोचनं व्यधः सूच्येव वि
द्ध्येव व्यथा स्वापः स्पर्शाज्ञानं सादः स्वकार्याक्षमत्वं रुक् शूलं तोदः सूच्येत्रैणे
व व्यथा भेदनं भिद्यमानस्येव व्यथा संगो वरोधः अंगउन्मार्गगमनं अंगेगे
न्तत्वात् भंगो वक्रता संकोचो अवसादयं वर्तनं पिंडीतत्वं हर्षणं कंटको

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्वं तर्पणं पिपासा कंपस्खलनं पारुष्यं रौक्ष्यं शोषित्वं वर्त्मसंधूलत्वं शोषमुखत्वं स्पंदनं स्फु
रणं वेष्टनं वलनं स्तंभो निष्क्रियत्वं कषायरसतारसांतरेण कषायेग्रहं अपाकः कपिलः
अरुणाईवद्रुतः संसादीनि कुपितवायोः कर्माणि पित्तरोगाणां लक्षणमाह पित्तस्येत्या
दि दाहः संतापः रोगो रंजनं वर्णांतरोपमर्दना स्ववर्णापादनं उष्णोष्मत्वं पाकित्तया
पाचकत्वं स्वेदो घर्मः क्लेदो मलार्द्रत्वं स्रुतिः स्रावः कोथः पूतिभावः सदनं सादः मू
र्च्छा मोहः मदो मदाशक्ति वमत्तता कटुकास्तिक्तौ रसः कषायति कमधुरत्वातादिषु मुख
क्रमात् इति वचनात् अथ श्लेष्मरोगाणां लक्षणमाह श्लेष्मण इत्यादि स्नेहः स्निग्धत्वं व
धः सश्लेषः उपलेपालिप्तत्व स्तैमित्यमालस्य पाकः स्वप्यः अपक्तिमपाकः चिरकारि
ता चिरेणरोगवृद्धिः संग्रहे तु अथ कुपितावातादयोनानाविधैर्विकारैः शरीरमुपता
पयंति अशीतितमात्तु वायोरशीतिर्विकाराः चत्वारिंशत् पित्तस्य विंशति श्लेष्मणः त
त्र वात विकाराः तद्यथा नखभेदः १ विपादिका २ पादशूलं ३ पादभ्रंशः ४ पादसुप्तता ५ पा
दखुञ्जता ६ गुल्मग्रहः ७ पिण्डिकोद्वेष्टनं ८ गृध्रसी ९ जानुभेदः १० जानुविश्लेषः ११ उरुसादः १२ उरु

कृ २

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तंभः १३ पंगुत्वं १४ गुदभ्रंसः १५ गुदार्त्तिः १६ वृषणोत्क्षेपः १७ मेढ्रस्तंभः १८ वंक्षणानाहः १९ श्रोणिभेदः
२० विड्भेदः २१ उदावर्त्तः २२ खंजत्वं २३ कुब्जत्वं २४ वामनत्वं २५ त्रिकग्रहः २६ पृष्ठग्रहः २७ पार्श्वावमर्द
नं २८ उदरावेष्टः २९ हृन्मोहः ३० हृद्द्रवः ३१ वक्षउद्धर्षः ३२ वक्षउपरोधः ३३ वक्षस्तोदः ३४ बाहु
शोषः ३५ ग्रीवास्तंभः ३६ मन्यास्तंभः ३७ कंठोध्वंसः ३८ हनुजाड्यं ३९ ओष्ठमर्दनः ४० दंतभेद
४१ दंतमर्दः ४२ दंतशैथिल्यं ४३ मूकत्वं ४४ वाक्संगः ४५ प्रलापः ४६ कषायास्यता ४७ मुखशो
षः ४८ रसाज्ञत्वं ४९ घ्राणनाशः ५० कर्णमूलं ५१ उच्चैःश्रुतिः ५२ बाधिर्यं ५३ वर्त्मस्तंभः ५४
वर्त्मसंकोचः ५५ तिमिरं ५६ अक्षिशूलं ५७ अक्षिव्युदासः ५८ भ्रूव्युदासः ५९ शंखभेदः ६०
ललाटभेदः ६१ शिरोभेदः ६२ केशभूमिस्फुरणं ६३ अर्दितं ६४ एकांगरोगः ६५ सर्वांगरोगः
६६ पक्षवधः ६७ आक्षेपकः ६८ दंडकः ६९ श्रमः ७० भ्रमः ७१ वेपथुः ७२ जृंभा ७३ ग्लानिः ७४
विषादः ७५ रौक्ष्यं ७६ पारुष्यं ७७ श्यावारुणावभासत्वं ७८ अस्वप्नः ७९ अनवस्थितत्वं ८० पित्तस्य
विकाराः पुनः ओषः १ प्लोषः २ दवः ३ दवथुः ४ निदाहः ५ सदाहः ६ त्वग्दाहः ७ अंतर्दाहः ८ धूमकः
९ अम्लकः १० उष्माधिक्यं ११ अतिस्वेदः १२ दौर्गंध्यः १३ अंगावयवदारणं १४ शोणितक्लेदः १५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स१

मांसक्लेदः १६ त्वग्मांसदरणं १७ चर्मस्वलनं १८ रक्तकोपः १९ रक्तविस्फुरः २० रक्तमंडलानि २१ रक्ता
पित्तं २२ हरितत्वं २३ हारिद्रत्वं २४ नीलिका २५ कक्षा २६ कामला २७ तिक्तास्यता २८ लोहित
गंधास्यता २९ पूतिमुखत्वं ३० तृष्णाधिकं ३१ अतृप्तिः ३२ आस्यपाकः ३३ गलपाकः ३४ अक्षिपाकः ३५
पायुपाकः ३६ मेढ्रपाकः ३७ जीवादानं ३८ तमप्रवेसः ३९ हरितहारिद्रः ४० नेत्रमूत्रवर्चस्त्वं
श्लेष्मविकारास्तु तृप्तिः १ तंद्रा २ निद्राधिक्यं ३ स्तैमित्यं ४ गुरुगात्रत्वं ५ आलस्यं ६ मुखमाधुर्यं ७
मुखस्रावः ८ श्लेष्मोद्गिरणं ९ मलाधिक्यं १० बलासः ११ हृदयोपलेपः १२ कंठलेपः १३ धमनीप्रतिचयः
१४ गलगंडः १५ अतिस्थौल्यं १६ शीताग्नित्वं १७ उदर्दः १८ श्वेतावभासता १९ श्वेतमूत्रनेत्रवर्चस्त्वं च
तत्र सर्वांगिणस्तीव्रो दाहः स्वेदातिमात्र ओषप्रादेशिकः स्वेदरहितात्यर्थविषवद्दाहः प्लोषः मु
खोष्ठतालुषु दाहो दवः चक्षुरादिषु दाहो दवथुः पादपाणिअंसमूलेषु विविधः संतापो
विदाहः कोष्ठदाहो अंतर्दाहः कोष्ठस्यांतर्मार्गस्य ग्रहणात् शिरोग्रीवा कंठतालुषु धूमायनं धूमकः
सांतर्दाहहृदयक्लमो मूर्छाम्लकः शोणितस्य तप्तस्य दौर्गंध्यातनुत्वादि क्लेदः मांसस्य तु कृतता शा२
दौर्गंध्यं वाह्यात्वक्तांहरति क्रमिः कोष्ठगो रवादाहारास्यस्य तृप्तिः अन्ये पुनराहुरनान

रो२

765

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पिनेदनात त्रिरिवत् त्रिरेनेवकः निद्रात्तस्येव विषयाग्रहत्वंतदुक्तं मित्यं तु प्रमील कइत्यन्येविपठंति
उपलेप इवोपलेपस्तद्दतिस्त्यः प्रतिश्यायो ऽति प्रग्रुणो ग्रसेगति मांसब्धो त्वं उरो पि बद्धोऽवसः
केषांचित् वेपथु उदर्दः अन्येपुनराहुः शीतपानीसंस्पर्शात् कीतकाले विसेषतः सरागगंडु शोफः स्या
६४ दुदर्दः सकपोद्भवति महाविकारास्तु यथास्वमुपदेक्ष्यते क्षुद्र विकारास्तु पुनर्यद्देवांगमाविशंति
तदुपपद मेवलभंतेनाम यथानखललाटशंखमेहाः सांतर्दाहकंठहृद्दोपलेपादयः तेषां हित
थैव स्वरूपमुपदिष्टं भवति लक्षणज्ञाने सावधानेन भवितव्यमित्याह इत्यशोवेत्यादि दर्श
नाद्येर्दर्शनस्पर्शनाभ्यासो लक्षणज्ञाने सावधानेन भवितव्यमित्याह अवस्थाविभागो
यथा आमज्वरो जीर्णज्वरो पच्यमानज्वर इति लक्षणदर्शनाभ्यासो लक्षणज्ञानुसहकारी
त्याह अभ्यासादित्यादि व्याधेस्त्रैविध्यमाह दृष्टेत्यादि अपचारो निदानं दृष्टकर्मजः अदृष्टकर्म
जः दृष्टादृष्टकर्मज इति त्रिविधो व्याधिः त्रयाणां लक्षणमाह यथेत्यादि यथानिदानं हेत्व
नात क्रमेणादोषेभ्यो दृष्टजः हेतुभिर्विनाजातः कर्मजोदृष्टजः पूर्वापचारजः अल्पेहेतौ महा
रंभस्तोकसारंभो दोषकर्मजः दोषक्षोभपूर्वकर्मत्वात् दृष्टजस्य दोषजत्वं तद्विपरीतत्वाददृष्ट

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

767

दोषवशात्तो भूयः सप्तविधः सकलोपि-वायं रोगसमूहः प्रतिकारवानायुर्वेदविहितोपदे
शमयेक्षते यस्मान्नियति हेतुकोप्यामयः सम्यगभिजानुदेशानुष्ठानादुपात्तायुः संस्कार
परीक्षपे सह्यवेदनतां प्रतिपद्यते अनुपक्रम्यमाणस्तु सर्वप्रायसोपि नत्य कोंडे स्वयं
मपि दैवानिशानाल्पतया वानिवर्तमाना बोडसगुणसमुदितक्रियोपलंभात् अप्युत्तर
मपरिक्लिष्टस्तु नाशमुपगच्छति अनियतफलान्यायिनि दैवविहिताभ्यासरतस्यावकाश
मेव लभते न व्याधिः तस्मान्न कस्याचिदन्वस्थायामात्मवान् हिताहितयोस्तुल्यदर्शी
दु० नस्यात् त्रिविधश्च पुनर्व्याधयो मृदुमध्याधिमात्रभेदेन तत्राल्पलक्षणो मृदवो मध्य
लक्षणामध्याः संपूर्णलक्षणास्त्वधिमात्राः ते पुनः सुखसाध्यादिभेदेन चतुर्धा प्राग
दिष्टाः सुबहुशोपि भिद्यमाना व्याधयो निजागंतुतो न व्यभिचरंति तत्र निजाः क्रिदोषो
त्थाः तेषु व्यथापूर्वमुपजायंते ततो दोषवैषम्यं दोषवैषम्येणैव बहुरूपागमनुबध्यंते
वर्द्धते च एवं चेद्दोषान दोषव्यतिरेकेण रोगानुबंधः केवलं पौर्वापर्यविशेषः तस्मादेका
एते रोगाः तथा रुक्सामान्यादसंख्यभेदा वा प्रत्येकं समुत्थानस्थानसंस्थानवर्णना
मवेदनाप्रभावोपक्रमविशेषाद्यथास्थूलं यथा समुपदेक्ष्यंते अप्रसंख्येयत्वाद्वा दोषलिंगै
ते पूर्वं वान्नादयो वैषम्यमापद्यंते ततोन्यथा निवर्तन्ते वा हेतुव्यागंतवः ४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रेवरोगाननुपक्रमं चवमजेत् शास्त्रेऽनुक्तं स्वयमूहनीयमित्याह विकारेत्यादि प्रोविकारस्य
वातजादित्वं जानाति नामन जानाति शास्त्रेऽनुक्तत्वादसंकीर्णत्वाद्वा सन् जिह्रीयात् न लज्जां कु-
र्यात् न हि नामाधीना सर्वत्र चिकित्सा वातजादिज्ञानं हि चिकित्सायां प्रधानं कारणं यथा सा-
धनं साधनज्ञानं च लक्षणज्ञानाधीनं तत्र लक्षणस्य दुर्बोधत्वमाह स एवेत्यादि स एव योऽन्य-
त्र लक्षितः बहून् विकारान् कुरुते येऽन्यत्र न दृष्टास्तत्र द्वौ हेतू समुत्थानविशेषात् कुपितत्वं
स्थानान्तरप्राप्तिश्च समुत्थानविशेषोऽन्यत्रादृष्टं समुत्थानं तस्माद्विकारादि त्रितीयज्ञा-
नपूर्वकमुपक्रमं कार्यः समयश्रोधमेव स्थानान्तरोपतिमयात् प्रकृतिः स्वभावोऽसाधारणं वि-
कं दुष्याद्येकादशज्ञाने सत्यव्यभिचार्युपक्रम इत्यत आह दूष्यमित्यादि दूष्यो धातुमलं
देशो भूमिर्देहश्च बलं सामर्थ्यं कालपूर्वाह्णादिः अनलो विषमादिः प्रकृतिर्वातप्रकृत्या-
त्यादिः वयो बाल्यादिः सत्त्वं मनः सात्म्यं देशसात्म्यादि आहारो मधुरादिः अवस्थारूपेष्व-
वान्तरं रूपं सूक्ष्मसूक्ष्माः अतिसूक्ष्माः एषां रोगाणां दोषौषधनिरूपणे दोषस्यौषधस्य च वि-
चारणे तत्रापि सर्वदेहपो वे लतात्पर्येण परीक्ष्यमित्याह गुर्वल्पेत्यादि संस्थानलक्षणं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्यथाकारं गुरोर्लघुत्वं अल्पस्यापि गुरुत्वं अवाहितत्वे दोषमाह गुरूमित्यादि अल्पोयं
दोषइत्यगणनया विप्रतिपद्यते विपरीतं जानाति विपर्ययज्ञाने दोषमाह ततोऽसं
त्यादि अयोगतो हीनयोगेन वा विपरीतमतिमात्रमतो वैर्यं वा विपर्यये लघुव्याधौ वपु
रपि अतिशयेन साधयन् यत्नदोषानेव अशोधयति मात्रायामभ्यासः कार्य इत्याह अतो
भियुक्त इति अथ संयोगः तस्य त्रिषष्टिभेदानाह नस्थतेऽतः परमिति दोषा दोषभेदा
विभेदः साम्यं तत्साम्यं चास्ति वृद्धौ क्षये चास्ति वृद्धिक्षययोस्तसाम्यं च भेदे कारणं तत्र वृ
द्धिसाम्यं त्र्यस्त्रयोदशातत्रपृथक् त्रीणि द्विद्वयवृद्ध्या प्रत्येकं वृद्ध्या पंचविंशतिरित्येवं
वृद्धेरित्युपसंहारात् वा रोतोव्य द्विशः साम्येन यथा वायुवृद्धः पित्तकफौ समौ पित्तं वृ
द्धं वायुकफौ समौ कफो वृद्धो वायुपित्ते समे संसर्गत्रिधा विद्धि वायुपित्ते वायुकफौ इ
ति तत्रैकैनु संयोगात् न विद्धि तत्र त्रीनु समया वृद्ध्या यथा पित्ते वृद्धे कफसमः वायु
पि पित्ते वृद्धे कफसमः वायुकफौ वृद्धौ पित्तं समः पित्तकफौ वृद्धौ वायुसमः एकस्यातिश
येन षट् यथा वायोः पित्तं वृद्धं कफसमः पित्ता वायुवृद्धः कफसमः कफाद्वायुर्वृद्धः पित्तं समः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वायोः कफो वृद्धः पित्तं समं पित्तात्कफो वृद्धो वायुः समः कफात्पित्तं वृद्धं वायुः समः एवं
द्वादश वृद्धेष्वेव समस्तेषु त्रयोदश संयोगान् विद्धि नन्वेकस्माद्द्वयोर्वृद्धयोः स्तोकान् य
था वायोः पित्तकफौ वृद्धौ पित्तात्कफवायू कफाद्वायुपित्ते द्वाभ्यामेकस्मिन् वृद्धे त्रीन
वातपित्ताभ्यां कफो वृद्धः वातकफाभ्यां पित्तं पित्तकफाभ्यां वातः तुल्याधिकैरेवं यथा वा
क५ तपित्तकफा वृद्धाः तारतम्यविकल्पेनाष्ट यथा वायुपित्तकफाः वृद्धतराः वृद्धतमाः एवं
वायुकफपित्तानि पित्तकफवायवः पित्तवायुकफाः कफवायुपित्तानि कफपित्तवायवः
एवं त्रयोदश एतं वृद्धौ पञ्चविंशतिं विद्धि तावत्संख्या तावन्तो वृद्धि वृद्धिस्थाने तावत्संख्याश
क्षयोगान्ज्ञेयाः वृद्धिक्षयसाम्येषु वृद्धवृद्धतरवृद्धतमस्थाने वृद्धौ एवं समपयोगा
न्ज्ञेयाः तेषां लक्षणमुक्तं संग्रहे दोषा एवं स्वास्थ्यमुपपद्य इति ह्रासस्वयेस्ययानुगं बद्धं हि दुर्बो
धत्वं विकारैरिति दृश्यते २ प्रकृतिस्थं यदा पित्तं वृद्धो वायुः कफक्षये स्थानादादाय गात्रेषु
यत्र यत्रावसर्पति २ तदा भेदश्च दाहश्च तत्र तत्रानवस्थितो गात्रदेशे तथास्यातां बलहा
निपरिक्षयौ २ प्रकृतिस्थं कफं पित्ते क्षये वायुर्यदा बली कृषौ कुर्यात्तदा शूलं सशैत्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

फ० २

स्तंभगौरवं ४ प्रतिस्थं यदा वातेपित्ते वृद्धे कफक्षये संरूणोद्धि तदाहः शूलं वास्योप जायते
॥५॥ प्रकृतिस्थं कफं वृद्धं पित्ते वायोः क्षये यदा संनिरुन्ध्यात्तदाकुर्यात्तंद्रागौरवं ज्वरं ६ प्रकृ
तिस्थं यदा वातं क्षीणे पित्ते कफोऽधिकः संनिरुन्ध्यात्तदाकुर्यात्तीक्ष्णं गौरवं ज्वरं ७ प्री
तकं शीतपूर्वकं ज्वरं प्रकृतिस्थं यदा पित्तं वृद्धश्लेष्मानिलक्षये संनिरुन्ध्यात्तदाकुर्यात्
मंदाग्नित्वं शिरोग्रहं ८ निद्रा तंद्रा प्रलापं हृद्रोगं गात्रगौरवं ष्ठीवनं पित्तकफयोर्नखादीनां
दो० ६ च पीततां ९ येषां वृद्धिक्षययोर्विकाराः कीर्तिताः पृथक् शोषेषु पितृतानेवं कल्पयेत्
यथायथं १० एकस्य द्वंद्वे वृद्धिः स्यात्त्रयः यथा वायुः क्षीणः पित्तकफौ वृद्धौ पित्तं क्षीणं क
फः समाः इति त्रिषष्टिभेदः स्वास्थ्यकारणं एते भेदा रसादिभिर्दूष्यैः प्रत्येकं संसर्गाद् बहवो
भवंति तथा एषां दूष्याणां क्षयादि भेदैः संसर्गात्तेऽपि बहवः तेषामेव तारतम्य भेदैः
संसर्गात्तेऽपि बहवः एवमानंत्यं जातम् अवहितमानसो जानीयात् यथा स्वस्वेन लक्षणेन
इति हेमाद्रिटीकायामायुर्वेदरसायने दोषभेदप्रकरणं सम्यक्स्येन निरूपितम् अथ दोषोपक्र
मणीयमध्यायं व्याख्यास्यामः इति जानीते लक्षणकथानंतरमौषधमारभ्यते तथेति दोषोपक्र
मस्यैव सर्वरोगौषधत्वात् उपक्रमणमौषधं तत्र वातस्यौषधमाह वातस्योपक्रम इति स्नेहः

कफवाते वृद्धौ कफक्षीणे वायुपित्ते वृद्धे
एवं द्विषष्टिभेदाः भवंति वायुपित्त ८

771

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वा·टी·१७८

स्नेहपानादिः स्वेदस्तापादिः शोधनं वमनादिः तत्र मृदुहीनयोगेन कृतं वेष्टनं वलितं वस्त्रादिना
समंतात्बंधनं त्रासनमस्माद्भयोत्पादनं सेकः सेचनं वस्तयो निरूहाः वस्तिनियोनुवासनं तस्य
वस्तिनान्नियमत्वात् सुखशीलता सुखाभ्यासः स्नेहास्तैलादयः तिलतैलात शीतं तैलगोघृत
महिषघृतादिभेदाद्नेकयोनयः दीपनैश्चित्रकादिभिः पाचनैः मुस्तादिभिः सिद्धाः पक्वाः
स्नेहानां पुनर्वचनं यथाकथंचिदपि वातघ्नत्वज्ञापनार्थं मद्यं मेदुरं यत् पिसितं मांसं त
स्यरसः तिलतैलमनुवासनं चेति ॥ एतत्त्रयं विशेषेणौषधं पित्तस्यौषधमाह पि
त्तस्य सर्पिषः पानमिति सुगंधशीतहृद्यानां द्रव्याणां चंदनादीनां येगंधास्तेषामुपसेव
नं कंठे गुणानां कंठावलंबिनां हाराणां मुक्तावलीनां येमणयस्तेषामुरसा हृदयेन धृति
उसीरं वीरणं पुंडरीकादिं विनापि यंत्रेण मुखं यन्मुखेन न यंत्रेण न करोति सुधामृदु
ला उद्यानदीर्घिकाः क्रीडावनवाप्यः सुतीर्थाः सोपानवर्तनैमार्गाः विपुलस्वच्छमयः श
लिलाश्रयः तस्य सैकतं सिकतामयप्रदेशः सांभोजे जलतीरयोरंतः संधिर्यस्मिन् सैकते
कायमानं सद्मनागारं सौम्याभावः मनः प्रसादनाय पदार्थाः पयः सर्पिर्विरेकश्चेति चतुर्थ
विशेषादौषधं श्लेष्मण औषधमाह श्लेष्मणो विधियुक्तमिति विधिनायुक्तं तीक्ष्णं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शोधनं तेक्ष्णेन शोधनेन व्यापदां संभवात् अत एव मृदुमध्यं वातपित्तयोर्युक्तं रतिः प्रीतिः
रत्यासंभोगे प्रीतिर्न तु रतिः वमनाद्युपक्रमं विशेषाद्दोषघ्नं सुखाय सुखसाधनाय धर्माय
निःसुखत्वे दुःखानुभावः नाधर्माय तस्य रोगमदहेतुत्वात् संसर्गसन्निपातानामौषध
माह उपक्रमइति यथास्वं स्वमात्मीयं विशेषमनतिक्रम्य प्रतिकल्पयेत् । यथा वातपित्त
संसर्गे वातपित्तौषधमेलनमविरोधेन तास्मिन्नेव वाताधिके वातौषधमाधिक्येन पित्ता
धिके पित्तौषधमाधिक्येन एवमन्यत्राधि संसर्गभेदानामौषधांतरमाह ग्रीष्मइति
मरुत् पित्ते संसृष्टे ग्रैष्मउपचारः कार्यः कफमारुते वासंतः कफपित्ते शारदः तत्र शारद
स्य कफपित्तघ्नत्वाद्युक्तो निर्देशः ग्रैष्मस्य पित्तघ्नत्वाद्वासंतस्य कफघ्नत्वादयुक्तः तत्रा
ह मारुतो योगवाहित्वादिति योगसंबंधं वहतीति निर्वहति ॥ द्वितीयस्यानुसारेणेति
योगवाहि तेन पित्तयुक्तस्य वायोः पित्तघ्नत्वे नोपशांतिः कफयुक्तस्य कफघ्नेनोपशां
तिः प्रायोग्रहणमनुचिताशयस्यत्यागोपि औषधकालमाह चयएवेति चयएव दोषं
जयेत् न कोपं प्रतीक्षेत अथ कथंचिद्व्यातिक्रमे कुपितं दोषं च जयेत् तं पुनरविरोधय
न् जयेत् कुपितो द्विविधः प्रकृतिसमसमवेतो विकृतिविषमसमवेतश्च तत्र पृथग्भेदा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

षस्वरूपतुल्यं रोगस्वरूपं द्वितीये विपरीतं यथा कफज्वरे कफविपरीतमुष्णत्वं तत्र ज्वरस्वरू
पस्य कफकोपविरोधित्वात् अत्युष्णोऽपि यूषं न कार्यं वक्ष्यति हि ऊष्मापित्ताहते नास्ति ज्वरो नास्त्यु
ष्मणा विना तस्मात्पित्तविरुद्धानि त्यजेत्ताधिके धिकमिति सर्वेषां युगपत्कोपाद्दोषवलीया
न्तं त्यजेत् शेषदोषमविरोधयन् संग्रहकरस्त्वाह तत्रामुद्गप्रयोगो हेतुयः मुद्गउपा
देयस्तस्मात्तयोर्लक्षणमाह प्रयोग इति दोषाणां परस्परं सङ्कत्युक्तं संग्रहे मुद्गमलम
लं जेतुं नात्यभावादुभावपि शेषादोषात्मकत्वाद्वनसाम्यतिपरस्परं शीतस्निग्धाम्लल
वणकफादि गुणतुल्यत्ता मिथ्याभ्रददृष्टा दोषे पुनातीनाम्यं जयंतीति आरंभकं विरोधेपि
मिथोयद्वद्गुणत्रयं विश्वस्य दृष्टं युगपत् व्याधेर्दोषत्रयं तथेति अथस्थानभेदोपक्र
मउच्यते तत्र दोषाणां स्थानांतरप्राप्तिप्रकारमाह व्यायामादिति व्यायामादिभिस्तु
र्भिः कोष्ठस्था दोषाः शाखाख्यं बहिर्मार्गं यान्ति मध्यं वास्थिमर्माख्यं तथा शाखास्थास्त्र
स्थिमर्मस्था वा स्रोतोमुखविशुद्धादिभिः कोष्ठं यान्ति अभिष्यंदनं द्रवीभावः कोष्ठस्था
किं कुर्युरित्याह तत्रस्था इति यत्स्थानं प्राप्तास्तत्र विलंबिता यावत् स्थानांतरगमने हेतुं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

७७५

नलभंते लब्धेहि तो पुनः स्थानांतरं यांतीत्यर्थः स्वस्थाने परस्थाने वाविलंबमा
दोषाः स्वैः स्वैः प्रकोपनैः कुप्यंतीत्याह ते कालादिबलमिति आगंतोर्दीनस्य हीन
बलस्य स्थानिचिकित्सा कार्येत्याह तत्रेति तद्दोषां स्वस्थाने यः कुपितस्तस्य चिकि
त्सां आगंतोरपि प्रबलस्य स्वचिकित्सैव कार्येत्याह स्वामेवेति आगंतुस्थानिनो
तुल्यबलयोः क्रमेण चिकित्सा कार्येत्याह आगंतुमिति स्थानिनं प्रतिकृत्यागंतुं
शमयेत् अथवागंतुं प्रतिकृत्य स्थानिनं शमयेत् प्रतिकृत्य प्रतिकारं कृत्वा प्रायद्
ति ज्ञात्वा कोष्ठप्रपन्नांश्चेत्यादि तिर्यग्गता शोधनमार्गं परित्यज्य स्थिताः अंतर्वे
त्वा५ र्द्धं वा शोधयितुमशक्यांश्चिरं क्लेशयंति अतस्तेषु त्वरया चिकित्सां कुर्यात
देहमग्निबलं च वीर्यं शनैः शनैः कुर्यादित्यर्थः तास्तिर्यग्गताः शमयेत् अथवा
सुखमक्लेशेन स्नेहेन स्वेदादिना प्रयोगेण कोष्ठमानयेत् ततऊर्ध्वमधो वा निर्हरे
त् अल्पत्वबहुत्वाभ्यां विकल्प्य स्थानि चार्यो अथ सदोषोपक्रमः तत्र सामल
क्षणमाह स्रोतोरोधेत्यादि निरामाणां लक्षणमाह निराममिति विपर्ययः:

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्रोतस्सु आमं रसं च मस्ताङ्गे मन्तं नरेण मन्दानलमाह
॰ऊष्मणेति ॰अन्योन्यमूर्छिता २

स्रोतोभ्यः स्वरूपः आमलक्षणमाह उष्मणा इति उष्मणो रसाग्नेः धातुं न दोषं मलं वा
आद्यं न रक्तादिकं रसं न रसस्यापि रसस्थमेव लौलिमावात सामत्वं व्याचष्टे आमेनेत्यादि
आमेदोषैर्धातुभिर्मलैश्च जनितारोगा अपि सामा उच्यन्ते सामेषु दोषेष्ववस्थाविशेषे
रा५ ण शोधनं निषेधति सर्वदेहप्रसृतानिति व्याप्तदेहान् धातुलीनानुत्क्लिष्टान् सामान्न
शोधयेत् ते हि दुर्निर्हराः स्वाश्रयस्थान्नाशयेयुः तानेव शोधनयोग्यान् कृत्वा शोधयेत्
दित्याह पाचनैरिति परिहृतेस्तान् शोधनयोग्यतां नीतान् तत्र पाचनैः पक्वत्वं दी
पनैः धातुभ्यः पृथक्कृत्वं स्नेहैरुत्क्लिष्टत्वं स्वेदैः कोष्ठगतत्वं यथासन्नत्वं व्याचष्टे
हेत्वाशु युक्तमिति आमाशयादामाशयमपि व्याप्य पक्वाधानात्पक्वाशयमपि व्या
प्नुवन् एतेषां पंचमी ऊर्ध्वं जत्रुस्थान जत्रुस्कंधसंस्थितस्योर्ध्वं जत्रुस्थस्य प्रवृत्तान् सा
मान्नस्तंभयेदित्याह उत्क्लिष्टानिति धारयेदिति स्वयंप्रवृत्तेषु सामेषूपेक्षैव मेव
जमित्याह प्रवृत्तानिति प्राक् प्रथमं यावन्न बलहानिः स्वयंप्रवृत्तेषु सविबंधेषु
पाचनं निर्हरणं वा कार्यमित्याह विबंधानीति पूर्ववद्विकल्पव्यवस्था ग्रथितौष
धकालमाह तत्रौषधं द्विविधं शोधनं शमनं च तत्र स्वस्थस्य शोधनकालमाह

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रावण इति स्वाधामणे वर्षि शीतोष्णरहिते हेतुर्गर्भवेदं विशेषणं संधि नियमेनासं ७७७
धौ शोधनं निषेधति अत्युष्णवर्षशीता इति संधाविति स्वस्थवृत्तमिति उष्णवृष्ट्यो:
वृष्टिशीतयो: शीतोष्णयोश्चापगमो ऽनु भावस्थासंधी: स्वस्थवृत्तमभिधेयत्वस्यो
वाराभिप्रायेण स्वस्थस्यापि रोगानुत्पत्त्यर्थं शोधनमुचितं व्याधितस्य शोधनका
लमाह व्याधाविति कृत्वेति प्रयोजयेत् व्याधिवशेन यदैव व्याधिरुत्पद्यते तदेव
प्राप्तावस्थावस्थात् प्राप्तावसरं समनोबधाकालमाह युंज्यादिति ग्रासेग्रास इति
यत्राहारे जीर्णे भेषजं भेषजे जीर्णे आहारस्तदन्नमभक्तं नाम यत्र गृहीत एव
भेषजे आहारदानादौ प्राग्भक्तं नाम: यत्रार्द्धे आहारे भेषजं पश्चात्शेषआहारस्तन्म
ध्ये भक्तं नाम: यत्प्रतिग्रासं युक्तमौषधं तद्ग्रासे ग्रासे सग्रासं नाम यद्भुक्तस्यांते वा भक्तम्४
पुनरौषधं तन्मुहुर्नाम यदाहारेण सहसाधितं मिश्रीकृतं चौषधं तत्सान्नं नाम
यत्र आदौ भेषजं ततोनंतरमेवाहार: ततोनंतरमेव पुनर्भेषजं तत्सामुद्गं नाम स
मुद्ग: संपुट: यद्रात्रौ स्वप्नकाले भेषज तन्निशि नैश्यं नाम एवं दशौषधकाला:

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अनन्नस्य विषयमाह कफोद्रेके गतइति अकृत्स्नतो यो योंशः औषधकालस्तदुद्रेके क-
फोद्रेकः तस्मिन्गते तदनंतरमेव प्राग्भक्तस्य विषयमाह अन्नादाविति मध्ये वि-
षयमाह समाने मध्यइति अधोभक्तस्य विषयमाह व्यानेत इति व्याने विगु-
णे प्रातर्भोजनस्यांते भेषजं उद्गारे उदाने विगुणे सायंभोजनस्यांते ग्रासग्रासां-
तयोर्विषयमाह ग्रासग्रासांते मुहुरौषधस्य विषयमाह मुहुर्मुहुरिति सान्नस्य
विषयमाह योज्यमिति सामुद्गस्य विषयमाह कंपेति निशौषधविषयमाह ऊर्द्ध-
जत्रुविकारेष्विति संग्रहे तु एकादशौषधकाला उक्ताः अंतरभक्तो यत्पूर्वाह्णे भु-
क्ते जीर्णे मध्याह्ने भेषजमुपयुज्यते तस्मिंश्च जीर्णे पुनरपराह्णे भोजनं एते-
न रात्रिर्व्याख्याता तदीप्ताग्नेर्व्याधिजेषामयेच्छिति पथ्या तत्राद्यं काले तत्र विरे:
चीतावरजीर्णे क्षुधितः सामभक्तं भेषजं वर्जयेत् शेषेषु चाहृद्यसात्म्यमिति ८
तीक्ष्णोग्रगंधं भूरिमात्रं च भवंति चात्र रोगमादौ परीक्षेत ततोनंतरमेव
जं तूतः कर्मभिषक् पश्चाद्ध्यानपूर्वं समाचरेत् २ निवृत्तोपि पुनर्व्याधिः स्वल्पेना-
यातिहेतुना दहेद्दाविः तेजोदोषः शेषः सूक्ष्म इवानलः २ तस्मात्तमनुवध्नी

भक्तसार

770

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

या प्रायोगेणानपायिनां सिद्धानामपि योगानां पूर्वे यां दानमावहन् ३ सात्म्या
त्म्यादिभावाच्च पथ्यं देव वत्वमागतं कल्पनाविविधैस्तैस्तैः प्रियत्वं गमयेत्पुनः ४ म
नसोर्थानुकूलेन तुष्टिरूर्जा रुचिर्बलं सुखोपयोगता च स्यात् व्याधेश्चातः परिक्षयः
५ लौल्याद्दोषक्षयाद्व्याधेर्वैषम्याण्यवचारिकैः तास्तु पथ्यापचारज्ञो योगैरनल्पैः प्र
कल्पयेत् ६ सम्पाहेन गुणाल्लाभे क्रियामन्यां प्रयोजयेत् पूर्वस्यां शान्तवेगायां न लद
पा६ क्रियासंकरो हितः ७ गुणोत्कर्षे पिताभेव विशेषात्वत्रौषधे भेषजं न्यस्तैहर्षमल्प
मल्पान्वयं मृदु ८ गुरुस्वागुरुमेव बहुगुणं बलं प्रजोजितं ... कार्ये विहितं तन्मि बडु६
त्रगुरुसंमतं आस्वादितं पथ्य चरैः स्वयं चानुप्रयोजयेत् उचितोपस्य देशस्य जं तस्यौ
षधं हितं १० देशे यत्रापि वसतस्तस्य तु गुणा जन्म च वीर्यं तज्ञाविनं संप्रवर्तुं स्वरसे
रसनाकं से ११ रसगंधादिसंपन्नं काले जीर्णं च मात्रया एकाग्रमनसो दत्तं ... मे
षजं त्वमृतायसे १२ भेषजमवचारयन् प्राजेव तावदातुरं परीक्षेत कस्मिन्नयं
जातः संवद्धो व्याधितो वा तस्मिंश्च देशे मनुष्याणामिदं आहारजातं एवं विहारं जा

तस्मात्बहुलमेवंविधंसत्वं एवंविधंसात्म्यमीषंशक्तिरिमे व्याधयो हितमिदम
हितमिदमिति प्रायोग्रहणेकेन वा निदानविशेषेण स्यकुपितो दोषो दोषस्येकस्या
पि वहवः प्रकोपहेतवः तस्माद्यथा स्वलक्षणैः कर्मभिश्च बुध्वापि दोषमवगमयेत्
तद्यथा किमाहारेण कुपितो वायुः किं विहारेण तथा रूक्षेण लघुनाशिशिरेणासा
हसेन वेगरोधेन भयेन शोकेन वेति ततश्च तत्प्रतिप्रत्ययमेवौषधं प्रयुज्यमानमाशुसि
द्धये संपद्यते तत्र मधुराम्ललवणाः कटुतिक्तकषायाश्चेतरेतरं संपृष्टाः पञ्चास्तदनंतरं
चापलमेतत् मृदुमध्यातिमात्रविकल्पनया कथं निदानमासेवितमेकरूपस्यापि
हेतोर्मृद्वादिभागेन पृथक् समवेतानां च दोषाणामंशांशबलविकल्पविशेषाच्चा
धेर्वलावलविशेषः तत्रानेकदोषात्मकेषु व्याधिष्वनेकरसेषु भेषजेषु दोषरसप्रभा
वमेकैकशोऽभिसमीक्ष्य व्याधिभेषजप्रभावतत्वं व्यवस्येत् नत्वेवं सर्वत्र नहि विकृति
विषमसमवेतानां परस्परेणोपगृहीतानामुपहतानां चान्येषामविकल्पे विकल्पि
तानामवयवप्रभावात्तत्समवगच्छेत् तथाकस्यधामाधिकायव्याधि रयमवस्थितं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

781

इतिनिर्दिश्यते तत्र इति स्तोहि दोषः स्वकीयमेव स्थानमातं कायाधितिष्ठन्मूर्द्धादौ दीर्घश्च वादुस्तरो
भवति ततः स्थानविशेषेण भेषजविशेषः पर्येषितव्यः तत्र अवमालोचयेत् कस्या
यमौषधस्य व्याधिरातुरो वा योग्यः किमतो वा दोषानुरूपो हि भेषजवीर्यप्रमाणविक
ल्पो व्याधितवलात्क्लेयो भवति सहसातिवलानि संशोधनौषधान्याग्नेयवायव्यान्यति
मा१ सौम्यति मात्राणि वा तथाग्निक्षारशस्त्रकर्माण्यप्यल्पसत्त्वमातुरमल्पवीर्यं वा निपातयुः संशम
नानि तु व्याधिवलादधिकानि तमुपशाम्य व्याधिं व्याधिमुपयान्ति ते शीघ्रमन्यमाहु इति शरी हे
रवलादधिकान् ग्लानिमूर्छामदमोहवलक्षयात् अपि वलादधिकानि ग्लानिमग्निसादं
च अपि चाति स्थूलोति कृशो ति दुर्वलो दुष्टमांसशोणितास्थ्यागावयवोल्पाग्निरल्पा
हारो सात्म्याहारोपचितसारतरदृढो वा व्याधिवलमेवतावदसमर्थः सोढुं पुनस्तथा
विधो भेषजवेगं तस्मादिदृशमवीर्यानुकारं मृदुसुखैरुत्तरोत्तरगुरुभिरपि भ्रमेरुपा
चरेद्दोषबधैर्विवात् अवलास्त्वनवस्थितमृदुविलवहृदयाः प्रायसकुमाराः परं स
त्ताप्यांश्च ततोपि विशेषेण स्त्रियश्च तथा वलव्याध्यातुरोस्य वलमल्पं च भेषज
मकिंचित्करं भूयएवदोषानुत्क्लेश्य व्याधिमुदीरयेत योग्यमपि चौषधमेवं परीक्षा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इदमेवंरसवीर्यविपाकमेवंगुणमेवंद्रव्यमेवंकर्म एवं प्रभावमस्मिन्देशे जातमस्मिंनेवैवं
न२ गृहीमेवंनिक्षिप्तमेवंनिषिद्धमेवमुपसंस्कृतमेवंसंयुक्तमेवंयुक्तमेयामात्रया एवंविध
स्यपुरुषस्यैवंविधेकाले एतावंतंदोषमयकर्षत्युपशमयतिवा अन्यदपिचैवंविधंभे
षजमभूत्ताद्यानेनान्येन विशेषेणप्रयुक्तमिदमकरोत् सूक्ष्माणिहिदोषभेषजद्रव्य
देशकालबलाहारसात्म्यसत्वप्रकृतिवयसामवस्थांतराणि यान्यनालोचितानि निहन्यु
रातुरं आलोच्यमानान्यपितु विपुलबुद्धिमपिचिकित्सकमाकुलीकुर्युः किंपुनरल्पबु
द्धिं तस्मादभीक्ष्णाशः शास्त्रार्थकर्मानुशीलनेनसंकुचितप्रज्ञां अपिचसंति व्याधयोयेशा
स्त्रेषुत्सर्गापवादैरुपक्रमंप्रतिनिर्दिष्टाः तत्रप्रज्ञयैवदोषादिगुरुलाघवेन सम्यग्व्यवस्येत्
अन्यतरनिष्ठायांकालश्च भेषजयोग्यतामापादयति सतुक्षणलव मुहूर्तादिभेदेन आ
तुरावस्थयाचद्विधोक्तः प्राकृतमपि च तत्र शीतोष्णवर्षलक्षणस्त्रयर्तवस्ते यो हेमंतग्रीष्मवर्षा
ख्यास्तेषामंतरे शोधनार्थं साधारणांवसंत प्रावृट् शरदाख्यास्त्रयो विकल्प्यंते तत्र शोध
नं प्रति फाल्गुनचैत्रौवसंतः आषाढश्रावणौ प्रावृट् कार्तिकमार्गशीर्षौ शरत् शीतोष्णवर्षा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तल्लक्षणस्त्रिविधः कालः तत्र शीतोष्णयोर्वृष्टिशीतयोश्चांतरेण साधारणो वसंतजल
यात्ययो ग्रीष्मवर्षाकालयोस्तु प्रारंभोनुबंधः प्रावृडिति विकल्प्यते तेषु साधारणेष्वाह
सुवमनादीनां प्रवृत्तिरित्तेषु योत्तियोगभयात् साधारणे हि मंदशीतोष्णवर्षात
या सुखत्वा दुर्बलंस्य विकल्पकाः शरीरौषधानां विपरीतास्त्वितरे तथा हि शीत
कालेतिमात्रशीतोपहतत्वाच्छरीरमत्यर्थं शीतवातविष्टब्धमिति स्तब्धबद्धगु
रु दोषं भवति तदनुप्रवृत्तं भेषजं संशोधनार्थमुष्णस्वभावमपि शीतोपहतत्वा
न्मंदवीर्यतां गतमयोगाय जायते शरीरं च वातप्रायोपद्रवाय तद्वद्वर्षास्वपि स
मंतात् प्रवृत्तिघनेन घनसंघातैर्वृत्तेन मस्तुपरुद्धे तेजः प्रसवे युद्दीनकरकीरणे बुज
ना५ लदपटलप्लावनोपमर्दमायां भूमौ प्रत्यर्थोपाक्लिन्नसर्वसन्नानलेवलमुद्दित
मल्लबलमाहारदुर्बलं शरीरं भवति औषधग्रामस्तु जलदोदरप्रततप्रमुक्तधारा
संपातसंभृतो वा नैव होपछावितमूलजालसारविटपो वहलीकोमलपत्रवापर
चीतस्वधर्मसारोंकुनरिव वालनतामुपगतोल्पवीर्यो भवति अपरिसंस्थितयाव

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्रिमलघ्नाभिर स्वादुविपाकाभिः खगमृगोष्ट्रपादिशावधातुमूत्रपुरीषस्प
र्शाभिरद्भिः सलिलपृषीकसानुविद्धशिशिरपवनसंपर्केन च धाराधरोष्म
णा कोमलत्वात् परिणतमस्य सस्यसन्ततेरविदाह्यते तेनासावपथ्यतामुपगतो
भुवमयोगाय प्रथमसंगृहीतमपि चौषधं तोयानुगतमारुतोपहतं जायते
इति ग्रीष्मे पुनरादानोपहतत्वात् शरीरमुष्णरूक्षवातातपाध्मातमतिशिथिल
मतिशिथिलमति प्रविलीनदोषं भवति भेषजं पुनरनुष्ण [illegible] मपि तपनतरु
णतरकरनिपाताद्दुष्मतीक्ष्णतामुपगतमति योगाय कल्पते शरीरं च पिपासा
भ्रमक्लमोपद्रवाय तस्मात् साधारणेष्वेव तरंतराहेषु वमनादीनि योजयेत् न वेदात्या
यिको व्याधिः आत्ययिके तु कृत्रिमगुणाधाने यथार्तुगुणविपरीतेन संयोगसं
स्कारप्रमाणादिकल्पनेनौषधापादितौषधमवहितो न वारयेत् आतुरावस्थासु तु काला
कालज्ञा तथा ह्यस्यामवस्थायामस्यौषधस्य कालोऽकालो वा न ह्यप्राप्तातीतका
लमौषधयोगिकं भवतीति औषधभेदाश्च संग्रहे दर्शिताः द्विविधमौषधमूर्जे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

785

स्करं रोगघ्नंच उभयमपिवोभयात्मकं वाहुल्येननिर्देशः तत्रोर्जस्करं द्विविधं रसा
यनंवाजीकरणंच रोगघ्नमपिद्विविधं रोगप्रशमनमपुनर्भवकरंच पुनश्चद्विविधं
अं२ द्रव्यमद्रव्यंच तत्रद्रव्यंत्रिविधं भौमौद्भिदजंगमंचेति तेषुवक्ष्यमाणं हेमादिलवण
णांतंपार्थिवंभौमं औद्भिदं पुनर्वनस्पतिवानस्पत्यवीरुधौषधिभेदेन चतुर्विधं भव
ति तत्रफलिनोवनस्पतयः पुष्पफलवान् वानस्पत्यः वल्लीगुल्मंचवीरुत् फ
लपाकांता ओषधिरिति जंगमोद्भवंतमधुघृतादि जंगमंद्रव्यमाहुः अद्रव्यंपुनरु
पवासादिनिलातपछायामंत्रसांत्वदानभयोत्रासक्षोभणहर्षणभर्त्सनस्वप्नजागरण
संवाहनादि तथात्रिविधमौषधं दैवव्यपाश्रयंयुक्तिव्यपाश्रयंसत्वावजयश्च त
त्रदैवव्यपाश्रयंमंत्रौषधिमणिमंगलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्व
स्त्ययनप्रणिपातगमनादि युक्तिव्यपाश्रयमाहारौषधयोजना सत्वावजयः पुनर
हितात्मनोनिग्रहः पुनरपित्रिविधमपकर्षणंप्रकृतिविघातंनिदानत्यागश्च ५१
तेपुनरपकर्षणादयो द्विविधावाह्याभ्यंतरभेदात् तत्रवाह्यमपकर्षणं ग्रंथा
वुर्दामयशस्मकृमिशाल्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दिशस्त्राहतयंत्रादिभिः आभ्यंतरं वमनविरेचनादिभिः प्रकृतिविधानेशमनं त
च्चबाह्यमभ्यंगस्वेदप्रदेहपरिषेकोन्मर्दनाद्यं आभ्यंतरंयदंतरमनुप्रविश्यवि
षोभयनदोषान्संशमयतिनिदानत्यागोयथादोषंशीतोष्माशनव्यायामादीनांव
र्जनंस्निग्धरूक्षाशनव्यवहारश्च तत्रशस्त्रादिसाध्येभेषजमुपक्रमतेनतुभेषज
साध्येशस्त्रादि पुनरपित्रिविधं हेतुविपरीतंव्याधिविपरीतमुभयार्थकारिच
तत्रहेतुविपरीतंगुरुस्निग्धशीतादिजेव्याधौरूक्षलघूष्मादितथेतरस्मिन्नितरत्तु
व्याधिविपरीतंद्वौमूलौपक्रमौतौचस्नेहस्वेदौपंचकर्माणिवमनादीनिधूमाज्य
पानादीनिच तथाविम्लापनोपनाहनपानादीनिच यत्रदोषप्रशमनत्वेसत्यपिज्वरे
विशेषतोहितंमुस्तपर्पटकं गूयवागूश्च प्रमेहेरजनीयवान्ने रक्तपित्तेचोर्द्ध्ववि
रेचनं अधोगेवमनं उभयार्थकारिपुनर्द्रव्यपानमद्यमौषधं यथाद्धीदर्द्न
मतिसारेनुलोमनं मदात्ययेमद्यपानंतुच्छदग्धेग्निप्रतापनं पित्तेंतर्गूढेविमार्गगे

न२ नो२

वात्वेदः कटुम्ललवणतीक्ष्णोष्णाम्लवत्हारस्त्रवहिः प्रवर्त्तनाय स्वमार्गोपचारादनाय
व श्लेष्मणोऽचांतर्निगूढे स्वल्पेबहिः शीतोपचारः तत्पीडितस्योष्मणोऽन्तःप्रवेशेन कफवि
लापनायेति एवंविधं स्वविपरीतमेव सद्वेषजं हेतुव्याधिविपरीतार्थंकरोति औषधंपुनः
द्विविधमेववाधनमनुवाधनंच तत्रसद्यःप्राणहरं वाधनं कालांतरेणानुवाधनमिति ॥
इतिहेमाद्रिटीकायामायुर्वेदरसायने दोषोपक्रमणीयस्तुसामस्त्येननिरूपितं अध्या
ति द्विविधोपक्रमणीयमध्यायं व्याख्यातुं प्रतिजानीते यतः पूर्वाध्याये दोषाणामुपक्रमउक्त
स्तस्येदानीं भेदा वाच्याः तत्रद्वौभेदौ मुख्यौ अतएवायं द्विविधोपक्रमणीयः उपक्रमभेदान
ह उपक्रमेति उपक्रम्यस्यरोगस्य द्वित्वात्सामनिरामं यल्लाघवायकार्यायत्तल्लंघनं बृंहण
लंघनेउदाहरति भवतइति यौममापांचद्रव्यं बृंहणं इतरदाम्ये यवापव्यनामसं लंघनमिति
विभागेनतेद्वेभवतः स्नेहादीनामुपक्रमाणां बृंहणेरूक्षादीनांचलंघनेंतर्भावमाह स्नेह
नंरूक्षणमिति भूतानां द्वैविध्यात्स्नेहनरूक्षणादिवं दुर्ब्यंकारणां पृथिव्यादीनां बृंहणलं
घनरूपद्वैविध्याव्यभिचारात् लंघनभेदानाह शोधनमिति शोधनस्य भेदं लंघनंचाह यदी

भेदेन बृंहणलंघनयोर्लक्षणमाह बृंहणमिति
यद्देहस्य बृहत्वाय स्थौल्याय तद्बृंहणं ५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रयेदिति निरूहइति यद्दोषान् वहिर्निःकाशयेत्तच्छोधनं तत्तु निरूहादिभेदात्पंचधा काय
परेकं विरेचनं शिरोरेकौ नस्यं शमनस्य लक्षणभेदं आह न शोधयतीति पाचनमि
ति यद्दोषान्न शोधयति वहिर्न निःकाशयति समान् विकृतान्नोदीरयति न विकृतिं नयति
विषमान् विकृतान्समीकरोति प्रकृतिं नयति तच्छमनं तच्च पाचनादिभेदात्सप्तधा क्षु
द्भृवर्जनं तदुदकवर्जनं शोधनशमनव्यतिरिक्तस्यौषधस्याभावात्तयोश्च लंघनमे
देत्वाद्बृंहणस्यानौषधत्वे प्राप्ते बृंहणं शमनमेवेत्याह बृंहणं शमनं त्विति शुद्धस्य पित्त
स्य [illegible] स्य वायोर्विषमस्य शमीकरणाच्छमनं बृंहणस्य विषयमाह बृंहयेत्या
दि ग्रीष्मेऽपरानपि स्वस्थानपि बृंहणान्याह मांसक्षीरेत्यादि मधुरस्निग्धैर्वस्तिभिः श
य्यासुखं निद्रां विनाशयने ऽवस्थानं निर्वृत्तिः संतोषः हर्षेणमानंदः लंघनस्य विषमाह य२
मेहामदोषेत्यादि आमदोषो जीर्णे लंघनभेदस्य शोधनविषयमाह तत्र संशोधनैरिति
व्याधिकुस्थौल्यादीन् लंघनीयांश्च शोधनैर्लंघयेत् पाचनदीपनयोर्विषयमाह आमदो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बृंहणे प्राप्ते निषेधमाह न बृंहयेदिति बृंहणीयेषु पुरुषेषु लंघनसाध्यरोगोत्पत्तौ ५

षेति विबंधगौरवेति मध्यस्थौल्यादिकानिति आमदोषादिभिरार्त्तान् मध्यस्थौल्यादिका
न्पूर्वं पाचनदीपनैर्लंघयेत् पश्चाच्छोधनैः सुत्तपोर्विषयमाह एभिरेवेति सुत्तमानिग्र
हैरिति एभिरामदोषादिभिः व्यायामातपमारुतानां विषयमाह दोषैस्त्वार्त्तानिति मध्य
बलैर्दोषैरार्त्तान् समीकरणादिभिर्लंघयेत् किंपुनरल्पबलैरार्त्तान् सुतरां हीनवलेगा
र्त्तान् लंघयेदेवेत्यर्थः लंघनीयेषु पुरुषेषु बृंहणसाध्यरोगोत्पत्तौ स्वल्पं लंघनं कार्यमित्याह ब
ह्यांस्त्विति देशादिवशेन त्वन्यथाप्युपाचरेत्याह पुत्तमाबेति तान् लंघ्यान् बृंहयांश्च अथ बृंह
तलंघनलक्षणं तत्र बृंहितस्य लक्षणमाह बृंहतेस्यादिति लंघितलक्षणमाह विमलेंद्रियतेति
सुत्तडिति व्याधिमार्दवमिति सर्गोमलानां मलप्रवृत्तिः अतिबृंहतातिलंघनयोर्लक्षणमाह अ
नपेक्षितेत्यादि अतिस्थौल्येति मात्रादेशकालादीननपेक्ष्यातिसेवितं बृंहणमतिस्थौल्यादीन्
कुरुते लंघनं त्वतिकार्श्यादीन् केते स्थौल्यादयोतिकार्श्यादयश्चेत्यत आह वक्ष्यतेतेचेति अति
स्थौल्यादीनां कार्यत्वात् कथं लक्षणत्वमित्यत आह रूप्यंते रैति यत्र कार्यैकसमाधिगम्यकारणं

बे।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्रकार्यमेवलंघनमित्यर्थः अतिस्थौल्यादीनाह अतिस्थौल्यापचीति कार्शस्यापीति
अतिबृंहणं कुर्यादित्यध्याहारः अतिस्थौल्यादीनामौषधमाह तत्र मेदोनिलश्लेष्मनाशनं
मिति कुलत्थेति रसांजनादीनां चतुरो योगानाह रसांजनस्येति शिलाजतुप्रयोगश्चेति सा
ग्निमंथरसइति चतुर्भिः संबध्यते अग्निमंथस्तर्कारी तत्स्वरसः विडंगादियोगमाह विडंगमि
ति यवामलकचूर्णमिति क्षारो यवक्षारः काले लोहरजो लोहचूर्णं व्योषादियोगमाह
व्योषकट्वीति हिंगुसौवर्चलेति निशे बृहत्याविति एषामिति सक्तुभिरिति अतिस्थौल्या
दिकानिति हृद्रोगकामलेति बुद्धिमेधास्मृतिकरमिति कंबुकान्मूलं कंबुकं स्वनामप्रसि
द्धं षोडशगुणे चूर्णापेक्षया पीतं शीतोदकेन संग्रहे तु गुर्वादि वह्निदीनश्लेष्मभिश्रा
न्नजो रसः आम एव श्लथीकुर्वन् धातून् स्थौल्यमुपनयेत् २ अतिस्थौल्यादति क्षुत्तृट्स्वेद
श्वासातिनिद्रताः आयासासमता जाड्यमल्पायुर्बलवेगताः २ दौर्गंध्यं गद्गदत्वं च भवेन्मे
दोतिपुष्टितः स्रोतःसु मेदोरुद्धेषु वायुः कोष्ठविशेषतः ३ चरन्स्य ज्वालयत्यग्निं क्षुत्तृषोस्य

सं४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गंधाविदार्यादिगणा वृष्याश्चो ष्ध्ययोहिताः लंघनोक्तेषु रोगेषु शेषेष्वप्युपकल्पयेत्
४ यत्तद्वृतेसमर्थः स्याद्घृत्ताभ्यासेनपुष्टये सघः दोषान्यतः सद्यो वृंहणो नोपचीयते
५ चिरं क्रमेण च क्षीणः तदभ्यासेन तत्र च वृंहणं देहमात्राग्निबलादीन्वीक्ष्य योजयेत् २ ६४
६ कृ व्याद्‌मांसरसांस्तस्यात् कलावीतो कालेघुनू नेसवारीक्षीतेस्तंजांगलेभ्य कृतान्
राप कृतान् रसांस्तथा च सौहित्येन स्तर्पणांस्तर्पणान्पुनः घुड्यात्क्षशानां ज्वरिणां कासिनांघू
त्रद्वा छिदिणां ८ तद्वतामूत्रबातानां मूढमारुतवर्चसां समक्षुन्माक्षितां तैलक्षौद्राज्या
द्वि सततर्पणः ९ मंथतक्दसिताक्षौद्रममदिरासक्तुयोजितः पाणिलं सक्तवः सर्पिदधि
कृप मंडोः ह्ल कांजिकेः १० तर्पणं मूत्रकृच्छ्रघ्नमुदावर्तहरं परं मंथ खर्जूरमृद्वीका वृत्ता
म्लाम्लकदाडिमैः ११ परूषकैः सामलकैस्सघस्तद्वातिरोगजित् स्वादुरम्लश्च व
लकृत्सस्नेहो रूक्ष एव च १२ सद्यस्तर्पणो मंथः स्थैर्यवर्णबलप्रदः इति स्थौल्यका
र्श्ययोः संक्षेपाद्दोषधमाह गुरुचातर्पणमित्यादि यवगोधूममित्यादि गुरुत्वेस
तिपरघः तर्पणं तस्थूलेहितं न पुत्वेसति यत्संतर्पणं तत्कृशेहितं यवाश्चगोधूमाश्च

क्र.सं. ७०१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

का.हि.१५९ 792

यव गोधूमं तदुभयोः स्थूल कृशयोः क्रमेण हितं तत्र तदुचितकृतकल्पनं यथा स्थूले
स्म२ तैलतक्रादि कृशे मद्याः कृशे घृतक्षीरादिसिद्धाः संगृह्णीतु स्थौल्यकार्श्ये पृथक्त्वात्पि
ष्यातां तत्राय विधिः संततं तु व्याधिवशात्सदा योज्यो विभज्य च मात्रादि युक्तो सेवेत
यस्त्वं बृंहणं लंघने समधातु वशाग्निदेहो सो समसंहननो भवेत् दृढेंद्रियबलत्वाद्धि न हि
दैराभिभूयते इति स्नेहनं रूक्षणं कर्म इत्यादिना सर्वोपक्रमाणां पृथक्त्वे पुंसामुक्त द्व १५
यं तथापि उक्तः इदानीं तेषां पृथक्त्वमेव कुत इत्यत आह दोषगत्येति दोषगत्यादो॰
परसत्वेन यथा यथा दोषाभिधीयते तथा तथोपक्रमाभिधीयते यथा प्रवृत्ति प्रवृत्ते दाहो ज्वर
त्रैमेदो दाहे शीतं शीते उष्णं इत्यादि पृथक्त्वे हेतुश्च ते पृथक्त्वं वास्ते नेत्याह न तु मे४
द्वित्वादिति द्वित्वान्नातिरिच्यंते बृंहणत्वं लंघनत्वं वा सामान्येन तस्य ज्यंति यथा नाना
विधा अपि गदाः सामत्वं निरामत्वं इति हेमाद्रिटीकायामायुर्वेदरसायने युपक्रमप्रक
रणं सामस्त्येन निरूपितम् अथ शोधनादिगणीयमध्यायं व्याख्यातुं प्रतिजानीते०

हे०१५९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

793 5

ग्रुयेप्ति तत्र वमनगणमाह मदनमधुकेत्यादि मदनो गालः मधुकं यष्टीमधुकं लवा
तुंबी निंबः पिचुमंदः बिंबी तुंडकेरी विशालाइंद्रवारुणी त्रपुसं वालुकं कुटजो वत्सकः
मूर्वा मधुरसा देवदाली जीमूतकः क्रमिघ्नं विडंगं विदुलो वेतसः दहनश्चित्रकः चित्रा
दंती चित्रांडकः पटोलफलं कोशावत्यो कटुकोशातकी राजकोशातकी च करंजो
नक्तमालः कल्याणं पीप्पली लवणं सैंधवं वचा उग्रा एलात्रुटिः सर्षपो रक्षोघ्नः
छर्दनानीति बहुवचनं गुणबहुत्वार्थं तेन वमनादिद्रव्याणां यस्य कस्य वित्रिक
चतुष्कपंचकाद्यैः प्रयोजकत्वं उक्तं च सुश्रुतेन सपस्य वर्गमर्द्धं वा यथालाभमथापि वा
पुंजीत भिषक् प्राज्ञो यथा दृष्टेषु कर्मसु इति उपलक्षणं चेदं अत एव संग्रहकारो धि
कमधीते मदनजीमूतकेक्ष्वाकुकोशातकी द्वयफलपुष्पपत्राणि कुटजकरंजत्र
पुससर्षपपिप्पली विडंगैला प्रसकपुष्पीहरेणुपच्छीकाकुस्तुंबरी प्रपुन्नाटानां
फलानि शारदानि हस्तिपर्णी कोविदारकर्बुदारश्वेतसुगंधानागविडंगलविं वीधु
जीवकश्वेता शाणपुष्पी सदापुष्पी वचा चित्रा चित्रकर्वा रुइंद्रवारुणी सुरवी
गो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हरि २

चतुरंगुलं स्याहुकटुकपाढापाटली शार्ङ्गेष्टामधुकमूर्वासप्तपर्णसोमवल्कद्वीपि
पिशुसुमनः सौमस्यायवानी वृश्चीवपुनर्नवा महासहा क्षुद्रसहे स्नुकांडकन्नक तिष्य
ली मूलंच विकसद्दीर्धीरमूलानि शाल्मलीशाल्मलूकामद्गुवर्णैः एवएवपोदकोः
दालक धन्वनरसांजन राजादनो एड चित्रागोपमूंगादिकापिच्छः प्रियंगुपुष्पंता-
लीशंपत्रं हरिद्राशृंगवेरकं दौर्मधूकदारुहरिद्रासारी तगुरगुडूची मधुकालितकी
रतवर्णानीति चव मनोपयोगीनीति विरेचनगणमाह निकुंभकुंभेति निकुंभोदंतीकुं
भविवृत त्रिफलाप्रसिद्धाः गवाक्षी श्वेतपुष्पं इन्द्रवारुणी स्नुक् स्नुही शंखिनी कालांजनीस
दृशी श्वेतपुष्पा नीलांजनीका निलिका तिल्वकोलोध्रुलंपाकः आरग्वधः कंपिल्लोरक्तां
गः हेमदुग्धाहेमावती कंकुष्टप्रकृतिः संग्रहेत्वाधिकमुक्तं त्रिव[illegible]र्मर्दंतीद्रवंतीशं
खिनी सप्तलाजगंधानमरंगी ववागवाक्षी छगलांत्री सुवर्णक्षीरी चित्रकको हीद्रस्व
पंचमूलं वृश्चीवपुनर्नवापलंकषाशालमूलानि विल्वकरस्पंदककंपिल्लं कपारली
त्वचः त्रिफलापिलूपियालवकूलवदरककंधु काश्मर्यपरूषकद्राक्षाशंखिनी क्षौ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

795

तिल्वकीरिके दिकार्या विडंग पूग पंचांगुलफलानि चतुरंगुलफलपत्राणि महावृक्षसप्त
र्णी ज्योतिष्मती क्षीरिणी क्षारमस्तु मद्यधान्याम्लमूत्राणि चेति विरेचनोपयोगीनी कोशात ८२
की देवदाली सप्तलाकारवेल्लिका स्वर्दंष्ट्रार्कक्षीरमृष्मोदकं चेत्यूर्मयात्मकानि निर्हरणमाह
मदनेत्यादि कुष्ठं पाकेलं दशमूलं महद्धस्व पंचमूले दारु देवदारु राम्नाप्रसिद्धा यवक्षी
रणास्फकः मिश्रा शतपुष्पा कृतवेधनं कटुकोशातकी कुलत्थः शिंबि धान्यमेदः
मधुमाक्षिकं संग्रहेत्वाधिकमुक्तं वस्तिषु तेषु तेष्व स्थानांतरेषु यान्युपयुज्यंते द्रव्या
णि तान्यसंख्येयत्वान्नोपदिश्यंते रसस्कंधे ष्व एव यथादोषं यथास्थं च विभजेत्
सर्वेषु प्रायो मदनकुटजजीमूतकेक्ष्वाकुकोशातकीकृतवेधनत्रपुससिद्धार्थकशताह्वाफ
लानि बलादशमूलैरंडत्रिवृद्वचा यष्ट्याह्व कुष्ठरास्ना पुनर्नवाकरस्त्रण मूलानि
सरलदेवदारुहरिद्रा हिंगुरसांजनेन व्योष पथ्येला मस्ता यव कोलकुलत्थाः गुड
लवणमस्तुधान्याम्लमूत्रस्नेहक्षीरक्षोद्राणि चेति नावनगणमाह वेल्लापामार्गौ
ति सुरालालघसर्जरसः शिरीषवृहती शिग्रूणां बीजं मधूकस्य सारः तार्क्ष्यशैले

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रसांजनं त्रुत्या वेलाद्वयं पृथ्वीकावाध्यिका संगृहेत्व्यधिकमुक्तं अपामार्गविडंगमरि
चपिप्पली शिरीषबिल्वाज्याजमोदावार्त्ताकपृथ्वीकैलाहरेणुफलानि तालीसतमाल
तर्करीहरितकवर्गपत्राणि शिग्रुफलपत्रं वचाहरिद्रामूलकलशूननागरकंदपत्रा
एवंति विषाकंदः कुष्ठंवचा भार्ङ्गी श्वेताक्षीणही नागदंती ज्योतिष्मती गवाक्षी वय
स्था वृश्चीकाली विंबी करंजमूलान्यर्कालर्कपुष्पफलानि रोधं मदनसप्तपर्णी निं
बपीलु बीजानि मुरंगी मातुलिंगी लवंगपुष्पाणि अगुरसुरदारुसरलशल्लकी
जिंगिण्यशानरसांजनहिंगुलाक्षानि धासाः शालताल मधुकदार्वीसाराः तेज
गुः स्वनी मेषशृंगी वरांगेंदं बृहतीद्वयत्वचः राजानेन्द्रमजाक्षीरं लवणानि मद्यानिग
वादि शकृन्मूत्रपित्तानि एवंविधानि चेन्द्रियोपशमनानां यान्यान्यपि तथा स्नेहं क्षी
रं रक्तं मांसरसो धान्यरसस्तोयमिति शिरोविरेचने पयोगीनि मधुकपद्मकमंजिष्ठा नो४
सारिवा मुस्तपुन्नागनागकेशरैलवालुकसुवर्णत्वकुतमालपत्रं पृथ्वीकाहरेणुला
साशतपुष्पाशल्लकी शर्करादमनकमरुवकन्यग्रोधोदुंबराश्वत्थप्लक्षरोधवेतकुप
श्मोत्पलानि सर्वगंधद्रव्याणि चकुष्ठतगरवर्ज्यानि प्रायोगीकधूमोपयोगीनि अगुर

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शैले॰ शिरोविरेकद्रव्याणि गंधद्रव्याणि च तीक्ष्णानि मनोह्वा
हरितालं चेति तीक्ष्णधूमोपयोगीनि ४

गुग्गुल शल्लकीं पद्मक नलद ह्रीवेर हरेणु रसमुस्ता ध्यामक वरांग श्रीवेष्टक स्थौणे
यक परिपेलवैलवालुक कुंकुम सर्जरस बब्बाह्व फलसार स्नेह मधूच्छिष्ट सावि
स्वफल मज्जतिल यव माष कुनखानि मेदो मज्ज वसा सर्पिषि वा स्नैहिक धूमोपयोगी
नि वातघ्नगणमाह भद्रदारु नतमित्यादि भद्रदारु देवदारु नतं तगरं वीरतर्वादि
विदार्यादि वक्ष्यमाणौ गणौ तयोर्मध्ये पुनरुक्तानि तानि द्विगुणं योज्यानि संग्रहे तु
३६ भद्रदारु कुष्ठ तगर वरुणा वत्साती बाला लांगल कच्छुरा वा ... कंकुरासी वत्सादन्य का वे ६
लकेतक किंशुक भार्ङ्गी कार्पासी वृश्चीकाली यवपहूर प्रभृतीनि विदार्यादि व
क्ष्यमाणगणो वीरतर्वादि त्रणवर्जानि वहूपंचमूलानि चेति वातशमनानि
पित्तघ्नगणमाह दूर्वेत्यादि अनंता दुरालभा गुंद्रा एरका शीतपाकी गुंजा स्थि
रेद्व शालपर्णी रवि विदारी ह्वयं स्व्यं कं स्व्यं सुदु मुस्ता न्यग्रोधादि पद्मकादि सारवा
दयो वक्ष्यमाणगणाः अत्रापि पुनरुक्तानि द्विगुणानि संग्रहे दूर्वानंता मोचरस

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मंजिष्ठापद्मपेलवकालाकोलीककहंसीकदलीपयस्यात्मगुप्तानारि
केलखर्जूरद्राक्षाविदारीवदरीबलानागबलानागपुष्पशतावरी
शीतपाक्योदनपाकीतृणमूल्याभ्रमताह्वयारिष्टादरूषकचेद्रुवि
पंगुधानुकीयवपन्वतस्पदनखदिरवदरपियालशालतालसं
जौतिनिशाभ्रकर्णीगुडूवानीरपयपद्मकपयबीजमृणालकुमुदन
३६ लिनसौगंधिकपुंडरीकशतपत्रोत्पलकह्लारवेतसफलकाकोल्युत्प
क५ त्तिकाश्यालूशृंगाटकसेरुकौंचादनप्रभृतीनि शीतवीर्याणि सारवादिः
पद्मकादिःन्यग्रोधादि दाहं महाकषायाणि पंचमूलेचेति पित्तशमनानि
हे.४ श्लेष्मघ्नगणमाह आरग्वधादिरिति एतेसप्तगणाः वक्ष्यमाणाः अत्रापि
पुनरुक्तानि द्विगुणानि संग्रहेतु शीतशाव पुष्पा शारल सुरदारु राश्नेगुदो
सातला सुमनः काकादनी नागलिका हस्तकर्णी भजातलामज्जप्रभृती

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न्यारग्वधादिरर्कादिरसनादिः सुरसादिर्मुष्ककादिर्वत्सकादिर्मुस्तादिः शीतघ्नो महाक
षायो वल्लीकंटकपंचमूले चैते श्लेष्मघ्ना मौलीति प्रथममहाकषायाः तत्र जीवनीय
गणमाह जीवनीत्यादि संग्रहेतु आनंत्यादौषधानामामयानां वानंता एवकषायाः ये
तुसुतरामुपयोगवंतः प्रकर्षवर्त्तिनो वा ते जीवनीयादिसंज्ञा प्रत्येकं दशकषायसंयोगा
त् पंचचत्वारिंशन्महाकषाया यो वक्ष्यंते तत्प्रतिपत्त्यर्थमेव मंदबुद्धीनां बुद्धिमतामुदा
हरणमात्रदर्शनार्थं शक्यंहि बुद्धिमद्भिः स्वादुशीतस्निग्धादीन् जीवंत्यादिषु साधा
रणान् आलोच्य क्षीरेक्षुसौद्रद्राक्षासाखोट विदारीबलपितद्रुमेषु जीवनीयादित्वमवि
धारयितुं यथोक्तानुसरणमेव कर्त्तव्यो मंदबुद्धेरिति व्यक्ता भ्रूते चत्वारिंशानि पंचाशद
धिकानि तदभिधान्येव यद्यपि च तानि तान्येव द्रव्याणीति द्रव्यसंकरः कषायेषु तथापि न संज्ञा
विरोधः कस्यापि बहुकार्यनिर्वर्त्तनात् तत्र लवणं नैमा रसाः कल्पनायां कर्षायकषायाइत्युच्यते
तद्योनित्वात् लवणे तु निर्योगादि कल्पनायामसंभवः पृथगुपयोगोपकाररहितत्वान्नैरर्थक्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मिति भवंति चात्र जीवंती काकोल्यौ द्वे मेदे मुद्गमाषपर्ण्यौ च ऋषभकजीवकमधुकं चेति
गणो जीवनीयाख्यः १ बाध्यो बलापयस्या काकोल्यौ वृषभनागजिगंधेच क्षीरणी राजसव
के भारद्वाजी वरं हंसली योयं २ बाध्यातिबलानयस्या ऋष्यगंधा विदारी क्षीरविदारी॰
क्षीरणी श्रीपर्णी राजसविकं हुधाका भारद्वा जीवनकार्पासी हेमवती खिर विल्वं मुस्ता
कुथं वचा हरिद्रे च चित्रक कटुकाभिविषा गणोयं लेखनीयाख्यः ३ हेमवती श्वेतवचा
शर्करणो चित्रा चित्रकाखिरविल्वशाखनी सरलाः हेमनीरी कटुको वृद्धिमुखीति भेदनी॰
या निं४ चित्रा दंती सरला तद्वृद्धिमुखी लांगली मधु मधुवा सालपर्णी कट्फल रोधु॰
प्रियंगु धातुकाः अंबष्ठकी च समंगा मोचरसश्चेति संधानः अंबष्ठकी माचिका हिंगु मरचा
म्लवेतस दीपकभल्लातकास्थिसंयोगात् वर्गः सपंचको लानिर्दिष्टो दीपनीयोयं ऐं अतिर
सायपस्या ऋष्य प्रोक्ता बलातिबलाः इति वल्यो दशकोयं हयगंधा रोहणी ऋषभी ७ ऐंद्री
इंदुवारुणी अतिरसा मूर्वा ऋष्य प्रोक्ता शतावरी रोहणी श्रीपर्णी ऋषभप्रोक्त पिवकः चंदनतुंग

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पयस्या सिता लता पद्मकोशीरं वर्ण्यो गणोऽयमुदितो मंजिष्ठासारिवासहितः तुंगंकिंजल्कं
सिताश्वेतदूर्वा लताप्रियंगुः हंसपदी वृहतीद्वयपंद्धीका सारिवेक्षुमूलानि कंठ्यं मधुकर
स्नाः सविदार्याकं ठजननानि कंठ्य वारफलः वृक्षाम्लबदरदाडिमकुवलाम्राम्रातकरमर्द
हृद्यं समातलिंगं विद्धि तथा साम्लवेतसं वर्गः कुवलं कोलं नागररुच्चिका चित्रकविडंग
मूर्वामृतं वचामुस्ताः सहपीप्पलीपटोलास्तृप्तिघ्नो गणप्रोक्तः॥२१॥ कुटजफलविल्वचित्र
कमहौषधीप्रतिविषावचाचविकाः धन्वयवासं पथ्या दारुहरिद्रौलोर्शघ्नः॥२२॥ खदिराम
लकारुष्करनिशाभयासप्तपर्णीवारवीराः कुष्ठघ्नाश्च तुरंगुलविडंगजातिप्रवालाश्च
२३ नलदहतमालचंदनसर्षपघनिंबकुटजमधुकानि कंडूं दारुहरिद्रासनञ्चावाला
विनघ्नंति॥२४ नलदं मांसीकुष्ठतमाल आरग्वधः अप्सीवमरिचकेवुकविडंगकांडीरक्रिमि
हिनिर्गुंड्यः घ्नंति क्रिमीन्स्वरंष्ट्रा वृषाखुपर्णी तथानखिरात॥२५ अक्षोवः शिग्रुकांडीरउग्रन्क
डः मंजिष्ठाश्लेष्मांतकरजनी सुवहाशिरीषपालिंघः शेलाचंदनकनकासिंडवारं विष
घ्नंति॥२६ सुवहागंधनाकुलीपालिंदीनववता शालिकुशकासवषिकवीरणदर्भमनुवा गद

801

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लिकेक्षुणां तद्वद्कुसेत्कटयो मूलमलं स्तन्यजननाय १७ इक्षुवालिका कुहेतुः पाठा
नागरसुरतरू घनामृतासारिवेंद्रयवमूर्वाः कटुकाकिराततिक्तं वर्गोयं स्तन्यशुद्धिकरः
१८ मेदाकाकोलीद्वयवृद्धरुहा जीवकर्षभकुलिंगाः शुक्रजननगणोयं सहजटिला
सूर्पपर्ण्योभिः १९ कुलिंगा कर्कटशृंगी जटिला उच्चटा कुष्ठैलुवालुकट्फलकांडेक्षुस
मुद्रफेनकोशीरैः वसुकेक्षुइक्षुरकैः शुक्रंशुद्ध्येत्सकदंबनिर्यासैः कांडेक्षुः राकाशः वसुक
कोबूकः इक्षुरकः कोकिलाक्षकः द्राक्षाकाकोलीद्वयमधुकजीवकर्षभविदार्यः स्नेहो
पगाः समेदाजीवंती सालपर्णीकः ~~रुचाम्लसाधियवमयष्टिकमातलुं~~गरा शोभांजन
कपुनर्नवयवश्चीवमाषकुलत्थबदराणि स्वेदोपगानि । विंशात्सयवतिलार्कोरुबूकाणिवृ
त्ताम्लदाडिमयवयष्टिकमातलुंगसेव्यानि जंघास्वन्ननानि निग्रहणानि मस्ना च २२ व
नागरधन्वयवासकवालकपर्पटचंदनगुडूच्यः भूनिंबघनपटोली कसुंवर्यतरवं घ्नंति तृ
२४ बृहतीद्वयवत्सादनीपुष्करमूला मयाकणाभृंगः हिध्मानिघ्नंति शठी दुरालभाव
दरबीजं च २५ श्यामानंतापद्माकर्द्वगः पद्मकेशरं रोध्रं धातकि सुमनसुमंगामोचरसो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्रास्थिविद्रुहणां २६ श्यामाप्रियंगुः अनंताधन्वजासकः पद्मचारणी जंबुकशाल्म
की मधवेनीलोत्पल्य कधरातिलांग्रीहृ तथा चम्रत्वं स्पासशा मूलो विद्रुरंजन
नामि २७ कदुराधन्वयासकः स्याहः श्रीवेष्ठः जंबा मोदुंबरवटक नीतनप्रत्तविप्य
लापमतं मल्लातसोमवल्कंकं मूत्रसंग्रहणाय निर्दिष्टं २८ कमलनलिनकुमदमधु
वा सौगंधिकधातकीलतापुष्पं मूत्रंजयति विरागं सोत्पलं शतपत्रं पुंडरीकं च
२९ मधुकधातकीलताकुसुमे प्योऽन्यानि पद्मानि लताप्रियंगुः कमलं त्रिवर्णं नलि
नं रक्तं शतपत्रं नीलं पुंडरीकं श्वेतं तानि दिवाविकसंति कुमुदं श्वेतं उत्पलं नीलं ते
चरात्रौ सौगंधिकं संध्यायां वत्सादनीश्वदंष्ट्रादर्भोत्वारु केवुकवशिरापिरकुश
काशाः मूत्रविरेचपेषुर्गुडूपाषाणभेदाश्म करिपिप्पली वशिरः द्राक्षामल
कपुनर्नवा वर्षावीचदुत्पाल भांषाकुस्माः कासंघ्नंति सप्तगोनामकीकं स्मा
रीच ३१ त्वंडामन्वेतससहौ मामलका सुरसाहिंगुजी वंसः पुष्करमूलैः
लागुरुवर्गोयं श्वासशमनाय ३२ द्रासापीलु परूषक मंजिष्ठा मतासारिवापा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गाः त्रिफला चेति गणोऽयं ज्वरसंशमनाय निर्दिष्टः ३२ दाडिमफलपरूषकपिया
लयवबदरीकेक्षुवदाराणि श्रमनाशनानि विंद्यात् द्राक्षा खर्जूर सहितानि प्रभक
प्रियाल तालजौ शीघं मधुकोत्पलसारिवासितोशीरं काश्मर्यफलचंदनमिषगणो
दाहहा प्रोक्तः नतनागरागुरुवचाहिंग्वेकमरीचिपिप्पलीचव्यः शीतंप्रशमयन्त्याचि
रात् श्योनाकश्चाग्निमंथश्च ३६ भल्लातकतालांतिंदुकपियालबीजकसप्तकदकदुर
खदिरबदराणि अहिमारवाजिकरणो कंकुमश्चोदर्दशमनानि ३७ काकोल्येला
सेव्यं निदग्धिकेसारीलघाद्विवलौर्धावधूर्वसंगमर्दममिचिराव्यंदनमधुकोककुबूकंचर ३८
दीप्यकमरिचाजाजी कंडीरं सान्नगंधमध्यमूलं सम्मूर्च्छयति सपंचकोलंकोकेश
मूलमागधंच ४० मधुमधकलाजगैरिक फलिनी मोचरसमत्कपालानि संस्थापयंति
रुधिरं रुधिरं चलशर्करं रोध्र ४१ मत्कपालं खर्परं कुधिरं कुंकुमं सैलबालकहप
लमोचरसा शाकपयकशारीषं स्थापयति वेदनामध लहलंगकदंबविडुलं च विडलो
वेतसः कोडर्पाहिगुचोरकपलं कबागुग्गुलु स्थगोकरोहणी कटुका वयस्थाः पूतपरि मेदो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जटिला गोलोचाव्रसंज्ञादाः ४२ पलंकषा गुग्गुलुः अशोकरोहिणी कटुकावँस्याहरी
तकी वृत्सा रिमेदो दुर्गंधो हिमारः जटिला मांसी गोलोमी दूर्वा रोंदि दूर्वा मोघा विषघ्न कु
सेना व्यथा रिषाः ब्राह्मी सवाघपुष्पी भूतावर्षो स्थापयेद्रुमं ४२ अमोघा पटला विषघ्न कु
सेना वाराहि अव्यथा वृत्स चारिणी शिवामलकी अरिष्टा नागबला वाघपुष्पी अति
बला शाखा वर्षा शतावरी अमृता पथ्या धात्री जीवंती श्रेयसी स्थिरा बुत्तोः मंडूकप
र्ण्यतिरसा स्थापयति पुनर्नवा व वयः ४४ श्रेयसी वा मधुरा रास्ना इति नानाविध व्या
धि विधानार्थमुदाहृताः योगा रोगानुरवशात्कल्पयेज्ज्ञानू यथायथं अथ विदार्यादि
५६ गणतयः तत्र विदार्यादिगणमाह विदारीति वृश्चिकाली वृश्चिकुपत्रा वृश्चिवः पुनर्नवा
देवाह्वयं सहदेवा विश्वदेवा च सूर्यपर्णी माषपर्णी मुद्गपर्णी च कंडूकारी कपिक
च्छुः जीवनं च ह्रस्वं च पंचमूलं प्रागुक्तं गोपसुता सारिवा त्रिपदी हंसपदी अयं विदार्या
दिको गणो हृद्यत्वादिगुणः शोषो राजयक्ष्मा ऊर्ध्वं उदावर्त्त सारिवादिगुणमाह सा
रिवेत्यादि शिशिरद्वयं श्वेतपीते चंदने पद्मकादिगुणमाह पद्मकेत्यादि पुंड्रः पुष्पौ
डरीकं तुंगा वंशलोचना शृंगी कर्कटशृंगी अमृता गडूची जीवनसंज्ञा जीवनो गणः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्राक्षोवालुः परूषकादिगणप्रमाणमाह परूषकमित्यादि वरात्रिफला राजाह्वे राजादनमिति शाके
शाकवृक्षफले अंजनादिगणमाह अंजनमिति अंजनं स्रोतोंजनं सैलालुः एला महादर्ईवद्धा
ची नागाह्वं नागकेशरं पटोलादिगणमाह पटोलेत्यादि मधुश्रवा मूर्वा गडूच्यादिगणमाह गडू
चीत्यादि अरिष्टो निंबः आरग्वधादिगणमाह आरग्वधेत्यादि काकतिक्तिका करंजकाः सुवह
सो विकंकतः सैर्यकः सहचरः घोंटा बदरी असनादिगणमाह असनेत्यादि श्वेतवाहोऽर्जुनः प्र
कीर्यः पूतिकरंजः कदरः श्वेतखदिरः भंडी शारीषः त्रिहिमं चंदनत्रयं तलस्तालवृक्षः नागक
मगरू क्रमुकः पूगः कलिंगइंद्रयवः वरुणादिगणमाह वरुणेत्यादि मोरटो क्षीरमूर्वा वृषार
णिकाऽग्निमंथो जयाह्वं यंतर्कारी द्वयं वहलपल्लवशीग्रुः आखुवातमुरस्तोमम् अंतरं गुल्मं
विद्रधिं च ऊषकादिगणमाह ऊषकमित्यादि ऊषकः क्षारमृत्तिका तुत्थं मूत्रतुत्थं वीरतर्वादि
गणमाह वीरतरेत्यादि अरणी तर्कारी वृक्षो वकपुष्पः अलंटइक्षुः वसा दर्भी वंदाः कामवृक्षः
मल्लूकः बंडूकः करंभ उत्तमारणी पार्थादित्यभक्ता रोध्रादिगणमाह रोध्रेत्यादि शावरको रो
ध्रः श्वेतरोध्रः जिंगिणी मोदकी युक्तारा सा कुत्सितांवः कदंबः गतः शोको शोकः परिपेलवः
मुद्रमुस्ता मोचा सल्लकी अर्कादिगणमाह अर्केत्यादि अलर्कौ मंदारः नागदंती पर्वपुष्पी वि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सल्ला लांगली प्रत्यक्पुष्पी अपामार्गः पीततैला ज्योतिष्मती उदकीर्या पूतीकरंजः श्वेतायुग्मे 807
कृष्णेहि कुटमी च तापसवृक्षः इंगुदी सुरसादिगणमाह सुरसेत्यादि सुरसयुग्मं श्वेतकृष्णतुलसी
फणिज्झको मरुबकः कोलमालाजकः खरबुको मरुवकः वृषकर्णी वृक्षकर्णी स्नवकः सुतकारी
सरसी कपित्थपर्णी कार्मुकः प्राचीबलः कुरुलोमुंडी भूस्तृणो कच्छणं भूतकेशी निर्गुंडी मुष्ककादि
गणमाह मुष्ककेत्यादि मुष्कको मोक्षः द्वीपीवृक्षः वत्सकादिगणमाह वत्सकेत्यादि घुणप्रि
या अतिविषा गंडीर स्नुही कटुंग बींटुकः फलंमदनफलं पशुगंधा जचलो वायुः वचादिहरि
द्रादिगणमाह वचेत्यादि हरिद्राद्वयेत्यादि कलसी पृश्निपर्णी कुटजोद्भवः इंद्रयवः अष्ठपव
नः उरुत्तमः प्रियंग्वाद्यंबष्ठादिगणमाह प्रियंग्वित्यादि अंबष्ठेत्यादि पुष्पं पुष्पांजनं अंजनयु
ग्मं स्रोतोजनरसांजनं च पद्मा भार्ङ्गी पद्मरजः योजनवल्ली मंजिष्ठा अनंता दुरालभा सारद्रुमः शा
ल्मली मोचरस सत्तनिर्यासः समंगा लज्जालुः पुंगेन्द्रो पुन्नागः शीतं चंदनं मदनीय हेतुधात
न ४ की अंबष्ठा मयूरशिखाः मस्करी लज्जिका बिल्वपेसिका शुष्कबिल्वपेशिका संधानी यो
भग्नसंधानजननी मुस्तादिगणमाह मुस्तेत्यादि द्वितिक्ता कटुका करंजका च हैमवती श्वे
तवचा न्यग्रोधादिगणमाह न्यग्रोधेत्यादि [illegible] सदाफल उदुंबरः जंबुद्वयं राजजंबु जंबूश्च
मा कपीतन भल्लातकः शोमवल्कः करफलः पियाल मार्चारः नंदी नंदी वृक्षः कोलिबदरी विर

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न१

त्वातिंदुका भग्नसंधानो भग्नसंधानकृत् एलादिगणमाह एलायुग्मेत्यादि तुरुष्कः सिल्हकः सिला
रस ध्यामकं रोहिषं चोरको गुंथिपर्णः चोचं त्वचं पत्रं पत्रकं जातिरसो बोलः शुक्तिर्नखं व्या
घ्रनखं त्वड्भेदः श्रीवासः सरल निर्यासः देवधूपो राला खपुरः सल्लकी निर्यासः नागाह्वं ना
गकेशरं श्यामादिगणमाह श्यामेत्यादि श्यामा त्रिवृन्मूला त्रिवृत् द्रवंती चीरी तपस्वा दंती
भेदः क्रमुकः पूगः कुटरूणा त्रिवृत् चर्मसाह्वा सप्तला शिखरी अपामार्गः रजनकः कंपिल्लः
छिन्नरुहा गडूची वल्लाजी वृद्धदारुकः व्याधिघातः आरग्वधः वहलः शिग्रुः वहुरसः इक्षु
तीक्ष्णवृक्षः पिलूः तस्तस्य फलानि उपसंहरति वयस्थैः शादिति एतेगणान यावदुक्तान ग्रा
ह्याः किं तर्हि योग्यायोग्या इत्याह तेषु त्वलाभतइति देशतः कालतो वा कस्यचिदुर्व्यस्यालाभ
मेतत्सदृशगुणमन्य कल्पनमनुक्तो ह्यपि प्रदानं मापामच्छुल्यादिक्षीरं ख्यापि
वसनानां हैलमापितं त्वमनुक्तानां उपलक्षितो बिरहृत्स्तो प्रयोजनमपिवञाप्यमनानां वं
ट्यादिका कासघ्नानां तालीसादिकस्तानां नामयवतीलोग्वासः श्वयथुघ्नानां पुष्य
मसंदिग्धा आसवास पार्श्वशूलौ चिरदूषणा अजापयः शोधतुल्यत्वथुसंग्रह
णयुपशमनानां मधूकपत्र त्वोपपुत्वाद हंदिदं तथानिशोणपशमनानां सरसकारं त्रि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दनुत्तमपि यौगिकं उक्तमप्ययौगिकं जह्यात् देशाकावस्थाद्यपेक्षयोचितं यौ
गिकं अनुचितमयौगिकं यथा लाभयोगेपि सुश्रुते नोक्तं समस्तवर्गमर्द्धं वा यथा
लाभयथाधिवा प्रयुंजीत भिषक् प्राज्ञो यथोदितः कर्मसु इति एते वर्गाः सकल्पना
योग्याश्चेत्याह एते वर्गा इति देशयति सर्वे कल्पादीनमन्यतमेन कल्केन पानादी
नामन्यतमेनांतःप्रयोगेण लेपादीनामन्यतमेन बहिःप्रयोगेण वाहुः साध्या
नापि रोगान्घ्नंति अग्र्याण्याणां संग्रहः संग्रहे श्रेष्ठमुदकमाश्वासनस्तंभन
क्लेदननां वायुः प्राणसंज्ञाप्रदानहेतूनां अग्नीरामस्तंभशीतशूलोद्वेप
कंपप्रशमनानां स्नानं सुराच श्रमहराणां क्षीरं जीवनीयानां मांसं बृंहणीयानां रसस्त
र्पणीयानां लवणमन्नद्रव्यरुचिकराणां तिंदुकमनन्नद्रव्यरुचिकराणां अम्लं हृद्या
नां कुक्कुटो बल्यानां तैलं वातश्लेष्मप्रशमनानां सर्पिर्वातपित्तप्रशमनानां मधु पित्त
श्लेष्मप्रशमनानां स्वेदो मार्दवकराणां व्यायामः स्थैर्यकराणां क्षारः पुंस्त्वोपघातिनां
आमं कपित्थमकंठ्यानां आविकं सर्पिरहृद्यानां माहिषक्षीरं स्वप्नजननानां मंदकं द
ध्यभिष्यंदकराणां यवाः पुरीषजननानां जांबवं वातजननानां कुलत्थोम्लपित्तजननानां

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

माषाः सक्तुल्यो विदक्षीरं श्लेष्मपित्तजननानां दुरालभा पित्तश्लेष्मप्रशमनानां उपवासो
ज्वरहराणां वृषो रक्तपित्तशमनानां कंटकारिका कासघ्नानां लाक्षा सद्यक्षतानां नाग
बलाभ्यासः क्षयक्षतानां पुष्करमूलं हिध्माश्वासकासपार्श्वशूलापहराणां अजप
यः शोषघ्नस्तन्यकररक्तसंग्रहणीप्रशमनानां मृद्रूपमृष्टलोष्ठप्रसादछर्दितृष्णाति
५ योगशमनानां मृद्वीकावं विल्वमूलं वसुघ्नार्शः प्रशमनानां कुटजो रक्तार्शः प्रश
मनानां लाजा छर्दिघ्नानां यावशूकः संशमनीयपाचनीयार्शः प्रशमनीयानां त
क्राभ्यासो र्शःश्वयथुग्रहणीदोषघृतव्यापत्प्रशमनानां क्रव्यादमांसाभ्यासो र्शः
शोषग्रहणीदोषघ्नानां मुस्तः संग्रहणीयदीपनीयपाचनीयानां अतिविषा पाच
नीयसंग्रहणीयसर्वदोषापहराणां विल्वं संग्रहणीयदीपनीयवातकफप्रशमनानां
गंधः प्रियंगुः शोणितपित्तातिवेगप्रशमनानां उदीच्यं निर्वापणदीपनीयछर्द्यतिसार
हराणां कट्वंगः संग्रहणीयदीपनीयानां कुटजत्वक् श्लेष्मपित्तरक्तसंग्रहणीयोपशो
षणानां उत्पलकमलकिंजल्को नंतश्च संग्रहणीयरक्तप्रशमनानां काश्मर्यफलर
क्तसंग्रहणीयरक्तपित्तप्रशमनानां पृश्निपर्णी रक्तसंग्रहणीयदीपनीयपाचनीयवात

810

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हरवृष्याणां शालपर्णी वृष्यसर्वदोषहराणां एलासंग्रहणीयवल्यवातहराणां पिप्पलीमूलंदी
पनीयपाचनीयाहराणां चित्रकमूलंदीपनीयगुदशोथशूलहराणां गोक्षुरको मूत्रकृच्छ्रानि रं२
लहराणां हरिद्राप्रमेहहराणां रस्नावसेको विद्रधिविसर्पपिडकागंडमालापहराणां ऐरंडतै
लाभ्यासो वर्ध्मगुल्मशूलहराणां लशुनो गुल्मानिहराणां हिंगुनिर्यासो छेदनीयदीपनीया
नलोमिकवातकफप्रशमनानां अम्लवेतसो भेदनीदीपनीयानुलोमिकवातश्लेष्महराणां उ ९६
ष्ट्रीक्षीरमुदरश्वयथुघ्नानां अयोरजः पांडुरोगघ्नानां खदिरः कुष्ठघ्नानां विडंगंकृमिघ्नानां रा
स्नावातहराणां एरंडमूलंवृष्यवातहराणां गुग्गुलुर्मेदोनिलश्लेष्महराणां अमृतासंग्रहणी
यदीपनीयवातश्लेष्मशोणितविवंधप्रशमनीयानां मदनफलंवमनास्थापनानुवासनोप
योगिनां त्रिवृत्सुखविरेचनानां चतुरंगुलो मृदुविरेचनानां स्नुकूपयस्तीक्ष्णविरेचना
नां प्रत्यक्पुष्पी शिरोविरेचनीयानां त्रिफलगुग्गुलुर्व्रणानां शिरिषो विषघ्नानां आम
लकं वयःस्थापनानां हरितकीपथ्यानां क्षीरघृताभ्यासो रसायनानां समघृतसक्तुप्राशा
नाभ्यासो वृष्योदावर्तहराणां संकल्पोनर्कोहरश्च वृष्याणां दौर्मनस्यमवृष्याणां तैलगंडूषा
भ्यासो दंतवलरुचिकराणां चंदनोदुंवरं निर्वापणलेपनानां रास्नागुरूणीतापनयनप्रलेपा
नां एला मज्जकोशीरेदाहत्वकुदोषस्वेदापनयनप्रलेपा[illegible]नां कुष्ठंवातहराभ्यंगोपनाहो

811

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गिनां मधुकं चक्षुष्यवृष्यकेश्यकंठ्यवर्ण्यवर्णंजनीयरोपणीयानां अजीर्णाशनं ग्रहणीदूष
कराणां विरुद्धवीर्याशनं निंदितव्याधिकराणां गुरुभोजनं दुर्विपाकानां अतिमात्रा
शनमामदोषहेतूनां यथाग्न्यभ्यवहारोग्निसंधुक्षणानां यथासात्म्यमाहारो विहा
प४ रो सेव्यानां एकाशनभोजनं सुखपरिणामकराणां विषमानमग्नेर्वैषम्यक
राणां कालेभोजनमारोग्यकराणां वेगधारणमनारोग्यकराणां तृप्तिमाहारगुणा
नां अनुशनमायुषो ह्रासकराणां प्रमिताशनं गवेधुकान्नं च कर्शनीयानां उद्दाल
कान्नं रूक्षणीयानां मद्यं सौमनस्यजननानां मद्याक्षेपो धृतिस्मृतिहराणां स्त्रीष्वतिप्रसंग
शोषकराणां शुक्रवेगनिग्रहः षाण्ढ्यकराणां पराघातनमन्नाश्रद्धाजननानां मि
थ्यायोगो व्याधिमुखानां रजःस्वलागमनमलक्ष्मीमुखानां ब्रह्मचर्यमायुष्याणां
परदारगमनमनायुष्याणां अयथाप्राणमारंभः प्राणोपरोधिनां विषादो रोगवर्द्धना
नां हर्षः प्रीणनानां शोकः शोषणानां निर्वृत्तिः पुष्टिकराणां आश्वासो बलकराणां पु
सुप्न२ ष्टिः स्वप्नकराणां स्वप्नस्तंद्राकराणां सर्वरसाभ्यासो बलकराणां बालो मृदुभेषजार्हाणां वृद्धो याप्या
नां गर्भिणी तीक्ष्णौषधव्यायामवर्जनीयानां सौमनस्यं गर्भधारणानां सन्निपातो दुश्चिकि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्स्यानां ज्वरो रोगाणां कुष्ठो दीर्घरोगाणां राजयक्ष्मा रोगसमूहानां प्रमेहोनुषंगिणां
जलौकसोनुशस्त्राणां वास्तिस्तन्त्राणां हिमवानौषधभूमीनां सोम ओषधीनां मरुभू
मिरारोग्यदेशानां अनूपभूमिरहितदेशानां निर्देशकारित्वमातुरगुणानां अनिर्देश
कारित्वंरिष्टानां भिषक् चिकित्सारोगाणां सिद्धवैद्यगुणां नास्तिको वर्ज्यानां लौल्यं क्लेश
कराणां आत्मवन्तोपकारिणां शास्त्रं सहितस्तर्कसाधकानां दृष्टकर्मता निःसंशयक
राणां सद्बुद्धिसंलापो बुद्धिवर्द्धनानां आचार्यशास्त्राधिगमहेतूनां महेहद्रोवप्राणस्था
नहेतूनां आयुर्वेदोमृतानां सद्वचनमनुष्ठेयानां सर्वसन्यासः सुखानां तत्रोदकानि मद्धू
षप्रसादतत्राभ्यासरक्तावसेके दंडतैलभ्यासो क्षीरमदनफलमध्वादसेपके रसाभ्या
संगर्भणी नामेके कस्मात्समुदायाद्यनिर्धरणं पुष्करमूलादीनां तु समुदायादेवेति भव
ति चात्र अग्र्याणां शतमुदिष्टं पंच पंचाशदुत्तरं अलमेतद्धि जानीयाद्धिताहितविनि म
श्चय इति   इति हेमाद्रिटीकायामायुर्वेदरसायने अन्नाद्यादिगणसंग्रहः साकल्येन निरूपितं
यद्येति स्नेहविधिमध्यायं व्याख्यातुं प्रतिजानीते यतः पूर्वाध्याये भेषजान्युक्तानि तेषां प्रयो
गोवक्तव्यः स च स्नेहशोधनास्थापनानावनधूमगंडूषतर्पणाश्च्योतनमेदादनेकधाचिकित्सा
कलकायां तु प्राक्पावनं स्नेहविधि ततश्च स्वेदस्तथा स्याद्वमनविरेकौ निरूहणान्वासनवस्ति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वा॰टी॰ १८.

कर्मनस्य कर्मक्रमश्चेति भिषग्वराणां रास्नापटोलपिचुमंदपयोभिरादौ भुंज्याद
रूषकफलत्रयवारिभिर्तोपक्वा [illegible] म दोषवपुषकुदनेतरं हि
स्नेहो हितः सुरभिवासकवदुपकलादिरिति रास्नाक्वाथादित्रये भुंठिकादित्रयं वात
वातादित्रये क्रमात्साधनं तत्र स्नेहनमस्मिन्नध्याये तत एवायं स्नेहविधिः तत्र स्नेह
द्रव्यमाह गुरुशीतेत्यादि रूक्षणं तत्रापि चोत्तममिति संस्कारस्यानुवर्तनात् यथा शीतैः
संस्कृतं शीततामुष्णैः संस्कृतमुष्णतां भजत इत्यादि संग्रहे तु माधुर्यादि विदाहित्वजन्मा
द्येव च शीलनादिति सर्पिरादीनां स्नेहप्रयोगे दोषविशेषेण तारतम्यमाह पित्तघ्ना
इत्यादि तैलाद्वसा ततो मज्जा ततः सर्पिः पित्तघ्नं सर्पिषो मज्जा ततो वसा ततस्तैलं वात
घ्नं कफघ्नं च स्नेहनसाध्ये पित्तरोगे पित्तस्याभ्यनुज्ञार्थं पित्तघ्नत्वमुक्तं एवमन्यत्र स
र्पिरादीनां गुरुत्वे तारतम्यमाह घृतादित्यादि यमकादि संज्ञात्रयमाह द्वाभ्यामि
त्यादि तैर्गुरुत्वोक्तक्रमैः तेन घृततैलाभ्यां यमको घृततैलवसाभिस्त्रिवृतः सर्वैर्महान्
संग्रहे तु स्नेहाभ्यञ्जयादधिक्षीरं मांसास्थिफलदारु चेति स्नेहनीयानाह स्वेद्येत्यादि स्वेद्यः
कर्तव्यः स्वेद्यः संशोध्यः कर्तव्यः शोधनः चिंतकश्चिंतापरः स्पंदो नेत्रकोपः दारुणः प्रतिबोधः

814

२५

हे॰१८.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

815

रूक्षो नीलः अस्नेह्यानाह न त्वेति मंदाग्नीत्यादि अवस्नेह्यत्वमतिदुर्बलस्या
स्नेह्यत्वमित्यविरोधः अप्रस्तुता अपयावत्प्रस्तुता घृतस्य विषयमाह वातातपेत्या
दि तत्रेत्यादि आदिशब्दात्पितोत्का अग्न्यादयः तैलविषयमाह ग्रंथिइत्यादि वसा
विषय मज्जो माह वातातपेत्यादि वातादि बद्धिः स्त्रीएधातुषु वाता वृत्तपथेषु मारुता
वृतस्रोतस्सु शेषेण नाम मज्जा मेद वसायां विषयांतरमाह वसांत्वित्यादि दग्धो
ष्ट्रिना आहतो दंडा दीनां भग्न योनिः स्यान्नतञ्च तयोनि स्नेह्यानां कालवि
भागमाह तैलमित्यादि प्रावृषितैलं वर्षति शारदि सर्पिः शेषेण वसंतेया ए। ६
यस्मिन्नृतावुक्तः स तस्मिन्निरभ्रे दिवसे शस्तः साधारणे भागे विमले रवौ साधा
२५ रणेषु श्रावणकार्त्तिकचैत्रेषु व्याधिवशादकालेपि स्नेहनं कार्यमित्याह तैल
मित्यादि त्वरापामात्ययिके कार्ये शीतेपि स्नेहनं कार्यं तत्र तैलेन ग्रीष्मेपि घृ वे२
तेन तत्र निशि पित्तादिषु दिवा स्नेहनस्यापवादमाह निशीति दिनरात्रिनिय
मत्यागे दोषमाह निषूपन्नयेति येषां दिवा स्नेहनमुक्तं तेषां निशि करणे वा
तकफजारोगाः स्युः येषां निशि स्नेहनमुक्तं तेषां वा दिवा करणे पित्तरोगाः स्युः स्नेह

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दानप्रकारमाह युञ्ज्यादिति अथवा चाद्यदद्यात् भक्ष्यादिभिरन्नैः संयोज्य वस्त्यादिक्र
मेण उक्तप्रकाराणां संज्ञामाह रसैश्चैकत्वाभ्यामित्यादि उक्तप्रकारः स्नेहो विचारणा॰
संज्ञः स चतुःषष्टिधा तत्र भक्ष्याद्यन्नैर्युक्तान्नस्य मधुरादि भेदैः षट्षष्टि भेदैस्त्रिषष्टि
धा स चान्यैस्त्रिसंयोगाद्द्रव्यैरभिभूतत्वादल्पवीर्यः वस्त्यादिप्रयुक्तस्तु केवलत्वादेक
धा स चाल्पमात्रत्वादल्पवीर्यः अल्पवीर्यत्वान्न द्विधोपि विचारणासंज्ञः तदुक्तो वि
चारणासंज्ञोन अच्छः केवलः अच्छपेयस्य श्रेष्ठत्वमाह स्नेहस्येति वाल्यः प्रयो
गः स अच्छपेयः अच्छपेयस्य मात्रात्रयमाह द्वाभ्यामित्यादि अच्छपेयस्य चतु
र्थी मात्रामाह ताभ्यामिति दोषादीन् वीक्ष्यताभ्योपि ह्रसीयसां याममपरिणामि॰
नीं मात्रां परिकल्पयेत् ह्रसीयसीमेव प्रथमं योजयेदित्याह प्रागेव ह्रसीयसी॰
मित्यादि तत्र हेतुरुक्तः संग्रहेतु अज्ञातकोष्ठे हि बहु कुर्याज्जीवितसंशयमिति मा
त्राणां विषयश्चोक्तः तत्र दुर्बल मंदाग्निबालवृद्ध सुखात्मकैः अपथ्यारिक्तैः कोष्ठे॰
श्च ज्वरातिसारकासिभिः ह्रस्वापेयास्त्वासां हि परिहारेनुवर्त्तते चिरं च वर्त्यैन रुजे
विषयत्वात् अच्छपेयमाह यथोक्तेनियमस्तु केवलः पीयते स उक्तेन वाद्विचारणा ८

